श्रीमद्भगवद्गीतायाः

विज्ञानभाष्यम्

(काण्डचतुष्टयात्मकम्)

जयपुरराजसभा-प्रधानपण्डित-वेदरहस्योद्घाटनप्रवण—
महामहोपदेशक-समीक्षाचक्रवर्त्ति—
विद्यावाचस्पति-श्रीमधुसूदनशर्म्म—
मैथिल-प्रणीतम्।

तत्रेदं

द्वितीयं शीर्षककाण्डापरपर्यायं

मूलकाण्डम्

जयपुरमहाराजसंस्कृतकालेजाध्यक्ष
म० म० श्रीगिरिधरशर्म्मचतुर्वेदेन
संपादितम्।

श्रीजयपुरराज्य की सहायता से इलाहाबाद
लॉ जर्नल प्रेस, इलाहाबाद मे छपवा
कर प्रकाशित किया गया।

वि० सं० १९९५

141304

॥ श्री ॥

शीर्षककाण्डापरपर्यायं

मूलकाण्डम्

विषया	पृष्ठ-सख्या
१–उपोद्घातः	१
२–विद्याचतुष्टयी	६
३–उपनिषदा तालिका	७
४–उपदेशतालिका	९
५–सशीर्षकमूलपाठः	२१
(१) ऐतिहासिका श्लोका	२१
(२) चातुर्विद्योपक्रम·	२४
(३) राजर्षिविद्या	२६
(४) सिद्धविद्या	५४
(५) राजविद्या	६५
(६) आर्षविद्या	७९
(७) विद्यानामुद्धारः	१००
(८) उद्धारोद्धारः	१०२
(९) फलश्रुति., उपसहारश्च	१०३

ओ तत्सत्

अथ श्रीमद्भगवद्गीताया विज्ञानभाष्यस्य शीर्षककाण्डापरपर्यायं मूलकाण्डं नाम द्वितीयं काण्डं प्रारभ्यते ।

तत्र 'उपोद्घातः' प्रथम प्रकरणम् ।

(शास्त्रोद्देश्यम्)

आत्मसस्कारार्थानि हीमानि सर्वाणि शास्त्राणि लोके प्रवर्तमानानि दृश्यन्ते । दोपमार्जनम्, गुणाधानम्, हीनाङ्गपूर्तिश्चेति त्रिविधा सस्कारा भवन्ति। यत स्वस्य परस्य वात्मनि दु खान्यापद्यन्ते, स दोष । तत्कारणोच्छेदो दोपमार्जन सस्कार । यतस्तु स्वस्य परस्य वा सुखानि सपद्यन्ते, स गुण । तत्कारणस्थापन गुणाधान सस्कार । अङ्गविकलस्यात्मन साकल्यसपादनमङ्गपूर्ति सस्कार । तेपु च दोपमार्जन मुख्यम्। दोपदुष्टे नदितरसस्कारायोगात्, उत्तरसस्कारयोर्दोपमार्जनसस्काराधीनत्वात्। न हि मलिने वस्त्रे पीतरक्तादिरञ्जनव्यापारा साधूपपद्यन्ते। अतश्च दोपमार्जनसस्कारोपायप्रदर्शन शास्त्राणा मुख्यो विपय ॥

(विपयविभाग·)

अस्ति हीय भगवद्गीतोपनिपत् तावदेक भगवदुपदिष्ट विज्ञानशास्त्रम् । तत्परिचयाय तावदिमे श्लोका उच्यन्ते—

१—गीताशास्त्रमिद सप्तशतश्लोकात्मक मतम् । (७००)
ब्रह्मविद्याभिध शास्त्र योगशास्त्र च तद् विदु ॥१॥

२—गीताशास्त्रप्रकरण द्वेधा तावद् विभज्यते ।
ऐतिहासिकमस्त्यन्यदन्यद् वैज्ञानिक पृथक् ॥२॥
चतु पष्टिमिता श्लोका इतिहासप्रसङ्गगा (६४) ॥
वैज्ञानिकास्तु षट्त्रिशत्-पर–पट्शत-(६३६) सख्यका ॥३॥

३—वैज्ञानिकप्रबन्धस्य मध्ये विद्याचतुष्टयी ।
उपक्रमोपसहारौ तस्या आन्तयो पृथक् ॥४॥
तेषु षट्सु विभागेषु वरोपनिपद (२४) स्थिता ॥
एका–ष्टौ–द्वे च–तिस्रश्च–सप्त–तिस्र–इति क्रमात् ॥५॥
(१) (८) (२) (३) (७) (३)

४—उपदेशाश्च तेष्वेव विभागेषु विभावयेत् ।
ख——न्म——ध्या——र्ग——ध्व——जान् क्लृप्तान् पश्येदुपनिषत्सु तान् ॥६॥
(२)–(५०)–(१९)–(३२)–(४९)–(८)
पञ्चाशदुपदेशास्तु सप्त सप्त च सप्त च । (७।७।७।३।३।५।९।९)
त्रयस्त्रय पञ्च नव नवेत्यष्टासु ते क्रमात् ॥७॥ (५०)
क्रमाद् दश-नवेत्येव द्वयोस्तत्रोनविंशति ॥ (१९)
(१०) (९)
निसृपूपनिषत्स्वेकादश पञ्चदशाथ षट् ॥८॥ (३२)
(११)–(१५)–(६)
अथ सप्तोपनिषदा नव-पञ्च च–सप्त च ॥
(९)–(५)–(७)
चत्वारो विंशतिर्द्वौ द्वावुपदेशा प्रकीर्तिता ॥९॥ (४९)
(४)–(२०)(२)(२)
चातुर्विद्योपक्रमे तूपदेशौ द्वौ प्रतिष्ठितौ ॥ (२)
(२)
चातुर्विद्योपसहारे चतुष्क च द्विक द्विकम् ॥१०॥ (८)
(४)–(२)–(२)
५—इत्थ गीतोपदेशाना सख्या षष्टयधिक शतम् । (१६०) ॥
तत्रोपनिषदा सख्या चतुर्विंशतिरिष्यते ॥११॥
विद्याचतुष्टयी गीता बुद्धियोगचतुष्टयी ॥
एतावदिह गीताया हृदय परिदर्शितम् ॥१२॥

(शास्त्रान्तरवैलक्षण्यम्)

अपि च—

१—सर्वदु खक्षयोपाया आत्मविद्याश्चतुर्विधा ॥
चतुर्विधा बुद्धियोगा—इति गीता प्रवक्ति न ॥१॥
२—शास्त्रान्तरेषु त्वात्माय क्षराक्षरविधो धृत ॥
जायते म्रियते भुङ्क्ते नानाकर्म्मफलानि स ॥२॥
आत्मा विद्याकर्म्ममयस्त्वव्यय पुरुष पर ॥
अपूर्व सर्वशास्त्रेभ्यो गीतायामिह दर्श्यते ॥३॥
३—कर्म्मयोगो भक्तियोगो ज्ञानयोग—इति त्रय ।
शास्त्रान्तरेषूपदिष्टा योगा निष्ठाप्रभेदत ॥४॥
कर्म्मसन्यासयोग तु प्रत्याख्यायैव सर्वथा ।
अपूर्वो बुद्धियोगोऽत्र गीतायामुपदिश्यते ॥५॥
'न कर्म्मणामनारम्भान्नैष्कर्म्य पुरुषोऽश्नुते ॥
न च सन्यसनादेव सिद्धि समधिगच्छति' ॥६॥
'कर्मणैव हि ससिद्धिमास्थिता जनकादय' ॥
कर्म्मैव कर्म्मणो बन्ध निवर्तयति मुक्तये ॥७॥

४—इय गीता ब्रह्मविद्याऽव्ययब्रह्मनिरूपणात् ।
अपि गीता योगशास्त्र बुद्धियोगोपदेशत ॥८॥
शास्त्रान्तरप्रसिद्धानामात्मना परमात्मनि ।
अव्ययेऽस्मिन् प्रतिष्ठास्ति शुक्र ब्रह्मामृत हि तत् ॥९॥
कर्म्म-भक्ति-ज्ञान-योगा बुद्धियोगात् पृथक् कृता ।
नात्यन्त श्रेयसे शक्ता वैपम्याज्ज्ञानकर्म्मणो ॥१०॥
५—सर्वशोकशमोपाया बुद्धियोगाश्चतुर्विधा ॥
वैराग्य ज्ञानमैश्वर्य्य धर्म्म—इत्यभिधानत ॥११॥
एपा चतुर्णा या विद्यास्तासा गीता प्रकाशिका ।
चतुर्विधास्ता राजर्षि—सिद्ध—राजार्प—भेदन ॥१२॥
पुरायुगे भिन्नभिन्नसमाजेष्वनुवर्तिता ।
या आसस्ता समाहृत्य गीतायामत्र दर्शिता ॥१३॥
विद्याचतुष्टयी गीतानाम्ना भगवतोदिता ।
ब्रह्मविद्यास्ति सा योगशास्त्र चेदमिति स्थिति ॥१४॥

(आत्मसंग्रह)

तस्य च गीताशास्त्रस्यात्मनि दुःखोदयहेतुभुताऽविद्यालक्षणमहादोपोपशमनोपायप्रदर्शन मुख्यो विपयोऽस्तीति विज्ञेयम् । तथा हि—आत्मा तावद् द्विविध—निर्धर्म्मक ,सर्वधर्म्मोपपन्नश्च । तत्र निर्धर्म्मकस्तावदयमद्वैतलक्षणो निर्गुणो निर्विशेप आत्मा शास्त्रानधिकृतो भवति, अवाङ्मनस-गोचरत्वेनानिर्वचनीयत्वात् । अथ सर्वधर्म्मोपपन्नोऽप्येक एव सन् द्विविधो विवक्ष्यते—सर्वधर्म्मविशिष्ट , सर्वधर्म्मयोग्यश्च । तत्र सर्वधर्म्मविशिष्ट परात्परोऽयमभयो नामात्मा । सोऽपि शास्त्रेऽनधिकृतो भवति—अव्यावृत्तरूपतया विधिनिपेधमर्मकेऽस्मिन् शास्त्रे तदुपपादनायोगात् ।

अथ य सर्वधर्म्मयोग्य, स खलु प्राणादिपञ्चप्रकृतिविशिष्टस्त्रिपुरुप । स च नानाधर्म्म-योगितया द्वैतलक्षण सगुण सविशेपो न आत्मा ।

तस्मिश्चायम्-**अव्यय -अक्षर -क्षर.**—इत्येते त्रय पुरुपा—एक पुरुपो गूढोत्मा नामास्माक-मन्तरतमो मुख्य आत्मा। तत्रैव चात्मनि विश्वव्यापीश्वरप्रकृतिरूपब्रह्माश्वत्थसहसप्रयुक्तकर्म्माश्वत्थ-निवन्धनाविद्याबुद्धिचतुष्टयाकस्मिकमसर्गजनिता पञ्चक्लेशकर्म्मविपाकाशयप्रभृतय सर्वेदोपा सप्रवर्तन्ते, अनुवर्त्तन्ते, सम्लवन्ते च। तत्र तावदेतस्याव्ययस्य द्वौ धातू रूपे भवत—**विद्या** च **कर्म्म** चेति। **आनन्दो विज्ञान मन** इति पर्वत्रयी विद्या नाम। अविद्यान्धकारविरोधिनो ज्योतिर्म्मयस्यैतस्य पर्वणो मुक्ति साक्षित्वात्। अथ **मन प्राणो वागिति** पर्वत्रय कर्म्म नाम। वीर्य्यरूपस्यैतस्य पर्वण सृष्टिसाक्षित्वात्। अस्यैव च विद्याकर्म्मकृतरूपस्य **सम्यग्ज्ञानान्यथाज्ञानाज्ञानवत· सुकर्म्मविकर्म्माकर्म्मवतश्चा**त्मन सर्वदोप-निवृत्तिपूर्वकाखिलकल्याणगुणाधानलक्षणसस्कारोपपत्त्यर्थ भगवद्गीताप्रभृतीनि सर्वाणि शास्त्राणि प्रवर्तन्ते ॥

(बुद्धिभेदाः)

अथैतस्य पुरुषस्य येय प्राणादिपञ्चलक्षणा प्रकृति, तत्र वाङ्मयी तृतीया प्रकृतिर्बुद्धि-र्नाम। अष्टौ च बुद्धिभेदा भवन्ति—चतस्रस्तावद् विद्याबुद्धय, चतस्र पुनरविद्याबुद्धयश्चेति। **धर्म्मः**[१],

ज्ञानम्[२], **वैराग्यम्**[३], **ऐश्वर्य्यम्**[४]——इति——विद्याबुद्धयो भगनामान । अथ **मोह**नाम्न्यविद्या[१], **अस्मिता**[२], **रागद्वेषौ**[३], **अभिनिवेश**[४]——इत्यविद्याबुद्धय क्लेशनामान । तत्र **धर्म्मेणाभिनिवेशो, ज्ञानेन मोहो, वैराग्येण रागद्वेषौ, ऐश्वर्य्येणास्मिता** चेति पुरुषात्मनि प्रयत्नादाहितैर्विद्याबुद्धिविशेषैरविद्याबुद्धिविशेषा बलानुसारान्निवर्त्यन्ते, प्रतिबन्धितया सहावस्थानायोगात् । अविद्याबुद्धयश्चेतस्मिन्नात्मनि——अविज्ञातनिमित्तोपस्थितिसमयाना कालक्रमोपपन्नाना कर्म्मविशेषाणा प्रभावात् स्वयमेवोपपद्यन्ते । तथा हि——

कर्म्मजनितशरीरप्रवर्त्तितकर्म्मलक्षणाया जन्ममृत्युपरम्पराया कर्म्माश्वत्थतया तत्पारतन्त्र्येणाकस्मादिहात्मनि स्वयमविद्याबुद्धय सक्रमन्ते । तेनावरणाच्चायमात्मनो विद्याभागस्तमश्छन्नो भवतीत्येष जीवात्मा पुरुष स्वगतैरविद्यादोषै क्लेशकर्म्मविपाकाशयादिभि पर्य्याक्रान्तो विषीदति । तेषामेवाविद्यादोषाणा समूलोच्छेदाय प्रवर्त्तमानमिद गीताशास्त्रमविद्यासमुत्थापितशोकव्युत्थानार्थमावरणलक्षणाविद्याविनाशोपायान् प्रदर्शयति । **विद्योदयप्रकर्ष एव चाविद्याविनाशहेतु**र्। तस्मादस्या गीताया विद्योदयोपायप्रदर्शनमेव मुख्य शास्त्रार्थ ।

(बुद्धियोगनिष्कर्ष)

ब्रह्मविद्या हीय गीता प्रतिपत्तव्या। अव्ययपुरुषो हीद ब्रह्म। तस्य द्विविधा चेय विद्या विज्ञायते——अव्ययपुरुषभक्तिरात्मलक्षणा प्रथमा। बुद्धिभक्ति प्रकृतिलक्षणा द्वितीया। तथा चाव्ययभक्तावात्मरूपाया विद्याया बुद्धिभक्ते प्रकृतिरूपाया विद्याया योगो **बुद्धियोगो** नामाख्यायते। तस्यापीद शास्त्र भवति, तस्मादिद योगशास्त्र नाम। स चाय बुद्धियोगश्चतुर्विधो भवति, निवर्तनीयानामविद्यादोषाणा चतुर्विधतया तन्निवृत्त्युपायभूताना विद्याबुद्धीनामपि चातुर्विध्येनैव गृहीतत्वात्। तै पुनरेतैश्चतुर्विधैरपि **बुद्धियोगै** समष्ट्या व्यष्ट्या वा सप्रयुक्तैरात्मविद्याया बुद्धिविद्याया अभिव्याप्तेरात्मनि प्रविष्टानामविद्यादोषाणामेकान्तिकी निवृत्तिर्भवति, विद्याबुद्धेरविद्याबुद्धिनिवर्तकत्वात्। तथा चैतादृश**बुद्धियोग**चतुष्टयोपपादनमेवेद भगवद्गीताशास्त्रमस्तीति विज्ञेयम् ।

(बुद्धियोगभेदा)

तत्र चेदमित्थ बुद्धियोगचतुष्टय भवति

(१) **रागद्वेष**लक्षणक्लेशजनितशोकसमुत्थानप्रतिबन्धहेतु**र्वैराग्यबुद्धियोग** । तदुपायविज्ञान **वैराग्यविद्या** । **अनासक्ति**र्हि वैराग्यविद्याया रहस्यम्। कामक्रोधनिबन्धनासक्तेरविद्याबुद्धेर्विद्याप्रतिबन्धिकाया सहसप्रयोगे तदासक्त्या विषयविशेषसमाकृष्टाया विद्याबुद्धेरात्मविद्याया योगो न सभवति ।

"यततो ह्यपि कौन्तेय पुरुषस्य विपश्चित ॥
इन्द्रियाणि प्रमाथीनि हरन्ति प्रसभ मन"——इत्युक्ते ॥

तस्मादव्ययविद्यायामञ्जसा बुद्धिविद्याप्रवेशाय विक्षिप्ताविद्याबुद्धिसहयोगजनितबुद्धिविक्षेपनिवृत्तये तावदिय**मनासक्ति**र्द्वारमपेक्ष्यते। अत एवेह वैराग्यविद्यायामनासक्तिशिक्षा विशिष्यादिश्यते। वृत्तौ **समत्व** च वैराग्य बुद्धियोगसिद्धिलक्षण विद्यात् । रागद्वेषयोरात्यन्तिकनिवृत्तिश्चेह **समत्व** नाम। अथवा विद्याकर्म्मप्रसङ्गजनितोच्चावचभावराहित्यलक्षण स्थितप्रज्ञत्व **समत्व** भवति।

"योगस्थः कुरु कर्म्माणि सङ्ग त्यक्त्वा धनञ्जय।
सिद्ध्यसिद्ध्यो समो भूत्वा समत्व योग उच्यते ॥२।४८॥

इहैव तैर्जित सर्गो येषा साम्ये स्थित मन ।
निर्दोषं हि सम ब्रह्म तस्माद् ब्रह्मणि ते स्थिता ॥५।१९॥
सर्वभूतस्थमात्मान सर्वभूतानि चात्मनि ।
ईक्षते योगयुक्तात्मा सर्वत्र समदर्शन· ॥६।२९॥
आत्मौपम्येन सर्वत्र सम पश्यति योऽर्जुन ! ।
सुख वा यदि वा दु ख स योगी परमो मतः ॥ (६।३२)
इत्यादिव्यवहारदर्शनात् तथैवोपपत्ते ॥१॥

(२) अथ अविद्यासज्ञक**मोह**लक्षणक्लेशजनितशोकसमुत्थानप्रतिबन्धहेतु**र्ज्ञानबुद्धियोग.** । तदुपाय-विज्ञान **ज्ञानविद्या** । **अन्तर्ज्योति**र्हि ज्ञानविद्याया रहस्यम् । ज्ञानान्यथाज्ञानाज्ञानत्रयस्य-कर्म्माकर्म्म-विकर्मत्रयस्य च मिथ सघर्षप्रवृत्तानिबन्धनो **मोहो** नामा**विद्याबुद्धि**र्जायते, तस्या विद्याप्रतिबन्धिकाया सहसप्रयोगे तन्मोहान्धकारग्रस्ताया विद्याबुद्धेरात्मविद्याया योगो न सभवति । तस्मादव्यय-विद्यायामञ्जसा बुद्धिविद्याप्रवेशाय मोहान्धकारनिवृत्तये तावद**न्तर्ज्योति**र्लक्षण **ज्ञानं** विद्याबुद्धेरव्यय-विद्याया प्रवेशद्वारमपेक्ष्यते । अत एवेह ज्ञानविद्याया **ज्ञानविज्ञानलक्षणान्तर्ज्योति** शिक्षा विशिष्यादि-श्यते । तुष्टिश्चेह ज्ञानबुद्धियोगमिद्धिलक्षणमिति विद्यात् ॥२॥

(३) अथ **अस्मिता**लक्षणक्लेशजनितशोकसमुत्थानप्रतिबन्धहेतु**रैश्वर्यबुद्धियोग** । तदुपाय-विज्ञान**मैश्वर्य्यविद्या** । **ईश्वरानन्यभक्तिस्त्वे**नस्या ऐश्वर्य्यविद्याया रहस्यम् । अत्यल्पशक्तेर्जीवात्म-बुद्धे**रस्मिता**लक्षणाविद्यारूपतया विकासाभावलक्षणशैथित्यादप्रवृत्तौ बुद्धिविद्याया अव्ययात्मविद्याया योगो न सभवति । तस्मादव्ययविद्यायामञ्जसा बुद्धिविद्याया प्रवेशाय बुद्धे कुण्ठितत्वनिवृत्तिपूर्वक शक्तिविशेषोद्रेकायानन्तशक्तिधनेश्वरपरानुरक्तिलक्षणा **ईश्वरानन्यभक्ति**र्द्वारमपेक्ष्यते ॥ अत एव चेहैश्वर्य्यविद्याया ज्ञानविज्ञानपूर्वकोपासनालक्षणाया **ईश्वरानन्यभक्ते** शिक्षा विशिष्यादिश्यते । अवरपरा-व्ययतादात्म्यनिबन्धनसर्वकर्म्माबन्धनत्वसिद्धिरूप **नैष्कर्म्य**मैश्वर्य्यबुद्धियोगसिद्धिलक्षण विद्यात् ॥३॥

(४) अथ–**अभिनिवेश**लक्षणक्लेशजनितशोकसमुत्थानप्रतिबन्धहेतु**र्धर्म्मबुद्धियोग** । तदुपायविज्ञान **धर्म्मविद्या** । तस्याश्च धर्मविद्याया **निवृत्त कर्म्म** रहस्यम् ।

"कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समा ।
एव त्वयि नान्यथेतोऽस्ति न कर्म लिप्यते नरे" ॥ **(ईशो०)**
इति श्रुत्यादेशात् ।

"न कर्मणामनारम्भान्नैष्कर्म्य पुरुषोऽश्नुते ।
न च सन्यसनादेव सिद्धि समधिगच्छति" ॥ इति स्मृत्युपदेशाच्च कर्मकरणावश्यकत्वे स्थिते ज्ञानपूर्वक-कर्मजनिताना **भावनावासना**रूपाणा शुभाशुभसस्काराणा**मभिनिवेश**सज्ञकानामावरकत्वेना-विद्याबुद्धिविशेषतया तस्मिन्नन्तराये सति विद्याबुद्धेरात्मविद्याया सप्रयोगो न सभवति । तस्मादव्यय-विद्यायामञ्जसा विद्याबुद्धिप्रवेशाय **निवृत्त कर्म** द्वारमपेक्ष्यते । "प्रवृत्त च निवृत्त च द्विविध कर्म वैदिकम्" इति धर्म्माचार्य्य-मनूक्तयो कर्मणोर्मध्ये प्रवृत्तकर्मणा बन्धनात्मकत्वेनाभिनिवेशोत्पादकत्वेऽपि प्रवृत्तकर्म्मपरित्यागपूर्वक कृताना निवृत्तकर्मणामबन्धकत्वात् ।

"कुर्वन्नेवेह कर्माणि" "न करोति न लिप्यते"—इति सिद्धान्ताच्च निवृत्तकर्मणा अभिनिवेशानुत्पत्तौ आत्मविद्या—बुद्धिविद्यासयोगप्रतिबन्धकान्तरायानुपस्थानात् । अत एवेह धर्मविद्याया प्रवृत्तकर्म्मनिवृत्त-कर्मविवेकज्ञानसिद्धयर्थं नानाविधा गुणकर्मपरीक्षा विधीयन्ते । तथा चेहा**भिनिवेश**लक्षणाविद्याबुद्धि-विनाशाद**ात्मप्रसादो** धर्म्मबुद्धियोगसिद्धिलक्षणमिति विद्यात् ॥४॥ तदित्थ बुद्धियोगचतुष्टय भवति ॥

विद्याचतुष्टयी

मेय विद्याचतुष्टयी महाभारतयुद्धकालादप्यतिप्राचीना पुरा देवयुगे भिन्ने भिन्ने विदुषा समाजे पृथक्त्वेन प्रचरति स्म। तथा हि—

(१)—प्रथमा तावद् वैवस्वतमनुवशजाताना **राजर्षीणां** कुले विशिष्य प्रचरितासीत्। **राजर्षय** एव चैता वैराग्यविद्या पुरात्वे विशिष्यातिष्ठन्ते स्म। तस्मादिय **राजर्षिविद्या** नाम। **अथ योगशास्त्रे त्वेष बुद्धियोगो नाम योगो निष्ठीयते—इति भाव्यम्** ॥१॥

(२)—अथ द्वितीया कपिलादिसिद्धवशजाताना ज्ञानयोगाभिमानिना कुले भूयसा सप्रथितामीत्। सिद्धा एव चेता कर्म्मसन्यासलक्षणा सास्यापरपर्य्याया **ज्ञानयोगविद्या**मातिष्ठन्ते स्म। तस्मादिय **सिद्धविद्या** नाम ॥ अथ योगशास्त्रे पुनरय ज्ञानयोगो नाम योगो निष्ठीयते ॥२॥

(३)—अथ तृतीया पुनरनृपीणामेव राज्ञामीश्वरोपासनाभिमानिना निकाये समधिक प्रचारमागतागीत्। राजन्या एव च पुरात्वे विशेषतस्ता**मैश्वर्यविद्या**मातिष्ठन्ते स्म। तस्मादिय **राजविद्या** नाम ॥ अथ योगशास्त्रे पुनरयमुपासनायोगो वा भक्तियोगो वा नाम्ना योगो निष्ठीयते ॥३॥

(४)—अथ चतुर्थी तु ब्राह्मणाना कर्म्मयोगाभिमानिनामृपीणा धर्म्मेणैव सर्वार्थसिद्धि परिपश्यता समाजे प्रसिद्धासीत्। ब्राह्मणा एव च ऋषय पुरात्वे तामेता **धर्मविद्या**मातिष्ठन्ते स्म। तस्मादिय-**मार्षविद्या** नाम ॥ अथ योगशास्त्रे पुनरय कर्म्मयोगो नाम योगो निष्ठीयते ॥४॥

(श्रेष्ठा विद्या)

तत्र तावदिय **राजर्षिविद्या**नाम्नी **वैराग्यविद्या** सर्वाभ्योऽप्यन्याभ्यो ज्येष्ठा भवति, श्रेष्ठा च। अतिप्राचीने देवयुगे देवकुलजातेन विवस्वता प्रचारितत्वादतिप्राचीनत्वात्। राजर्षीणा मूलपुरुषाय तस्मै विवस्वते भगवतैव सर्वत पूर्वमुपदिष्टतया तस्या भगवदुपज्ञत्वाच्च। अपि च उत्तरासु तिसृषु विद्यासु भगवतोऽनुमतिमात्र न्यूनाधिक दृश्यते। प्रथमा तु भगवतैव सर्वत पूर्व विवस्वते मनो पित्रे समुपदिष्टासीदिति भगवत स्वमतमेवेद भवति।

"ये मे मतमिद नित्यमनुतिष्ठन्ति मानवा ।
श्रद्धावन्तोऽनसूयन्तो मुच्यन्ते तेऽपि कर्म्मभि ॥३।३१॥
ये त्वेतदभ्यसूयन्तो नानुतिष्ठन्ति मे मतम् ।
सर्वज्ञानविमूढास्तान् विद्धि नष्टानचेतस ॥"३।३२॥

इत्येव स्वमतत्वाभिमानात्। तस्मात् सर्वापेक्षयैतस्या श्रेष्ठत्वमुपपद्यते। अत एव चेय **राजर्षिविद्या भगवद्विद्या** चाख्यायते **सनातनविद्या** च। एतद्वैपरीत्येन तु द्वितीयस्या **सिद्धविद्याया**मत्यल्पा भगवतोऽनुमतिर्विज्ञायते—

"यततामपि सिद्धाना कश्चिन् मा वेत्ति तत्त्वत" इत्येव तत्र स्वानभिरुचे स्पष्ट प्रदर्शितत्वात् ॥

अथैतासा तिसृणामुत्तरविद्यानामतिप्राचीनत्वेऽपि पूर्वकाले तास्वासन्नेव केचिदनुपादेया अप्यशा। अवश्य च तत्तदनुपादेयाशपरित्यागपूर्वक तासामुपादेयत्वमादेष्टुमेतस्या गीताया तदुल्लेखपूर्वक भगवतैतास्तिस्रो विद्या स्वाभिमतोपादेयाशानुसारेण व्याख्याता इति विज्ञेयम्। तथा च तासा तत्तदनुपादेयाशान् परित्यज्य यावदिह गीतायामुपात्त तत्रावश्य भगवत पूर्णा समतिरस्तीति कृत्वा ता अप्येतास्तिस्रो विद्या अवश्यमुपादेया सन्तीति सुनिभृत प्रत्येतव्यम् ॥

(तालिका)

तत्र चैतासु भगवद्गीताप्रदर्शितासु चतुर्विधबुद्धियोगविद्यासु शास्त्रे **विद्या.—विद्यायामुपनिषद —उपनिषदि चोपदेशा —**इत्येव प्रकरणविभागा द्रष्टव्या । तथा च गीताशास्त्रे **चतस्रो विद्या, चतुर्विंशतिरुपनिषदः, षष्टिशत चोपदेशा** सन्तीति विज्ञेयम् । भगवतैव ता सर्वा उपनिषदो (४) — (२४) — (१६०) विभज्योपदिष्टा सन्तीनि कृत्वा शास्त्रप्रकरणान्ते—"**भगवद्गीतासूपनिषत्सु**"—इत्येव व्यपदेशा दृश्यन्ते ।

अथ गीतायामष्टौ प्रकरणविभागा भवन्ति । तेषु श्लोकैर्विभक्तेषु **प्रकरणेषु** भगवद्गीतानामुपनिषदा तदन्त सनिविष्टानामुपदेशाना च तालिका यथा—

(गीतासप्तशती—प्रकरणतालिका)

	८ प्रकरणानि	विद्यायामुपनिषद	उपनिषत्सूपदेशा	श्लोका	
१	ऐतिहासिकसन्दर्भे	०	०	५९	६४
२	चातुर्विद्यापक्रमे	१	२	५	
३	रागद्वेषक्लेशनिवर्तिकाया वैराग्यबुद्धियोगलक्षणाया राजर्षिविद्यायाम् ।	८	५०(७।७।७।३।३। ५।१।०)	२१६	६१४
४	मोहक्लेशनिवर्तिकाया ज्ञानबुद्धियोगलक्षणाया सिद्धविद्यायाम् ।	२	१९(१०।९)	५८	
५	अस्मिताक्लेशनिवर्तिकायामैश्वर्यबुद्धियोगलक्षणाया राजविद्यायाम् ।	३	३२(११।१५।६)	१५१	
६	अभिनिवेशक्लेशनिवर्तिकाया धर्म्मबुद्धियोगलक्षणायामार्षविद्यायाम् ।	७	४९(९।५।७।४। २०।२।२)	१८९	
७	चातुर्विद्योपसहारे	३	८(४।२।२)	१७ अ० श्लो० १८–(५७–७३)	
८	ऐतिहासिकसदर्भे	×	×	५ अ० श्लो० १८–(७४–७८)	
		(२४)	(१६०)	(७००)	

तत्र तावद् वैज्ञानिकोपनिषदः पृथक्कृत्य संगृह्यन्ते

(उपनिषदां तालिका)

विद्याचतुष्टयी गीता तत्रोपनिषद स्मृता ॥
एकाऽष्टौ द्वे च–तिस्रश्च–सप्त–तिस्र–इति क्रमात् ॥०॥
१ — ८–२ — ३ — ७ — ३
ता एताश्चतुर्विंशतिरुपनिषद पृथक्कृत्योपपादनीया । तद् यथा—
***ऐतिहासिकसदर्भे तावदुपनिषदो न सन्ति ।**

१. अथ चातुर्विद्योपक्रमे तावदेका उपनिषत्, द्वावुपदेशौ (२)

१ उत्थानिका (लोकवृत्तोपनिषत्)
[विश्वप्रकृतिसिद्धशोकसमुत्थान-प्रसङ्गोदाहरणरूपो बन्धुयुद्धप्रसङ्ग]

२. अथ राजर्षिविद्यायाम् अष्टौ उपनिषदः, पञ्चाशदुपदेशाः (५०)

१–लोकप्रसिद्धयो साख्ययोगनिष्ट्योर्ज्ञानयोगिना साख्यनिष्ठाया तावदनुशोकानौचित्यम् ।
[कर्म्मसन्यासलक्षणसाख्यनिष्ठाया ज्ञानयोगपक्षेऽपि कर्म्मत्यागानौचित्यम्] [सप्तोपदेशी ७]
२–बुद्धियोगिनामपि कर्म्मफलकामासक्तिपरित्यागौचित्यम् ।
[योगापरपर्य्याय-कर्म्मयोगपक्षे कर्म्मत्यागानौचित्यम्] [सप्तोपदेशी ७]
३–बुद्धियोगिन कर्म्मणामबन्धनत्वात् परित्यागानौचित्यम् ।
[कर्म्मसन्यासाभ्युपगमपक्षेऽपि नित्यकर्म्मत्यागानौचित्यम्] [सप्तोपदेशी ७]
४–बुद्धियोगप्रतिबन्धकदोषपरित्यागौचित्यम् ।
[कर्म्मारम्भाभ्युपगमपक्षेऽपि बुद्धियोगविरोधिकर्म्मत्यागौचित्यम्] [त्र्युपदेशी ३]
५–बुद्धियोगस्य भगवन्मतसिद्धसनातनत्वम् । [त्र्युपदेशी ३]
६–बुद्धियोगाविरोधिकर्म्मयोग-ज्ञानयोगोभयनिष्ठोपादेयत्वम् । [पञ्चोपदेशी ५]
७–बुद्धियोगस्य कामासक्तिसन्यासोपलक्षितकर्म्मारम्भलक्षणत्वात् कर्म्मयोग-ज्ञानयोगोभयात्मकत्त्वम् । [नवोपदेशी—९]
८–बुद्धियोगसाधनकर्म्मयोगोपादेयत्वम् [नवोपदेशी—९]

अथ सिद्धविद्यायाम् द्वे उपनिषदौ, ऊनविंशतिरुपदेशाः । (१९)

१–प्रकृतिपुरुषयोर्विवेकज्ञानम् । [दशोपदेशी—१०]
२–ब्रह्मकर्म्मणी[२], चतुरधिकरणम्[४], अहोरात्रौ[२], सर्गप्रलयौ[२], भक्तियोग[१], आत्म[१]गतिरिति द्वादश विज्ञानानि । [नवोपदेशी—९]

अथ राजविद्यायाम् तिस्र उपनिषदः, द्वात्रिंशदुपदेशाः । (३२)

१—ईश्वरस्वरूपज्ञानम् । [एकादशोपदेशी—११]
२—ईश्वरीय-योगविभूतिलक्षणविज्ञानद्वयम् । [पञ्चदशोपदेशी—१५]
३—ईश्वरोपासना । [षडुपदेशी—६]

अथ आर्षविद्यायाम् सप्त उपनिषदः, ऊनपञ्चाशदुपदेशाः (४९)

१—प्रकृति–पुरुषौ[२], क्षेत्र–क्षेत्रज्ञौ[२], ज्ञान–ज्ञेयौ[२]—इति षड्विज्ञानोपनिषत् । [नवोपदेशी ९]
२—सत्त्वरजस्तमोलक्षणत्रैगुण्योपनिषत् । [पञ्चोपदेशी ५]
३—अश्वत्थोपनिषत् । [सप्तोपदेशी ७]
४—दैवासुरसपत्तियुक्तभूतसर्गोपनिषत् । [चतुरुपदेशी ४]
५—गुणकर्म्मप्रचयोपनिषत् । [त्रिंशत्युपदेशी २०]
६ १४
गु० । कर्न० ।
६—अत्याज्यकर्म्मोपनिषत् ॥ [द्वयुपदेशी २]

७—अनावरणकर्म्मोपनिपत्, सैव च ब्रह्मभूतविदेहोपनिपत् [द्वचुपदेशी २]

अथ चातुर्विद्योपसंहारे तिस्र उपनिषदः, अष्टोपदेशाः—[८]

१—चातुर्विद्यसारोद्धार । [चतुरुपदेशी ४]
२—उद्धारोद्धार । [द्वचुपदेशी २]
३—गीताफलश्रुति । [द्वचुपदेशी २]

इति क्रमेण गीताया चातुर्विद्यविभागत ।
विद्योपनिपदो भिन्नाश्चतुर्विंशतिधेरिता ॥१॥
आसा विशिष्य व्याख्यानमुत्तरत्र भविष्यति ।
काण्डे तृतीये गीताया हृदये तत्र दृश्यताम् ॥२॥

(उपदेशतालिका)

अव्ययपुरुपलक्षणे जीवात्मनि चतुर्धा सभवता बुद्धियोगाना चतुर्विधा विद्या उपदिश्यन्ते, ता एताश्चतस्रो विद्या इद भगवद्गीता नाम शास्त्रम्। तासु च विद्यासु याश्चतुर्विंशतिरुपनिपदो विज्ञायन्ते, तत्र षष्टिशतमुपदेशा भवन्ति । तेषामत्र तालिका प्रदर्श्यते—

(१६०)

२ ७ ७ ७ ३ ३ ५ ९ ९ १० ९ ११ १५ ६ ९ ५
रथा साथ बली मेधा धनो धाप्यश्यते धम ।

७ ४ २० २ २ ४ १ ३
थो भू न्ना खर भूपाला उपदेशा क्रमादिह ॥१॥

---

*ऐतिहासिकसंदभ तावन्नोपदेशा सन्ति ।

---

(१) अथ चातुर्विद्योपक्रमे त्वेकस्यां लोकवृत्तोपनिषदि द्वौ उपदेशौ भवतः ।

(१) सग्रामोपलक्षणविधया प्राकृतिकशोकसमुत्थानप्रदर्शनम् ।
(२) स्वयसिद्धशोकव्युत्थानौपयिक-चतुर्विधबुद्धियोगविद्योपदेशोपक्रम ।

---

(१) अथ भगवद्विद्यायां ज्ञानयोगिनोऽनुशोकानौचित्योपनिषदि-सप्त उपदेशाः ।

(१) सर्वविधकर्म्मातीत-नित्यशुद्धबुद्धमुक्तासङ्गस्याव्ययात्मन शाश्वतिकतया शरीरपरिग्रह-परित्यागयो प्रवाहनित्यत्वादेकस्यैव तस्यात्मनोऽनेकदेहधारित्वस्वाभाव्यादनुशोकानौ-चित्यम् ॥१॥

(२) सति शरीरपरिग्रहे प्रज्ञामात्रा-प्राणमात्रा-भूतमात्रासंसर्गजनितस्य सुखदुःखादिप्रत्ययस्य नाप्राप्तत्वादोपसर्गिकत्वेनोपेक्ष्यत्वाच्चानुशोकानौचित्यम् । तथा च दीर्घकालादरनैरन्तर्य्यकृतादनुशोकोपेक्षणादनुशोकानुत्पत्तिस्वभावे सिद्धे सुखदुःख-द्वन्द्वसमत्वानुभाविना निर्द्वन्द्वाना भूतात्मनामव्ययात्मन्यविद्याया प्रसक्तिर्नास्तीत्यमृतत्वमपत्ति ॥२॥

(३) देहभृत्यव्ययात्मनि देहसबन्धेन सत्यपि सदसद्द्वन्द्वे असत शरीरादे कार्य्यस्य सत्त्वम्, सतस्तु कारणस्यात्मनोऽसत्त्वमनुपपन्नमिति विज्ञानसिद्धान्तादस्य विकुर्वाणविनश्वरशरीरयोगिनोऽप्यव्ययात्मनो नित्यनिर्विकारत्वादविनाशित्वाच्चानुशोकानौचित्यम् ॥३॥

(४) विनश्वरशरीरयोगिनोऽस्याव्ययस्यागन्तुकशरीरसापेक्ष जन्ममृत्युद्वन्द्वसाहित्येऽपि स्वरूपतो जन्ममृत्युद्वन्द्वराहित्यात् शात्महननासभवादनुशोकानौचित्यम् । अपि चैतस्मिन्नव्यये नित्ययुक्तस्य प्रकृतिभूतस्य महतोऽक्षरात्मनो मूर्तियोनित्वस्वाभाव्यात् शरीरविधरणपरित्यागलक्षणस्य जन्ममरणद्वन्द्वस्य पौन पुनिकत्वनियमादनुशोकानौचित्यम् ॥४॥

(५) अपि चैतस्याव्ययात्मन पञ्चभूतगुणाननुस्पृष्टत्वेन विनाशासभवादनुशोकानौचित्यम् ॥५॥

(६) जन्ममरणवति भोक्तरि कर्म्मात्मनि जन्ममरणद्वन्द्वस्य प्रवाहनित्यत्वादपरिहार्य्यत्वाच्चानुशोकानौचित्यम् ॥६॥

(७) नित्यानित्ययोरसङ्गसङ्गिनोरात्मशरीरयो सबन्धस्यानिर्वचनीयत्वादाश्चर्य्यमयत्वेऽप्यात्माऽवध्यत्वसिद्धान्तादनुशोकानौचित्यम् ॥७॥

---

(२) अथ बुद्धियोगिनः कर्म्मफलकामासक्तिपरित्यागौचित्योपनिषदि सप्त उपदेशाः ।

१—बुद्धियोगाविरुद्धज्ञानयोगोपदेशानन्तर विवक्षितस्य व्यवसायबुद्धिसमुच्चितकर्म्मयोगलक्षणस्य बुद्धियोगस्य प्रशसा ॥१॥

२—बुद्धियोगपरिपन्थिनस्तु कर्म्मयोगस्य वैदिकस्यापि व्यवसायबुद्धिव्यतिरेकादनन्तशाखाविभक्तस्यैहिकामुष्मिकफलभोगौपयिकस्य त्रैगुण्यविषयप्रवृत्तिलक्षणतया कामाकुलत्वाद् दुःखानुविधायित्वम्, सान्तसातिशयफलत्वात् तुच्छत्व च ॥२॥

३—कर्म्मफलवासनाया आसक्तिहेतुतया बन्धकत्वाद् सकामकर्म्मयोगस्य दुःखानुविधायित्वम् ॥ कर्म्मापरित्यागफलवासनापरित्यागाभ्यामुपलक्षितस्यानासक्तिलक्षणस्य कर्म्मयोगस्य बुद्धियोगसमर्थकतया दुःखासभिन्ननित्यनिरतिशयफलौपयिकत्वाच्छ्रेयस्त्वम् ॥३॥

४—स्थितप्रज्ञतालक्षणाया मोहव्यतितीर्णाया बुद्धेर्बुद्धियोगसिद्धचुपायत्वम् ॥ अज्ञानावृतज्ञान—जनिताया उत्थाप्याकाङ्क्षाया मनसि निर्वेदस्य बुद्धियोगसिद्धचुपायत्वम् ॥

५—वैराग्यलक्षणबुद्धियोगस्वरूपसपत्तिरूपाया स्थितप्रज्ञताया लक्षणोपदेश ॥५॥

६—विषयानुध्यानजनिताया वासनाया आसक्तिहेतुत्वाद् बुद्धियोगप्रतिबन्धकत्वमस्तीति बुद्धियोगस्वरूपव्यापत्तिरूपाया आसक्तेर्लक्षणोपदेश ॥६॥

७—रागद्वेषशून्यैरिन्द्रियैर्विषयग्रहणमासक्तिहेतुर्न भवतीति बुद्धचावरणवासनानुदयाद् बुद्धिप्रसादे बुद्धियोगसिद्धि । बुद्धियोगस्य कषायानुदयान्निर्म्मलबुद्धिरूपतया ब्रह्मस्थितिरूपत्वम् ॥७॥

---

(३) अथ बुद्धियोगिनः कर्म्मणामबन्धकत्वात् परित्यागानौचित्योपनिषदि सप्त उपदेशाः ।

१—सिद्धान्तरूपेण बुद्धियोगमतस्थापनार्थ कर्म्मयोग-कर्म्मसन्यासयो श्रेयस्त्वाश्रेयस्त्वपरीक्षारम्भ ॥१॥

२—नैष्कर्म्योपायत्वात्[१], कर्म्मसन्यासवैयर्थ्यात्[२], कर्म्मपरित्यागाशक्यत्वात्[३], प्रकृतिसिद्धत्वाद्[४], अनासक्तकर्म्म[५]योगवैशेष्यात् [६]कर्म्मारम्भकर्म्मसन्यासयो कर्म्मारम्भस्य श्रैष्ठ्यात्, जीवनयात्रानिर्वाह्[७]कत्वाच्च, नाप्राप्तस्य कर्म्मणोऽनिवार्य्यत्वात् कर्म्मपरित्यागानौचित्यम् ॥२॥

३—यज्ञार्थकर्म्मणामनासक्तिकृतत्वादबन्धनत्वादवश्यकर्तव्यत्वम् । तथा चेतस्य यज्ञकर्म्मणोऽवश्य—कर्तव्यत्वादबन्धनत्वाच्च परित्यागानौचित्यम् ॥३॥

४—उपेक्षाबुद्धिसहकृतकर्मणामनासक्तिकृतत्वादबन्धनत्वाददुष्टत्वम् । आत्मारामस्यात्मपरायणस्य विषयानासक्तस्य वहिर्लोकयात्रायामुपेक्षाबुद्धौ अपेक्षाबुद्धिमूलकसस्कारोदयासभवादबन्धनस्यात्मज्ञानौपयिकस्य कर्म्मण परित्यागानौचित्यम् ॥४॥

५—विद्वत्पामराद्युच्चावचसर्वविधलोकस्थितिनिर्वाहो लोकसग्रह । लोकसग्रहकर्तव्यतादृष्ट्या कृतस्य कर्म्मणोऽनासक्तिहेतुत्वादबन्धकत्वात् परित्यागानोचित्यम् ॥५॥

६—आत्मातिरिक्तायां आत्मप्रकृते कर्म्माधिष्ठानत्वमध्यवस्यता ममत्वराहित्यात्कर्म्मफलानुसन्धानराहित्यात् कर्तृत्वानभिमानाच्चात्मन कर्म्मण्यासक्तिबन्धनमपश्यता स्वभावसिद्धसहजकर्म्मण परित्यागानौचित्यम् ॥६॥

७—कर्म्मपरित्यागानौचित्यस्य भागवतमतत्वप्रतिज्ञानम् ॥७॥

---

(४) अथ बुद्धियोगिनो बुद्धियोगप्रतिबन्धकदोषपरित्यागौचित्योपनिषदि त्रय उपदेशा. ।

१—इन्द्रियधर्म्मत्वादनात्मधर्म्मयो प्रकृत्यधिष्ठानयो रागद्वेषयोरासक्तिहेतुत्वाद् बुद्धियोगपरिपन्थित्वम् ॥१॥

२—रागद्वेषात्मकयो कामक्रोधयोरिन्द्रियमनोबुद्धयधिष्ठानयोर्बुद्धिद्वारा प्रत्यगात्मावरणत्वादात्मविद्रूपकत्वाच्चात्मनि तत्पारवश्य भवतीत्यनिष्टकर्म्माचरणे तदात्मन प्रवृत्ति ॥२॥

३—इन्द्रियमनोबुद्धिनिग्रहणस्यैव कामक्रोधविजयोपायत्वादात्मनि कामक्रोधासक्तिनिवर्तकत्वम् ॥३॥

---

(५) अथ बुद्धियोगस्य भगवन्मतसिद्धसनातनत्वोपनिषदि त्रय उपदेशाः ।

१—भगवन्मतसिद्धस्य वैराग्यौपयिकसमत्वलक्षणबुद्धियोगस्य ज्ञानयोगकर्म्मयोगाभ्यामतिप्राचीनत्वेन राजर्षिपरम्परोपदेशसिद्धत्वात् सनातनधर्म्मत्वम् ॥१॥

२—बुद्धियोगविद्योपदेष्टु कृष्णवासुदेवस्यानेकजन्मग्राहित्वम्, अच्युतभगवत्त्वाज्जातिस्मरत्व च ॥२॥

३—जीवाव्ययस्य परमाव्ययैकीभावे प्रतिपन्ने ससृतिकर्म्मनाशेन जन्ममृत्युबन्धविनिर्मुक्तत्वमिति सिद्धान्तादस्य कृष्णस्य साक्षात्परमाव्ययपुरुषतया पुनर्जन्मासभवेऽपि विश्वाधिकार-सबन्धेनाधिकारिकत्वात् सति निमित्तविशेषे स्वेच्छयाऽनेकजन्मग्राहित्वम् ॥ "यावदधिकार-मवस्थितिराधिकारिकाणाम्"इति वैयासिकसूत्रन्यायात् ॥३॥

---

(६) अथ बुद्धियोगाविरोधि-कर्म्मयोग-ज्ञानयोगोपादेयतोपनिषदि पञ्च उपदेशाः ।

१—ज्ञानयोगस्य, भक्तियोगस्य, कर्म्मयोगस्य वा, अव्यक्तोपासनायास्तत्तद्देवतोपासनाना वा, सर्वविधकर्म्मणामव्ययाश्रयादेव फलसिद्धि ॥१॥

२—अव्ययस्यात्मनस्तत्तत्कर्म्मसु निर्लिप्तत्व विजानद्भिश्चतुर्भिर्वर्णै स्वधर्म्मबुद्धचा कृताना स्वकर्म्मणा बन्धकत्वाभाव ॥२॥

३—क्षोभरूपस्य तमोलक्षणस्य कर्म्मण, तथा शान्तिरूपतया प्रकाशलक्षणाया विद्यायाश्चान्योन्य-मन्तरान्तरीभाव विजानता कृताना विद्यासमुच्चितकर्म्मणा विद्याप्रभावाद् बन्धकत्वाभाव । ज्ञानानुस्यूतस्य निवृत्तकर्मणो ज्ञानाग्निदग्धत्वात् सस्काराजनकत्वेनाबन्धनत्वम् ॥३॥ इति कर्म्मयोगोपादेयता ॥

४—अबन्धकत्वेनोक्तानि यज्ञार्थककर्म्माणि उदाहरणविधया त्रयोदशविधानि प्रदर्श्यन्ते ॥ ब्रह्मार्पण-यज्ञ ॥१॥ दैवयज्ञ ॥२॥ ब्रह्माग्नियज्ञ ॥३॥ सयमाग्नियज्ञ ॥४॥ इन्द्रियाग्नियज्ञ ॥५॥ योगाग्नियज्ञ ॥६॥ द्रव्ययज्ञ ॥७॥ तपोयज्ञ ॥८॥ योगयज्ञ ॥९॥ स्वाध्याययज्ञ ॥१०॥ ज्ञानयज्ञ ॥११॥ प्राणायामयज्ञ ॥१२॥ प्राणयज्ञ ॥१३॥ इति ज्ञानयोगसमुच्चितकर्म्मयोगोपा-देयता ॥

५—सर्वविधयज्ञापेक्षया कर्म्मबन्धक्षयलक्षणस्य ज्ञानयज्ञस्य श्रेष्ठत्वम् ॥ इति ज्ञानयज्ञोपादेयता ॥

---

(७) अथ बुद्धियोगस्य कामासक्तिसंन्यासोपलक्षितकर्मारम्भलक्षणत्वात् कर्म्मयोगज्ञानयोगोभयात्मकत्वोपनिषदि नव उपदेशाः ।

१—पूर्व कर्म्मपरित्यागानोचित्याख्यानेन कर्म्मयोगोपदेशादिदानी ज्ञानयज्ञश्रेष्ठत्वाख्यानेन कर्म्म-सन्यासोपदेशात् सशये प्रश्न ॥१॥

२—कर्म्मयोगकर्म्मसन्यासयो प्रत्येकस्य गुणदोषदर्शनादुभयो समुच्चये विवक्षिते कर्म्मयोगस्यैव कामसन्यास-फलाभिसन्धिसन्यासासक्तिसन्यासेभ्य सन्यासलक्षणज्ञानयोगत्वोपपत्या तयोर्भि-न्नयोरप्यभिन्नत्वमास्थीयते । तथा च ज्ञानकर्म्मणो समुच्चयादेकत्वेन भावितस्य बुद्धियोगस्य ज्ञानयोगत्व च कर्म्मयोगत्व चेति कृत्वा तादृशबुद्धियोगिन प्रत्यगात्मनो लक्षणमन्वाख्यायते॥२॥

३—नित्यशुद्धबुद्धमुक्तस्वभावस्यात्मनोऽव्ययस्य सोपसर्गानुपसर्गावस्थयो ससारनिस्तारावस्थयो-श्चैकरसत्वम् ॥३॥

४—बाह्यविषयसयोगसुखापेक्षया आत्मारामान्त सुखस्य नित्यशान्तैकरसत्वात् प्राशस्त्यम् ॥४॥

५—आत्मज्ञानेन सर्वकर्म्मपरिक्षयात् कर्म्मजनितसर्वद्वैतनिवर्तनाच्च ब्रह्मकैवल्यसिद्धिरित्यतस्तस्यात्म-ज्ञानिनोऽन्तरारामत्वम् ॥ निवृत्तरागद्वेषाणा विजितात्मनामन्तर्ज्योतिष्ट्वादन्तरारामत्वम् ॥५॥

६—परमशान्त्युपायभूताया आत्मज्ञानसिद्धेरुपायभूताया योगाभ्यासप्रक्रियाया निष्णातस्य सर्व-दुःखोपशमलक्षणशान्तिसिद्धि ॥६॥

७—सर्वविधकर्म्मैकान्तपरित्यागस्यासभवेन नैष्कर्म्यज्ञानयोगस्याशक्योदयत्वात्कर्मयोग एवोपादेयो न ज्ञानयोग इत्येके ॥ कर्म्मयोगस्य रजस्तमोगुणयोगेन बन्धनहेतुत्वात् कर्म्मसन्यासलक्षणो ज्ञानयोग एवोपादेयो न कर्म्मयोग इत्यपरे ॥ इत्थ विरुद्धद्वैविध्ये कर्म्मफलाभिसन्धिसन्यासेन सन्यासलक्षणज्ञानयोगव्यामिश्रितो निष्कामनिरासक्तिकृतकर्म्मयोगलक्षणो बुद्धियोग एवोपादेय इति सिद्धान्त ॥७॥

८—ज्ञानयोगेनात्मविजयस्य परमपुरुषार्थत्वादजितात्मना कृतस्य कामसकल्पमयस्य कर्म्मयोगस्य दुःखानुविधायित्वम् ॥८॥

९—कर्म्मयोगेन कर्म्मनिष्ठस्यापि ज्ञानयोगेन जितात्मन सर्वत्र समबुद्धित्वमुदेतीति समत्वलक्षण-बुद्धियोगोदयोपयिकत्वात् तस्य समबुद्धित्वस्य प्राशस्त्यम् ॥९॥

---

(८) अथ बुद्धियोगसाधनकर्म्मयोगोपादेयत्वोपनिषदि नव उपदेशाः ।

१—बुद्धियोगसिद्ध्युपायभूत योगाभ्यासमाधनम् ॥१॥

२—योगाभ्याससाधने सावकबाधकौ ॥२॥

३—बुद्धियोगसिद्धिलक्षणम् ॥३॥

४—बुद्धियोगस्वरूपलक्षणम् ॥४॥

५—बुद्धियोगसिद्धये योगाभ्यासानुष्ठानक्रम ॥५॥

६—बुद्धियोगसाधने समतानुध्यानाभ्यासक्रम ॥६॥

७—बुद्धियोगसिद्ध्यौपयिकमन स्थिरतोपाये प्रश्नसमाधाने ॥७॥

८—दैवाद् योगभ्रष्टस्योदर्कात्यानम् ॥८॥

९—कर्म्मयोगि-तपोयोगि-ज्ञानयोगिभ्यो बुद्धियोगिनोऽभ्यर्हितत्वम् ।
बुद्धियोगिनोऽपि सामान्यभावुकापेक्षया श्रद्धावत श्रेष्ठत्वम् ॥९॥

---

(९) प्रकृतिपुरुषविवेकज्ञानोपनिषदि दशोपदेशा·

१—योगविशुद्धेनान्त करणेन सर्वजगदाधारस्यैकस्याव्ययस्य साक्षात्काराय ज्ञानविज्ञानोपदेशोपक्रम ॥१॥

२—पुरुषस्याव्ययस्य परापरभेदात् प्रकृतिद्वैविध्यम् ॥२॥

३—प्रकृतिविशिष्टस्याव्ययपुरुषस्यैतदशेपजगद्भावभावित्वम् ॥३॥

४—एकस्यैवाव्ययपुरुषस्य परापरप्रकृतिवशाद् विभिन्नरूपत्वे पञ्चदशोदाहरणानि ॥४॥

५—पुरुषप्रकृतिभूतस्य महतो गुणत्रयसमष्टिरूपतया गुणत्रयभेदात् त्रिधा भिन्नाना जगद्भावानामव्ययप्रकृतिसिद्धत्वादव्ययनिष्ठत्वम् ॥५॥

६—गुणत्रयव्यतिरिक्तस्य गुणत्रयालम्बनस्यापरिणामिनो विशुद्धस्याव्ययपुरुषस्य त्रैगुण्यात्मकमायाप्रच्छन्नत्वात् तादृशगुणत्रयात्मकमायाप्रत्यन्तरितदृष्टिभिरासुरप्रकृतिभिर्दुष्कृतिभिरभास्यत्वम् । त्रैगुण्यात्मकमायावृत्तिप्राबल्येन ज्ञानसवरणाद् ज्ञानमालिन्याद्वा तदव्ययस्या-

त्मनोऽप्रतिपत्तावपि तदव्ययार्पितमनोबुद्धचभ्यासप्रावल्येन ज्ञानविकासाद् ज्ञानवैमल्याद्वा तदव्ययात्मप्रकाशसभव ॥६॥

७—अस्याव्ययपुरुषस्याराधनायाम्—आर्त—धनार्थि—जिज्ञासु—ज्ञानिना चतुण सुकृतिना निसर्गत प्रवृत्तिमत्त्वम् । तेषु ज्ञानिना श्रेष्ठतमत्वम् । ज्ञानात्मकत्वेनैवाव्ययस्य निर्द्धारितत्वाज् ज्ञानिनामव्ययसाक्षात्कारे सनिकर्षेण सौलभ्यात् ॥७॥

८—महत्यव्ययचिदाभासस्य सत्त्वगुणतया सात्त्विकाना प्रतिबिम्बिताव्ययचिन्मयप्राणवतीष्वव्ययावलम्बितक्षराक्षरात्मिकासु विभिन्नतत्तद्देवतासूपासकाना तत्तद्देवताद्वारा परम्परया तदव्ययपुरुषप्रपत्तावपि साक्षादव्ययप्रपत्त्यपेक्षया मन्दफलावगाहित्वम् ॥८॥

९—योगमायापहृतज्ञानतया साक्षादव्यय पुरुषमनवगाहमानानामबुद्धीनामक्षराव्ययालम्बितक्षराक्षरात्मकदेवतामात्रोपासनाप्रवणत्वम् ॥९॥

१०—रागद्वेषद्वन्द्वमोहेन समोह गतानामव्ययाक्षरद्वन्द्वाविवेकात् केवलमेकमक्षरमेव प्रतिपद्यमानाना भूतभविष्यद्वर्तमानसर्वविधज्ञानजनकैतदव्ययपुरुषप्रतिपत्तिर्नोपपद्यते ॥ पुण्यकर्म्मणा तु निष्कल्मपाणा रागद्वेषद्वन्द्वमोहापक्षयेऽव्ययात्मसाक्षात्कारसभवात् तत्प्रभावात् त्रिकालदर्शित्वसभव ॥१०॥

---

(२) ब्रह्मकर्म्मणो[२]-चतुरधिकरणम्[४]-अहोरात्रौ[२]-सर्गप्रलयौ[२]-भक्तियोगः[१]-आत्मगतिरिति द्वादशविज्ञानोपनिषदि नव उपदेशाः ।

१—अव्ययोपासकस्य ज्ञानिनोऽव्ययार्पितमनोबुद्धिप्रभावादक्षरक्षरविकारेष्वेतेषु जगद्भावेषु ब्रह्मकर्म्मणोस्तदुभययोगसिद्धस्य चाधिकरणचतुष्टयस्य देहावसाने परात्मन्यवरात्मगतेश्च विज्ञानसिद्धि । अव्ययार्पितमनोबुद्धीना योगिना मनोबुद्धचोर्याविदव्यय कामचारोपपत्ते ॥१॥

२—ब्रह्मकर्म्मणोरधिकरणचतुष्टयस्य च तावत्स्वरूपविज्ञाने प्रश्नाना सक्षिप्य समाधानानि ॥२॥

३—गतिविज्ञानसमाधानाय तु सद्योमुक्ति,क्रममुक्ति,लोकयातायाताना विज्ञानेषु क्रमश प्रतिपादनीयेषु प्रथम तावत् सद्योमुक्तिलक्षणपरमगतेश्चतुर्धा व्युत्पादनम् ॥ तथा हि "अन्ते मति सा गति" इति सिद्धान्तादव्ययार्पितमनोबुद्धीना देहावसानकालेऽव्ययचिरानुभवाहितसस्कारद्वाराऽव्ययानुगमादपुनरावृत्ति ॥३॥

४—अपि च देहावसानकाले योगाभ्यासप्रक्रिययाऽव्ययैकाग्रसमर्पितमनसाऽनुचिन्तयत शरीरत्यागेऽव्ययप्रतिष्ठितत्वादपुनरावृत्ति ॥४॥

५—अपि च—योगमार्गेणाव्ययोपासिनाम्—ओमित्येकाक्षरोच्चारणपूर्वक तदनुस्मृतिमात्रपूर्वक वा शरीर त्यजताम् ओमितिशब्दाक्षरोपस्थापितब्रह्माक्षरसेतुद्वाराऽव्ययपरिनिष्ठानादपुनरावृत्ति ॥५॥

६—अपि च—अनन्यचेतसाऽहर्निशमव्ययमनुचिन्तयता जन्ममृत्युप्रवाहप्रयोजकहृद्ग्रन्थिबन्धविनिर्मोकाद् विदेहभूतस्य देहावसानेऽव्ययसायुज्यसपत्तेरपुनरावृत्ति ॥६॥

७—अव्यक्तात्मक्षरपर्य्यवसायिना सर्वेषा भूतविकाराणामात्मानुबन्धिभ्या विद्या[२]कर्म्म[१]भ्या पुनरावृत्त्यपुनरावृत्तिभाक्त्व ब्रह्माहोरात्रनिबन्धनसृष्टिप्रलयभाक्त्व च ।

८—अव्यक्तात्मक्षरमात्रपर्य्यवसायिना भूतात्मना पुनरावर्तित्वेऽपि तदव्यक्तक्षरात्परयोरव्यक्तयोरक्षराव्ययोर्निर्विकारामृतरूपत्वात् तदनुगताना भूतात्मनामपुनरावर्त्तितया परमा गति ।

९—कर्म्मजनितवासनासस्कारावच्छिन्नस्य चिदाभासरूपस्य प्रत्यगात्मनो विद्याकर्म्ममयतया तदुभयतारतम्योपपन्नाभ्या देवयानपितृयाणसज्ञाभ्या शुल्ककृष्णाभ्या मार्गाभ्या गति कुर्वतो विद्यातिशय्ये क्रममुक्तिसिद्धेरपुनरावृत्ति ॥
कर्म्मप्रावल्ये तु कर्म्ममार्गेण कृष्णेन पितृयाणेन गमनात् पुनरावृत्ति ॥९॥

---

(१) ईश्वरस्वरूपज्ञानोपनिषदि एकादशोपदेशाः ।

१—अव्ययसाक्षात्कारौपयिकयो कयोश्चिज्ज्ञानविज्ञानयो पुरातने राजवर्गैराविष्कृतत्वात् तैरद्य यावन्निगूहितत्वाच्च गुह्यराजविद्यात्वम् ॥१॥

२—भूतग्रामैरसङ्गिनोऽप्यस्याव्ययपुरुषस्य व्यक्ताव्यक्तप्रकृतिविकारविशेषे भूतग्रामेऽभिमानित्वेनानुस्यूतत्वाद् भूतसर्जनायाक्षरनियोजकत्वाच्च सर्वभूतस्रष्टृत्व सर्वभूताधिष्ठानत्व सर्वभूतपरायणत्व च प्रकृत्यैवोपपद्यन्ते ॥२॥

३—मोहाकुलितासुरप्रकृतीना मूढाना मनुष्यशरीरस्थेऽस्मिन् सर्वभूतमहेश्वरेऽनन्तशक्तिमति अव्यये प्रतिपत्यभावात्तदवज्ञानाज्ज्ञानवैकल्य चेष्टावैफल्य नैराश्य वैचित्त्य चोपजायते ॥३॥

४—देवप्रकृतिमता तु विशुद्धान्त करणाना महात्मना दैव्या प्रकृत्याऽवभासितेऽस्मिन्नव्यये क्षराक्षरविकारवैशिष्ट्येन नानात्वबुद्धया तदुपहितत्वेन त्वेकत्वबुद्धया प्रतिपत्तिसभवाज्ज्ञानयज्ञादिभिरनेकधोपासनार्थ प्रवृत्ति ॥४॥

५—यज्ञारम्भकाणा यज्ञैकत्ववत्, भिन्नसबन्धाना पुरुषैकत्ववत्, वेदविभक्तीना वेदैकत्ववत्, प्रकृतिविकाराणा प्रकृत्यैकत्वेनैकस्यैवेश्वराव्ययस्य सर्वत्रोपासना ॥५॥

६—द्वादशलक्षणत्वेनैकस्याव्ययस्योपासना ॥६॥

७—विरुद्धाविरुद्धसर्वद्वन्द्वसाधारणत्वेनैकस्यैवेश्वराव्ययस्य सर्वत्रोपासना ॥७॥

८—ऐहिकामुष्मिकोन्नतिमिच्छद्भिस्त्रैविद्यै कर्म्मयोगिभिस्त्रिकालज्ञमीश्वरमेव कर्म्मसाक्षिणमास्थाय कृतेन यज्ञकर्म्मणा ईश्वराव्ययोपासना ॥८॥

९—अन्यभक्ताव्ययभक्तयोरन्ययाज्यव्ययया जिनो सर्वविधसर्वोपासनानामव्ययैकपर्य्यवसायित्वेऽपि सर्वयज्ञभोक्तृतमैतदव्ययया थार्थ्यानभिज्ञाना देवपितृभूतादियाजिना देवपितृभूतादिमात्रस्थानावगाहित्वमुपपद्यते, न त्वेवत्वव्ययपरमधामावगाहित्व सभाव्यते। "यथाक्रतुरत्रोपास्ते, **तथाऽमुत्र सपद्यते**"—इति श्रौतसिद्धान्तात् ॥९॥

१०—सर्वकर्म्मार्पणभक्तियोगेनाव्ययोपासनाया कर्म्मबन्धनिवर्तकत्वम् ॥१०॥

११—निर्गुणविद्योपासकाना ज्ञानयोगिना विशुद्धैकाव्ययानन्यभक्तिमाहात्म्यम् ॥११॥

---

(२) ईश्वरीय—योग-विभूतिलक्षण विज्ञानद्वयोपनिषदि पञ्चदशोपदेशाः ।

१—भूताभिमानिनोऽव्ययस्य यौ विभूतियोगौ, तयोर्ज्ञानस्य यत्नसाध्यत्व सर्वपापप्रणाशकत्व च ॥१॥

२—अव्ययायोगानुभाविता अध्यात्म मानसा स्वभावविशेषा ॥२॥

३—अव्ययायोगानुभाविता अधिदैवत मानसा दिव्यभावविशेषा ॥३॥

४—अव्ययस्य वक्ष्यमाणाया विभूते कथितस्य च योगस्य सवेदनफलश्रुति ॥४॥

५—अव्ययसाक्षात्कारौपयिकस्य बुद्धियोगस्य प्राप्तेरुपायभूता वृत्तय ॥५॥

६—अव्ययात्मनो दिव्यविभूतिजिज्ञासया प्रश्न ॥६॥
७—अव्ययस्य दिव्यविभूतिप्रदर्शनोदाहरणानि ॥७॥
८—अर्जुनस्याव्ययवैश्वरूप्यदर्शनाकाङ्क्षा ॥८॥
९—विश्वरूपदर्शनाय भगवतार्जुनाय योगविद्याप्रभावेण दिव्यचक्षुष प्रदानम् ॥९॥
१०—वासुदेवशारीरकाव्यये योगविद्याप्रभावादीश्वराव्ययविश्वरूपदर्शनम् ॥१०॥
११—अर्जुनकृता ईश्वराव्ययस्तुति ॥११॥
१२—अर्जुन प्रति भगवदनुग्रहवाक्यम् ॥१२॥
१३—पुनरर्जुनकृता भगवत्प्रार्थनास्तुति ॥१३॥
१४—पुनरर्जुन प्रति भगवदनुग्रहवाक्यम् ॥१४॥
१५—ईश्वरवैश्वरूप्यप्रदर्शनोत्तर पुनर्मानुषरूपप्रदर्शने अर्जुनाश्वासनार्थ कृष्णार्जुनसवाद ॥१५॥

---

(३) ईश्वरस्योपासनोपनिषदि षडुपदेशाः ।

१—अव्ययोपासनाऽक्षरोपासनयोर्विवेकजिज्ञासा ॥१॥
२—अक्षरोपासनापेक्षया अव्ययोपासनाया श्रेष्ठत्वे भगवत्सममति ॥२॥
३—अक्षरोपासनाया अव्ययप्रापकत्वेऽपि अव्ययापेक्षया अक्षरोपासनाया क्लेशाधिक्यादवरत्वम् ॥३॥
४—अक्षरापेक्षया सर्वकर्म्मार्पणरूपेश्वराव्ययोपासनाया अनायासेनाविलम्बेन च परमपुरुषार्थप्रदायित्वाच्छ्रेयस्त्वम् ॥४॥
५—अव्ययोपासनाऽनुकल्पप्रकारचतुष्टयविकल्पेषु अभ्यास-ज्ञान-ध्यान-फलत्यागेपूत्तरोत्तरश्रेयस्त्वम् ॥५॥
६—अव्ययात्मन परमप्रसादे हेतुभूता भक्तिप्रकारा ॥६॥

---

(१) प्रकृति-पुरुषौ, क्षेत्र-क्षेत्रज्ञौ, ज्ञान-ज्ञेयौ,-इति षड्विज्ञानोपनिषदि नव उपदेशाः ।

(१) प्रकृतिपुरुषयो, क्षेत्रक्षेत्रज्ञयो, ज्ञानज्ञेययोश्च त्रिविधयोरात्मद्वन्द्वयो स्वरूपज्ञानार्था षट् प्रश्ना ॥१॥
(२) क्षेत्रक्षेत्रज्ञयोर्भूतग्रामविज्ञानात्मनो शरीरशारीरकयोर्विवेकलक्षण ज्ञानम् ॥२॥
(३) अष्टपुरीलक्षणक्षेत्रनिरुक्ति ॥३॥
(४) क्षेत्रक्षेत्रज्ञविवेकज्ञानजन्यविंशतिलक्षणज्ञाननिरुक्ति ॥४॥
(५) सर्वाधारभूतपरब्रह्माव्ययपुरुषलक्षणज्ञेयनिरुक्ति ॥५॥
(६) सर्वविधविकारग्रामसमुद्भावकत्रैगुण्यलक्षणप्रकृतिसज्ञस्य कर्म्मण, सर्वविधविकारगुणग्रामाधारभूतनिष्क्रियत्वनैर्गुण्यलक्षणपुरुषसज्ञस्य ब्रह्मण परस्परोपयोगाभिज्ञानम् ॥६॥
(७) मृत्युनिस्तारकपुरुषोपासनाभेदा ॥७॥
(८) प्राणिमात्रस्य क्षेत्रक्षेत्रज्ञसयोगोपाधिकत्वम् ॥८॥
(९) क्षेत्रस्थितस्य परमेश्वरस्य, ईश्वरस्य, परमात्मनो विज्ञानात्मनश्च क्षेत्रात् पृथक्त्वेन दर्शनमात्मसाक्षात्कारलक्षण पुरुषार्थ ॥९॥

---

(२) सत्त्वरजस्तमोलक्षणत्रैगुण्योपनिषदि पञ्च उपदेशाः ।

१—क्षेत्रज्ञे विशेषाधायकस्य गुणत्रयसमष्टिरूपस्य प्रकृतिभूतस्य महतो ब्रह्मण सर्वभूतयोनित्वम् ॥१॥
२—गुणत्रयस्वरूपनिरूपणम् ॥२॥
३—गुणातीतस्य विदेहात्मनो लक्षणम् ॥३॥
४—जीवाव्ययकैवल्योपासनया ईश्वराव्ययकैवल्यसायुज्यसिद्धौ सर्वगुणात्ययाद् गुणातीतत्वसिद्धि ।
५—सृष्टम्, प्रविष्टम्, प्रविविक्तमितीत्थ ब्रह्मत्रैविध्ये गुणत्रयातीतस्येश्वराव्ययस्य सर्वजीवसम्बन्धि-निर्विशेषपरात्परपुरुषत्रयसाधारणप्रतिष्ठात्वम् ॥५॥

---

(३) अश्वत्थोपनिषदि सप्तोपदेशाः ।

१—ब्रह्माश्वत्थ-कर्म्माश्वत्थभेदादश्वत्थद्वैविध्येऽपि ब्रह्मकर्म्मणोरपृथक्त्वेनाश्वत्थयोरपृथक्त्वादेकस्य कर्म्माश्वत्थस्यैव त्रैगुण्योपपन्नकर्म्मप्रपञ्चमयवैश्वरूप्यस्याद्वोपलभ्यमानतया त निरस्य तदा-लम्बनभूते हेयप्रत्यनीके जगदीश्वरनाम्नि परमाव्यये ब्रह्माश्वत्थेऽभिनिवेशायोपदेश ॥१॥
२—गुणकर्म्मप्रपञ्चोपाधिशून्यस्य विशुद्धस्य ब्रह्माश्वत्थरूपाव्ययस्य साक्षात्कारोपाय ॥२॥
३—परमाव्ययस्यैवाध्यात्मिकत्वौपाधिकजीवाव्ययत्वोपपत्ति । प्रतिशरीर गुणत्रयोपाधिभिन्नाना जीवाव्ययानामद्वितीयैकाश्वत्थाव्ययनानाप्रतीकमात्रत्वम्, आध्यात्मिकानुपायग्राहित्व च ॥३॥
४—कर्म्माश्वत्थापृथग्भूतस्य ब्रह्माश्वत्थाख्यस्य परमाव्ययस्य जीवाव्ययत्वोपपत्तौ तदक्षरानुगत-महद्गुणयोगाद् भोक्तृत्वसिद्धि ॥४॥
५—गुणत्रयोपाधिभिन्नान् नानायोन्याकारान् महद्विशेषानधितिष्ठतस्तस्यैकस्यैवाश्वत्थाव्ययस्य विभिन्ननामरूपगुणकर्म्मग्राहित्वम् ॥५॥
६—तस्यैकस्यैवाश्वत्थाव्ययस्य प्रतिजीवशरीर भेदेनोपलब्धावपि औपाधिकभेदस्य तुच्छतया सर्वेषा जीवाव्ययाना परमाव्ययानतिरेकादैकात्म्यम् ॥६॥
७—एकस्यैवाश्वत्थाव्ययस्य प्रत्यर्थ कर्म्मभेदप्रयोजकगुणत्रयोपाधिभिन्नाभ्या क्षराक्षराभ्या महत्-प्रकृतिरूपाभ्या भेदोपचारोपपत्ति ॥७॥

---

(४) दैवासुरभूतसर्गोपनिषदि चत्वार उपदेशाः ।

१—जन्मसिद्धनैसर्गिकदैवासुरसपत्तिनिबन्धना स्वभावसिद्धसहजगुणकर्म्मानुबन्धा ॥१॥
२—दैवासुरभेदाद् द्विविधभूतसर्गे आसुरसर्गानुगतानि विद्यानिरपेक्षाणि गुणकर्म्माणि ॥२॥
३—आसुरसपन्मूलकाना कामक्रोधलोभाना नरकद्वारत्वम् ॥३॥
४—दैवसपन्मूलकाना विद्यासमुच्चितगुणकर्म्मणा प्रतिपत्त्यर्थ वेदादिशास्त्रपरिशीलनादेश ॥४॥

---

(५) गुणप्रचयोपनिषदि षडुपदेशाः ।

१—सर्वविधव्यवहारात्मकलोकयात्राया दैवसपत्त्या सत्त्वगुणस्य, आसुरसपत्त्या तमोगुणस्य, उभय-सपत्तिसाम्याद् रजोगुणस्यानुषङ्गसभवाद् गुणत्रयभेदभिन्नदैवासुरयोगमायालक्षणप्रकृत्यभिधा-भिन्नाना भूतसर्गाणा कानिचिदुदाहरणानि । तथा च तावद्गुणत्रयनिष्ठाभेदात् श्रद्धात्रैविध्यम्॥ १॥

२—गुणत्रयवृत्तिभेदादाहारत्रैविध्यम् ॥२॥
३—गुणत्रयवृत्तिभेदाद् यज्ञत्रैविध्यम् ॥३॥
४—काय-वाङ्-मनोऽधिष्ठानभेदात् तपस्त्रैविध्यम् ॥४॥
५—गुणत्रयवृत्तिभेदात् तपस्त्रैविध्यम् ॥५॥
६—गुणत्रयवृत्तिभेदाद् दानत्रैविध्यम् ॥६॥

---

(५) कर्म्मप्रचयोपनिषदि चतुर्दशोपदेशाः ।

१—प्रवृत्तकर्म्मणाम्, निवृत्तकर्म्मणाम्, काम्यकर्म्मणा वा यज्ञतपोदानानामपूर्णत्वसभावनाया तत्पूर्त्तये **"प्रजापतिरूनातिरिक्तयोः प्रतिष्ठा"** इति वेदप्रामाण्यमातिष्ठमानेनेश्वराव्ययस्मरणरूप —ॐ तत् सदिति ब्रह्मनिर्देशस्त्रिविध कर्तव्यतयोपदिश्यते ॥१॥
२—कर्म्मसन्यासत्यागयोर्विवेके नानामतेषु भगवत्सिद्धान्तमतानुसरण ॥२॥
३—गुणत्रयवृत्तिभेदात् त्यागभेदा ॥३॥
४—कर्म्मयोगिना कर्म्मात्यागदोषात् कर्म्मफलत्रैविध्यम् । कर्म्मसन्यासिना तु कर्म्मफलोदयाभाव ॥४॥
५—साख्यसिद्धान्ते कर्म्मसिद्धिहेतूना पाञ्चविध्यम् ॥५॥
६—ज्ञाता, ज्ञानम्, ज्ञेयम्-इति ज्ञानत्रिपुटी, कर्ता, करणम्, कर्म-इति कर्मत्रिपुटी, इतीत्थ षट्कस्य कर्म्मस्वरूपनियामकत्वम् ॥६॥
७—कर्म्मस्वरूपनियामकेषु ज्ञान-कर्म्म-कर्तृणा प्रत्येकस्य गुणत्रयवृत्तिभेदात् त्रैविध्यम् ॥७॥
८—ज्ञानत्रैविध्यम् ॥८॥
९—कर्म्मत्रैविध्यम् ॥९॥
१०—कर्तृत्रैविध्यम् ॥१०॥
११—गुणत्रयवृत्तिभेदाद् बुद्धित्रैविध्यम् ॥११॥
१२—गुणत्रयवृत्तिभेदाद् धृतित्रैविध्यम् ॥१२॥
१३—गुणत्रयवृत्तिभेदात् सुखत्रैविध्यम् ॥१३॥
१४—त्रैगुण्यवृत्तीना सर्वभावव्यापित्वेनोपसहार ॥१४॥

---

(६) अथात्याज्यकर्मोपनिषदि द्वौ उपदेशौ ।

१—अथाधिकारसिद्धसास्कारिकदैवासुरसपत्तिनिबन्धना स्वभावसिद्धस्वीयगुणकर्म्मानुबन्धा ॥१॥
२—दोषवतामपि स्वकर्म्मणा सहजकर्म्मणा च परित्यागप्रतिषेध ॥२॥

---

(७) कर्म्मानावरकत्वोपनिषदि द्वौ उपदेशौ ।

१—अनासक्तस्य फलवासनाशून्यस्य काम्यकर्म्मसन्यासिन कर्म्मकरणेऽपि नैष्कर्म्यसिद्धि ॥१॥
२—नैष्कर्म्येण ब्रह्मभूतस्य विदेहावस्था गतस्य सर्वविधकर्म्मकरणेऽपि सद्योमुक्तिसिद्धचा परमाव्ययपदप्राप्त्यानन्द ॥२॥

इति धर्मलक्षणा आर्षविद्या सपूर्णा ॥

---

(१) गीतासारोद्धारोपनिषदि चत्वार उपदेशाः ।

(१) पूर्वाचार्य्यपरम्परासिद्धकर्म्मविद्याचतुष्टयोपदेशानन्तरमन्ते विद्याचतुष्टयनिष्कर्षे विवक्षिते प्रथमस्तावद् वैराग्य[१] बुद्धियोगविद्यानिष्कर्षसिद्धाया जीवाव्ययलक्षणस्वात्मनिर्भरताया आदेश ॥१॥

(२) अथ आर्षविद्या[४] लक्षणचतुर्थविद्योद्धारस्वरूपो धर्म्मबुद्धियोगविद्यानिष्कर्षसिद्धाया प्रकृतिसिद्धकर्म्मकर्तव्यताया आदेश ॥२॥

(३) अथ सिद्धविद्या[२] लक्षणद्वितीयविद्योद्धारस्वरूपो ज्ञानबुद्धियोगविद्यानिष्कर्षसिद्धाया स्वभावसिद्धस्वकर्म्मप्रवणताया आदेश ॥३॥

(४) अथ राजविद्या[३] लक्षणतृतीयविद्योद्धारस्वरूप पुनरैश्वर्य्यबुद्धियोगनिष्कर्षसिद्धाया जीवाव्ययात्मसलग्नेश्वराव्ययलक्षणान्तरात्मप्रेरितकर्म्मनिष्ठताया आदेश ॥४॥

---

(२) उद्धारोद्धारोपनिषदि द्वौ उपदेशौ ।

१—अथोद्धारचतुष्टयादप्युद्धृत्येदानी सर्वनिष्कर्षसिद्धाया राजर्षिविद्योपदिष्टाया अनन्यभक्तियोगरूपाया गूढोत्माव्ययपुरुषैकशरणागत्युपासनाया आदेश ॥१॥

२—विद्याचतुष्टयात्मकभगवद्गीतार्थभावनाप्रवणत्वमात्मोन्नतिकृद् भवति ।
तस्मादिद गीताविज्ञानमयोग्येभ्यो ग्रहीतुमसमर्थेभ्योऽपात्रेभ्यश्च न वक्तव्यम् ॥

---

(३) गीताफलश्रुत्युपनिषदि द्वौ उपदेशौः ।

१—भगवद्गीताध्ययनश्रवणयो श्रेयस्करत्वमिति फलश्रुति ॥

२—इतिहासप्रकरणान्तर्गतस्य विज्ञानप्रकरणस्योपसहारप्रदर्शनम् ॥

इति क्रमेणोपदेशा गीतोपनिषदामिमे ।
षष्टचग्र-शतसख्याताः (१६०) सविभज्य प्रदर्शिता ॥१॥
एषा विशिष्य व्याख्यानमुत्तरत्र करिष्यते ।
काण्डे तृतीये गीताया हृदये तत्र भाव्यताम् ॥२॥
अस्मिन् द्वितीयकाण्डे तु मूलगीता प्रदर्श्यते ।
उपदेशोपनिषदा सविभज्य विभागतः ॥३॥

इत्युपोद्घातप्रकरणम् ।

अथ गीताविज्ञानशास्त्रम्

अथ सशीर्षकमूलपाठः ।

अथ चतुर्विधविद्योपदेशोपक्रमे तावत् संदर्भशुद्धचर्थमैतिहासिकाः श्लोकाः प्रदर्श्यन्ते ॥

धृतराष्ट्र उवाच

(१) १–धर्मक्षेत्रे कुरुक्षेत्रे समवेता युयुत्सव ।
मामका पाण्डवाश्चैव किमकुर्वत सञ्जय ॥१॥

सञ्जय उवाच

२–दृष्ट्वा तु पाण्डवानीक व्यूढ दुर्योधनस्तदा ।
आचार्यमुपसगम्य राजा वचनमब्रवीत् ॥२॥
पश्यैता पाण्डुपुत्राणामाचार्य महती चमूम् ।
व्यूढा द्रुपदपुत्रेण तव शिष्येण धीमता ॥३॥
३–अत्र शूरा महेष्वासा भीमार्जुनसमा युधि ।
[१]युयुधानो [२]विराटश्च [३]द्रुपदश्च महारथ ॥४॥
[४]धृष्टकेतुश्चेकितान [५] [६]काशिराजश्च वीर्यवान् ।
[७]पुरुजित्कुन्तिभोजश्च[८] शैव्यश्च[९] नरपुङ्गव ॥५॥
युधामन्युश्च[१०] विक्रान्त उत्तमौजाश्च[११] वीर्यवान् ।
सौभद्रो[१२] द्रौपदेयाश्च[१३] सर्व एव महारथा ॥६॥
४–अस्माक तु विशिष्टा ये तान्निबोध द्विजोत्तम ।
नायका मम सैन्यस्य सज्ञार्थ तान्ब्रवीमि ते ॥७॥
[१]भवान्भीष्मश्च[२] कर्णश्च[३] कृपश्च[४] समितिजय ।
अश्वत्थामा[५] विकर्णश्च[६] सौमदत्ति[७]स्तथैव च ॥८॥
अन्ये च बहव शूरा मदर्थे त्यक्तजीविता ।
नानाशस्त्रप्रहरणा सर्वे युद्धविशारदा ॥९॥
५ अपर्याप्त तदस्माक बल भीष्माभिरक्षितम् ।
पर्याप्त त्विदमेतेषा बल भीमाभिरक्षितम् ॥१०॥
अयनेषु च सर्वेषु यथाभागमवस्थिता ।
भीष्मेवाभिरक्षन्तु भवन्त सर्व एव हि ॥११॥
(२) १–तस्य सजनयन्हर्ष कुरुवृद्ध पितामह ।
सिहनाद विनद्योच्चै शङ्ख दध्मौ प्रतापवान् ॥१२॥

तत शङ्खाश्च भेर्यश्च पणवानकगोमुखा ।
सहसैवाभ्यहन्यन्त स शब्दस्तुमुलोऽभवत् ॥१३॥
तत श्वेतैर्हयैर्युक्ते महति स्यन्दने स्थितौ ।
माधव पाण्डवश्चैव दिव्यौ शङ्खौ प्रदध्मतु ॥१४॥
पाञ्चजन्य हृषीकेशो देवदत्त धनजय ।
पौण्ड्र दध्मौ महाशङ्ख भीमकर्मा वृकोदर ॥१५॥
अनन्तविजय राजा कुन्तीपुत्रो युधिष्ठिर ।
नकुल सहदेवश्च सुघोषमणिपुष्पको ॥१६॥
काश्यश्च परमेष्वास शिखण्डी च महारथ ।
धृष्टद्युम्नो विराटश्च सात्यकिश्चापराजित ॥१७॥
द्रुपदो द्रौपदेयाश्च सर्वश पृथिवीपते ।
सौभद्रश्च महाबाहु शङ्खान्दध्मु पृथक्पृथक् ॥१८॥
स घोषो धार्तराष्ट्राणा हृदयानि व्यदारयत् ।
नभश्च पृथिवी चैव तुमुलो व्यनुनादयन् ॥१९॥
२–अथ व्यवस्थितान्दृष्ट्वा धार्तराष्ट्रान्कपिध्वज ।
प्रवृत्ते शस्त्रसपाते धनुरुद्यम्य पाण्डव ॥२०॥
हृषीकेश तदा वाक्यमिदमाह महीपते ।

अर्जुन उवाच

सेनयोरुभयोर्मध्ये रथ स्थापय मेऽच्युत ॥२१॥
यावदेतान्निरीक्षेऽह योद्धुकामानवस्थितान् ।
कैर्मया सह योद्धव्यमस्मिन्रणसमुद्यमे ॥२२॥
योत्स्यमानानवेक्षेऽह य एतेऽत्र समागता ।
धार्तराष्ट्रस्य दुर्बुद्धेर्युद्धे प्रियचिकीर्षव ॥२३॥

संजय उवाच

३–एवमुक्तो हृषीकेशो गुडाकेशेन भारत ।
सेनयोरुभयोर्मध्ये स्थापयित्वा रथोत्तमम् ॥२४॥
भीष्मद्रोणप्रमुखत सर्वेषा च महीक्षिताम् ।
उवाच पार्थ पश्यैतान्समवेतान्कुरूनिति ॥२५॥
(३) १–तत्रापश्यत्स्थितान्पार्थ पितॄनथ पितामहान् ।
आचार्यान्मातुलान्भ्रातॄन्पुत्रान्पौत्रान्सखीस्तथा ॥२६॥
श्वशुरान्सुहृदश्चैव सेनयोरुभयोरपि ।
तान्समीक्ष्य स कौन्तेय सर्वान्बन्धूनवस्थितान् ॥२७॥
कृपया परयाविष्टो विषीदन्निदमब्रवीत् ।

अर्जुन उवाच

२–दृष्ट्वेम स्वजन कृष्ण ! युयुत्सु समुपस्थितम् ॥२८॥
सीदन्ति मम गात्राणि मुख च परिशुष्यति ।
वेपथुश्च शरीरे मे रोमहर्षश्च जायते ॥२९॥
गाण्डीव स्रसते हस्तात्त्वक्चैव परिदह्यते ।
न च शक्नोम्यवस्थातु भ्रमतीव च मे मन ॥३०॥

निमित्तानि च पश्यामि विपरीतानि केशव ।
न च श्रेयो ऽनुपश्यामि हत्वा स्वजनमाहवे ॥३१॥
न काङ्क्षे विजय कृष्ण न च राज्य सुखानि च ।
कि नो राज्येन गोविन्द कि भोगैर्जीवितेन वा ॥३२॥
येषामर्थे काङ्क्षित नो राज्य भोगा सुखानि च ।
त इमेऽवस्थिता युद्धे प्राणास्त्यक्त्वा धनानि च ॥३३॥
आचार्या पितर पुत्रास्तथैव च पितामहा ।
मातुला श्वशुरा पौत्रा श्याला सबन्धिनस्तथा ॥३४॥
एतान्न हन्तुमिच्छामि घ्नतोऽपि मधुसूदन ।
अपि त्रैलोक्यराज्यस्य हेतो कि नु महीकृते ॥३५॥
निहत्य धार्तराष्ट्रान्न का प्रीति स्याज्जनार्दन ।
पापमेवाश्रयेदस्मान्हत्वैतानाततायिन ॥३६॥
तस्मान्नार्हा वय हन्तु धार्तराष्ट्रान्स्वबान्धवान् ।
स्वजन हि कथ हत्वा सुखिन स्याम माधव ॥३७॥
यद्यप्येते न पश्यन्ति लोभोपहतचेतस ।
कुलक्षयकृत दोप मित्रद्रोहे च पातकम् ॥३८॥
कथ न ज्ञेयमस्माभि पापादस्मान्निवर्तितुम् ।
कुलक्षयकृत दोष प्रपश्यद्भिर्जनार्दन ॥३९॥
कुलक्षये प्रणश्यन्ति कुलधर्मा सनातना ।
धर्मे नष्टे कुल कृत्स्नमधर्मोऽभिभवत्युत ॥४०॥
अधर्माभिभवात्कृष्ण प्रदुप्यन्ति कुलस्त्रिय ।
स्त्रीषु दुष्टासु वार्ष्णेय जायते वर्णसकर ॥४१॥
सकरो नरकायैव कुलघ्नाना कुलस्य च ।
पतन्ति पितरो ह्येपा लुप्तपिण्डोदकक्रिया ॥४२॥
दोषैरेतै कुलघ्नाना वर्णसकरकारकै ।
उत्साद्यन्ते जातिधर्मा कुलधर्माश्च शाश्वता ॥४३॥
उत्सन्नकुलधर्माणा मनुष्याणा जनार्दन ।
नरके नियत वासो भवतीत्यनुशुश्रुम ॥४४॥

(१) **[अहो बत महत्पाप कर्तु व्यवसिता वयम् ।**
यद्राज्यसुखलोभेन हन्तु स्वजनमुद्यता ॥४५॥]
यदि मामप्रतीकारमशस्त्र शस्त्रपाणय ।
धार्तराष्ट्रा रणे हन्युस्तन्मे क्षेमतर भवेत् ॥४६॥

सञ्जय उवाच

(२) **[एवमुक्त्वार्जुनः सख्ये रथोपस्थ उपाविशत् ।**
विसृज्य सशर चापं शोकसविग्नमानस. ॥४७॥]

इति प्रथमोध्याय ॥१॥

ऐतिहासिकेऽस्मिन्नध्याये—"अहो बत"—इति, "एवमुक्त्वा"—इति च श्लोकद्वय वैज्ञानिक विवक्ष्यते ।

अथ चातुर्विद्योपक्रमः

(१) उत्थानिकोपनिषद् (लोकवृत्तोपनिषद्) द्विसूत्री

१—सग्रामोपलक्षणविधया प्राकृतिकशोकसमुत्थानप्रदर्शनम् ।

अर्जुन उवाच

*अहो बत महत्पाप कर्तु व्यवसिता वयम् ।
यद्राज्यसुखलोभेन हन्तु स्वजनमुद्यता ॥१।४५॥

सञ्जय उवाच

*एवमुक्त्वार्जुन सख्ये रथोपस्थ उपाविशत् ।
विसृज्य सशर चाप शोकसविग्नमानस ॥१।४७॥ [१ अ०]

(सञ्जय उवाच)

त तथा कृपयाविष्टमश्रुपूर्णाकुलेक्षणम् ।
विषीदन्तमिद वाक्यमुवाच मधुसूदन ॥२।१॥

२—प्राकृतिकशोकव्युत्थानौपयिकचतुर्विधबुद्धियोगविद्योपदेशोपक्रम ।

श्रीभगवानुवाच

कुतस्त्वा कश्मलमिद विषमे समुपस्थितम् ।
अनार्य्यजुष्टमस्वर्ग्यमकीर्तिकरमर्जुन ! ॥२।२॥
क्लैब्य मा स्म गम पार्थ ! नैतत्त्वय्युपपद्यते ।
क्षुद्र हृदयदौर्बल्य त्यक्त्वोत्तिष्ठ परन्तप ! ॥२।३॥

इति—उत्थानिकोपनिषद् द्व्युपदेशी ।

अत्रान्तरे सप्त श्लोका ऐतिहासिका द्रष्टव्याः

अर्जुन उवाच

१—कथ भीष्ममह सख्ये द्रोण च मधुसूदन ।
इषुभि प्रतियोत्स्यामि पूजार्हावरिसूदन ॥२।४॥

---

*'अहो बत' इति 'एवमुक्त्वा' इति च श्लोकद्वय वैज्ञानिक गीताया प्रारम्भे लोकवृत्तोपनिषदः स्वरूप प्राकृतिक शोकसमुत्थानलक्षण द्रष्टव्यम् । तस्मात् पुनर्लिखितम् ।

२—गुरूनहत्वा हि महानुभावान् श्रेयो भोक्तु भैक्ष्यमपीह लोके ।
हत्वार्थकामास्तु गुरूनिहैव भुञ्जीय भोगान्रुधिरप्रदिग्धान् ॥२।५॥
३—न चैतद्विद्म कतरन्नो गरीयो यद्वा जयेम यदि वा नो जयेयु ।
यानेव हत्वा न जिजीविषाम स्तेऽवस्थिता प्रमुखे धार्तराष्ट्रा ॥२।६॥
४—कार्पण्यदोषोपहतस्वभाव पृच्छामि त्वा धर्मसमूढचेना ।
यच्छ्रेय स्यान्निश्चित ब्रूहि तन्मे शिष्यस्तेऽह शाधि मा त्वा प्रपन्नम् ॥२।७॥
५—न हि प्रपश्यामि ममापनुद्याद् यच्छोकमुच्छोषणमिन्द्रियाणाम् ।
अवाप्य भूमावसपत्नमृद्ध राज्य सुराणामपि चाधिपत्यम् ॥२।८॥

सञ्जय उवाच

६—एवमुक्त्वा हृषीकेश गुडाकेश परतप ।
न योत्स्य इति गोविन्दमुक्त्वा तूष्णी बभूव ह ॥२॥९॥
७—तमुवाच हृषीकेश प्रहसन्निव भारत ।
सेनयोरुभयोर्मध्ये विषीदन्तमिद वच ॥२।१०॥

इति—ऐतिहासिकाः सप्त श्लोकाः । (४५+७=५२)

१—अथ राजर्षिविद्या

अथ वैराग्यबुद्धियोगलक्षणा भगवद्विद्या उपदिश्यते ॥

[सनातनविद्या=भगवद्विद्या=वैराग्यविद्या]

१—आत्मनो नित्यशुद्धबुद्धमुक्तैकान्तज्ञानमयत्वविवक्षारूपाया साख्याना ज्ञानयोगनिष्ठायामनुशोको व्यर्थ ॥१॥

२—आत्मनो रागद्वेषफलकामासक्तिसवलितकाम्यकर्म्मव्यतिरिक्त—सर्वविधकर्म्मसमुच्चितज्ञानमयत्वविवक्षारूपाया बुद्धियोगनिष्ठायामनुशोको व्यर्थ ॥२॥

३—रागद्वेषादिदोषैरदूषिताना नित्याना स्वभावसिद्धसहजकर्म्मणामबन्धनत्वात् परित्यागानौचित्यम् ॥३॥

४—बुद्धियोगप्रतिबन्धकानामात्मशक्त्यावरकाणा रागद्वेषादिदोषदूषितकर्म्मणा परित्यागौचित्यम् ॥४॥

५—बुद्धियोगनिष्ठाया सनातनत्वम्, भगवत्प्रथमोपदिष्टत्वम्, राजर्षिकुलप्रचरितत्व च ॥५॥

६—बुद्धियोगाविरोधिना कर्म्मणा परित्यागानौचित्यम् ॥६॥

७—बुद्धियोगस्य ज्ञानयोगकर्म्मयोगोभयसमुच्चितरूपत्वम् ॥७॥

८—बुद्धियोगसिद्धिहेतो कर्म्मकलापस्योपादेयत्वम् ॥८॥

इत्येतावन्तोऽर्था सप्रतिपन्ना वैराग्यविद्या नाम ॥ सेय भगवता विवस्वते प्रथमोपदिष्टा वैराग्यविद्या राजर्षिकुले सनातनकालात् प्रचरति स्म । तामिह गीतायामादो षोडशाधिकद्विशतमितश्लोकैरुपपादयन्ति ॥२१६॥

(१) तत्र तावद् ज्ञानयोगिनोऽनुशोकानौचित्योपनिपत् ।

१—अस्ति हि—देहभृत्यव्ययात्मनि जन्ममरणद्वन्द्वाभाव ।

श्रीभगवानुवाच

अशोच्यानन्वशोचस्त्व प्रज्ञावादाश्च भाषसे ।
गतासूनगतासूश्च नानुशोचन्ति पण्डिता ॥२।११॥

नत्वेवाह जातु नास न त्व नेमे जनाधिपा ।
न चैव न भविष्याम सर्वे वयमत परम् ॥२।१२॥

देहिनोऽस्मिन् यथा देहे कौमार यौवन जरा ।
तथा देहान्तरप्राप्तिर्धीरस्तत्र न मुह्यति ॥२।१३॥

२—अस्ति हि देहभृत्यव्ययात्मनि सुखदु.खद्वन्द्वस्य संयोगजत्वेनागमापायित्वम् । तस्मात् समदु खसुखानुभाविनां भूतात्मनामव्ययात्मसाधर्म्यलाभादमृतत्वसपत्ति. ॥


मात्रास्पर्शास्तु कौन्तेय ! शीतोष्णसुखदु खदा ।
आगमापायिनोऽनित्यास्तास्तितिक्षस्व[१*] भारत ! ॥२।१४॥
य हि न व्यथयन्त्येते पुरुष पुरुषर्षभ !
समदु खसुख धीर सोऽमृतत्वाय कल्पते ॥२।१५॥

३—अस्ति हि—देहभृत्यव्ययात्मनि सदसद्द्वन्द्वे असत. शरीरादे कार्य्यस्य सत्त्वम्, सतस्तु कारणस्यात्मनोऽसत्त्वमनुपपन्नमिति विज्ञानसिद्धान्त.—

नासतो विद्यते भावो नाभावो विद्यते सत ।
उभयोरपि दृष्टोन्तस्त्वनयोस्तत्त्वदर्शिभि ॥२।१६॥

३—तस्मादस्य विकुर्वाणविनश्वरशरीरयोगिनोऽप्यात्मनो निर्विकारत्वादविनाशित्वाच्चानुशोकानौचित्यम् ।

अविनाशि तु तद्विद्धि येन सर्वमिद ततम् ।
विनाशमव्ययस्यास्य न कश्चित् कर्तुमर्हति ॥२।१७॥
अन्तवन्त इमे देहा नित्यस्योक्ता शरीरिण ।
अनाशिनोऽप्रमेयस्य तस्माद्युध्यस्व भारत ॥२।१८॥
य एन वेत्ति हन्तार यश्चैन मन्यते हतम् ।
उभौ तौ न विजानीतो नाय हन्ति न हन्यते ॥२।१९॥



४—अपि चैतस्य विनश्वरशरीरयोगिनोऽप्यव्ययस्य जन्ममृत्युद्वन्द्वरहितत्वेन हननासभवादनुशोकानौचित्यम्—

न जायते म्रियते वा कदाचिन्नाय भूत्वा भविता वा न भूय ।
अजो नित्य शाश्वतोऽय पुराणो न हन्यते हन्यमाने शरीरे ॥२।२०॥
वेदाविनाशिन नित्य य एनमजमव्ययम् ।
कथ स पुरुष पार्थ क घातयति हन्ति कम् ॥२।२१॥

४—अपि चैतस्मिन्नव्यये—महतोऽक्षरात्मनो मूर्त्तियोनित्वस्वाभाव्याच्छरीरविधरणपरित्यागलक्षणयोर्जन्ममरणयो. पौन.पुनिकत्वनियमादनुशोकानौचित्यम् ।

वासासि जीर्णानि यथा विहाय नवानि गृह्णाति नरोऽपराणि ।
तथा शरीराणि विहाय जीर्णान्यन्यानि सयाति नवानि देही ॥२।२२॥

[१*] तास्तितिक्षस्वेति—प्रत्यक्ष हि लोके दृश्यते—जनमरणे धनहरणे वा प्रथमक्षणे परमाघात·, परम दु खम् । अथ सहनक्रमेणैतत्तितिक्षावशादल्पता गच्छत् कैश्चिदहोभिस्तद् दु.ख विलीयते । एव सुखम् । स एष प्रकृतिसिद्धो नियम । किन्तु एवमेवेद सहन यद्यभ्यासेन कृत्रिमप्रयत्नेन गृह्णीयात्, तदा तस्यैतद् दु खं प्रत्याघातकालेऽपि नोदियाद्—अभ्यासप्राबल्यात् । स यथाभ्यासी भवति, तथैतस्य वृत्ति. सपद्यते । दु खनिमित्ताघातो विश्वप्रकृतिनियमो (धर्म्मो) न निवर्तते । स्वप्रकृतिस्तु-अभ्यासेन, वैराग्येण च मनसः सस्कारात् सस्क्रियते । तेन दु.खं निवर्तते ।

५—अपि चैतस्याव्ययात्मन. पञ्चभूतगुणाननुस्पृष्टत्वेन विनाशासभवादनुशोकानौचित्यम् ।

नैन छिन्दन्ति शस्त्राणि नैन दहति पावक ।
न चैन क्लेदयन्त्यापो न शोषयति मारुत ॥२।२३॥
अच्छेद्योऽयमदाह्योऽयमक्लेद्योऽशोष्य एव च ।
नित्य सर्वगत स्थाणुरचलोऽय सनातन ॥२।२४॥
अव्यक्तोऽयमचिन्त्योऽयमविकार्योयमुच्यते ।
तस्मादेव विदित्वैन नानुशोचितुमर्हसि ॥२।२५॥

६—जन्ममरणवति भोक्तरि कर्म्मात्मनि जन्ममरणद्वन्द्वस्य प्रवाहनित्यत्वादपरिहार्य्यत्वाच्चानुशोकानौचित्यम् ।

अथ चैन नित्यजात नित्य वा मन्यसे मृतम् ।
तथापि त्व महावाहो[1] नैव शोचितुमर्हसि ॥२।२६॥
जातस्य हि ध्रुवो मृत्युर्ध्रुव जन्म मृतस्य च ।
तस्मादपरिहार्य्येऽर्थे न त्व शोचितुमर्हसि ॥२।२७॥
अव्यक्तादीनि भूतानि व्यक्तमध्यानि भारत ।
अव्यक्तनिधनान्येव तत्र का परिदेवना ॥२।२८॥

७—नित्यानित्ययोरसङ्गसङ्गिनो· सबन्धस्यानिर्वचनीयत्वादाश्चर्य्यमयत्वेऽप्यात्मावध्यत्वसिद्धान्तादनुशोकानौचित्यम् ।

आश्चर्य्यवत्पश्यति कश्चिदेनमाश्चर्य्यवद्वदति तथैव चान्य ।
आश्चर्य्यवच्चैनमन्य शृणोति श्रुत्वाप्येन वेद न चैव कश्चित् ॥२।२९॥
देही नित्यमवध्योऽय देहे सर्वस्य भारत ।
तस्मात् सर्वाणि भूतानि न त्व शोचितुमर्हसि ॥२।३०॥

इति ज्ञानयोगिनोऽनुशोकानौचित्योपनिषत् ।

अत्रान्तरे सप्त ऐतिहासिका नैतिकाः श्लोका.

१—स्वधर्ममपि चावेक्ष्य न विकम्पितुमर्हसि ।
धर्म्याद्धि युद्धाच्छ्रेयोऽन्यत् क्षत्रियस्य न विद्यते ॥२।३१॥
२—यदृच्छया चोपपन्न स्वर्गद्वारमपावृतम् ।
सुखिन क्षत्रिया पार्थ लभन्ते युद्धमीदृशम् ॥२।३२॥
३—अथ चेत्त्वमिम धर्म्य सग्राम न करिष्यसि ।
तत स्वधर्म कीर्त्तिं च हित्वा पापमवाप्स्यसि ॥२।३३॥
४—अकीर्ति चापि भूतानि कथयिष्यन्ति ते ऽव्ययाम् ।
सभावितस्य चाकीर्तिर्मरणादतिरिच्यते ॥२।४३॥
५—भयाद्रणादुपरत मस्यन्ते त्वा महारथा ।
येषा च त्व बहुमतो भूत्वा यास्यसि लाघवम् ॥२।३५॥

---

[1] नैनं—इति पाठान्तरम् ।

६--अवाच्यवादाश्च वहून्वदिष्यन्ति तवाहिता ।
निन्दन्तस्तव सामर्थ्यं ततो दुःखतरं नु किम् ॥२।३६॥
७--हतो वा प्राप्स्यसि स्वर्गं जित्वा वा भोक्ष्यसे महीम् ।
तस्मादुत्तिष्ठ कौन्तेय युद्धाय कृतनिश्चय ॥२।३७॥

इति--ऐतिहासिका सप्त श्लोका । (४५+७+७= ५९)

कर्मफलासक्तिपरित्यागोपक्रम·

सर्वविधद्वन्द्वप्रत्ययेषु साम्यवृत्ते· श्रेयस्करत्वम् ।

सुखदुःखे समे कृत्वा लाभालाभौ जयाजयौ ।
ततो युद्धाय युज्यस्व नैवं पापमवाप्स्यसि ॥२।३८॥

(२) अथ बुद्धियोगिनः कर्म्मफलकामासक्तिपरित्यागौचित्योपनिषत्

१—कर्म्मसंन्यासलक्षणज्ञानयोगापेक्षया फलासक्तित्यागोपाधिकबुद्धियोगप्राशस्त्यम् ।

एषा तेऽभिहिता साख्ये बुद्धिर्योगे त्विमा शृणु ।
बुद्धया युक्तो यया पार्थ कर्म्मबन्ध प्रहास्यसि ॥२।३९॥
नेहाभिक्रम*नाशोऽस्ति प्रत्यवायो न विद्यते ।
स्वल्पमप्यस्य धर्म्मस्य त्रायते महतो भयात् ॥२।४०॥
†व्यवसायात्मिका बुद्धिरेकेह कुरुनन्दन ! ।
बहुशाखा ह्यनन्ताश्च बुद्धयो व्यवसायिनाम् ॥२।४१॥

२—काम्यकर्म्मयोगस्य बुद्धिविक्षेपकत्वेन बुद्धियोगविघातकत्वादनिष्टत्वम् ।

यामिमा पुष्पिता वाच प्रवदन्त्यविपश्चित ।
वेदवादरता पार्थ ! नान्यदस्तीति वादिन ॥२।४२॥
कामात्मान स्वर्गपरा जन्मकर्म्मफलप्रदाम् ।
क्रियाविशेषबहुला भोगैश्वर्य्यगति प्रति ॥२।४३॥
भोगैश्वर्य्यप्रसक्ताना तयापहृतचेतसाम् ।
व्यवसायात्मिका बुद्धि समाधौ न विधीयते ॥२।४४॥
त्रैगुण्यविषया वेदा निस्त्रैगुण्यो भवार्जुन ।
निर्द्वन्द्वो नित्यसत्त्वस्थो निर्य्योगक्षेम आत्मवान् ॥२।४५॥

---

* उद्देश्यार्थसाधनानुकूलस्तत्पूर्त्यभिमुखश्चेष्टासचारक्रमोऽभिक्रम ।
अभ्युदयप्रतिकूला कार्य्यनिपातलक्षणा चेष्टागति प्रत्यवाय· ।
आत्मन ऊर्ध्वप्रचारोऽभिक्रम । आत्मनोऽधःपात प्रत्यवाय ।

† व्यवसायात्मिकेति—सकल्पकामासक्तिदोषादूषितविशुद्धमनोऽनुग्राहिणी बुद्धिर्व्यवसाय· । तत्तत्कामादिदोषविक्षिप्तमनोऽन्वाकृष्टा बुद्धिरव्यवसाय· । अपि च—इन्द्रियाधिष्ठितमन.सपरिष्वङ्गाद् मनोऽनयोगिनी व्यवच्छिन्ना बुद्धिरव्यवसायः । मनोनिरपेक्षा तु आत्मानुयोगिनी निष्कैवल्या बुद्धिर्व्यवसाय । अव्यवसायबुद्धया दिग्देशकालानवच्छिन्नोऽयमसीम आत्मा भूमा न ग्रहीतु शक्यते-मनस. परिच्छिन्नार्थग्राहित्वात् । व्यवसायबुद्धया तु सोऽयमसीमोऽपि भूमा शून्यबिन्दुरणिमा कथचिद् गृह्यत एव । अन्यथा तद्व्यवहारासभवापत्तेः ।

यावानर्थ उदपाने सर्वत सप्लुतोदके ।
तावान् सर्वेषु वेदेषु ब्राह्मणस्य विजानत ॥२।४६॥

३—कर्म्मयोगस्य फलासक्तित्यागोपाधिकबुद्धियोगात्मकत्वेनाभ्युपपत्तौ श्रेयस्करत्वम् ।

कर्म्मण्येवाधिकारस्ते मा फलेषु कदाचन ।
मा कर्म्मफलहेतुर्भूर्मा ते सगोस्त्वकर्म्मणि ॥२।४७॥
योगस्थ कुरु कर्म्माणि सङ्ग त्यक्त्वा धनजय ।
सिद्धचसिद्धचो समो भूत्वा समत्व योग उच्यते ॥२।४८॥
दूरेण ह्यवर कर्म्म बुद्धियोगाद्धनजय ।
बुद्धौ शरणमन्विच्छ कृपणा फलहेतव ॥२।४९॥
बुद्धियुक्तो जहातीह उभे सुकृत-दुष्कृते ।
तस्माद्योगाय युज्यस्व योग कर्म्मसु कौशलम् ॥२।५०॥
कर्म्मज बुद्धियुक्ता हि फल त्यक्त्वा मनीषिण ।
जन्मबन्धविनिर्मुक्ता पद गच्छन्त्यनामयम् ॥२।५१॥

४—मोहव्यतितीर्णाया स्थितप्रज्ञताया बुद्धियोगसिद्धचुपायत्वम् ।
अज्ञानावृतज्ञानजनिताया उत्थाप्याकाङ्क्षाया मनसि निर्वेदस्य बुद्धियोगसिद्धचुपायत्वम् ॥

यदा ते मोहकलिल बुद्धिर्व्यतितरिष्यति ।
तदा गन्तासि निर्वेद श्रोतव्यस्य श्रुतस्य च ॥२।५२॥
श्रुतिविप्रतिपन्ना ते यदा स्थास्यति निश्चला ।
समाधावचला बुद्धिस्तदा योगमवाप्स्यसि ॥२।५३॥

५—वैराग्यलक्षणबुद्धियोगस्वरूपसपत्तिरूपाया
स्थितप्रज्ञताया षड् लक्षणानि ॥

अर्जुन उवाच

स्थितप्रज्ञस्य का भाषा समाधिस्थस्य केशव ।
स्थितधी कि प्रभाषेत किमासीत व्रजेत किम् ॥२।५४॥

श्रीभगवानुवाच

(१) **(तुष्टिमूला)**—प्रजहाति यदा कामान् सर्वान् पार्थ मनोगतान् ।
आत्मन्येवात्मना तुष्ट स्थित प्रज्ञस्तदोच्यते ॥२।५५॥

स्थितप्रज्ञस्तदोच्यते–इति—अव्ययविद्याभागे विद्याबुद्धियोगादात्मन्यविद्याविद्ययोः साम्योपपत्तिरात्मबलम् । तद् द्वन्द्वसहिष्णु । तत्र सत्यपि दु.खानुभवे ततो विह्वलत्वाभावः समतालक्षणस्थैर्य्यम् । तस्माद्विद्याविद्ययोः समत्वमात्मबलम्; आत्मबलसयमनान्मनसि दृढता जायते । सा क्षोभप्रतिबन्धिका, ततश्च क्षोभानुदयात् स्थितप्रज्ञता सभवति । सा षोढा—तुष्टिमूला,[1] प्रेयोनासक्तिमूला,[2] श्रेयोनासक्तिमूला,[3] तृप्तिमूला,[4] अनशनतपोमूला,[5] इन्द्रियवशीकारमूला[6] चेति । इन्द्रियद्वारा मानसान्नभोगं भुक्तवतोऽपूर्णाया तृप्तौ तस्यार्द्धतृप्तस्याग्रे तृप्तिपूर्णत्वार्थमप्रयतमानस्यैच्छिको मध्ये विश्राम सन्तोष. । तत्र भोगार्थ प्रयत्नाभाव स्थितप्रज्ञता । अथ प्रेय श्रेयोविषयकमिष्टजनकत्वज्ञान प्रवृत्तिनिमित्ताम् । आरम्भणहेतुपञ्चकपरिग्रह प्रवृत्ति, सा क्षोभहेतुः । (अग्नेऽपि शेष)

(२) (प्रेयोऽनासक्तिमूला)—दु खेष्वनुद्विग्नमना सुखेषु विगतस्पृह ।
वीतरागभयक्रोध स्थितधीर्मुनिरुच्यते ॥२।५६॥

(३) (श्रेयोऽनासक्तिमूला)—य सर्वत्रानभिस्नेहस्तत्तत् प्राप्य शुभाशुभम् ।
नाभिनन्दति न द्वेष्टि तस्य प्रज्ञा प्रतिष्ठिता ॥२।५७॥

(४) (तृप्तिमूला)—यदा सहरते चाय कूर्म्मोऽङ्गानीव सर्वश ।
इन्द्रियाणीन्द्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता ॥२।५८॥

(५) (अनशनतपोमूला)—विषया विनिवर्त्तन्ते निराहारस्य देहिन ।
रसवर्ज रसोऽप्यस्य पर दृष्ट्वा निवर्तते ॥२।५९॥

(६) (इन्द्रियवशीकारमूला)—यततो ह्यपि कौन्तेय पुरुषस्य विपश्चित ।
इन्द्रियाणि प्रमाथीनि हरन्ति प्रसभ मन ॥२।६०॥
तानि सर्वाणि सयम्य युक्त आसीत मत्पर ।
वशे हि यस्येन्द्रियाणि तस्य प्रज्ञा प्रतिष्ठिता ॥२।६१॥

६—बुद्धियोगप्रतिबन्धकधर्म्माः ।

ध्यायतो* विषयान्[१] पुस सङ्गस्तेषूपजायते[२]† ।
सङ्गात् सजायते काम [३] कामात् [४]क्रोधोऽभिजायते ॥२।६२॥

(पूर्व पृष्ठ शेष) अधिष्ठान तथा कर्ता करण च पृथग्विधम् ।
विविधाश्च पृथक् चेष्टा दैव चैवात्र पञ्चमम् ॥१॥
शरीरवाङ्मनोभिर्यत् कर्म्म प्रारभते नरः ।
न्याय्य वा विपरीत वा पञ्चैते तस्य हेतव· ॥२॥

इति पञ्चहेतुपरिग्रह क्षोभः । प्रवृत्तावुद्योगो मानस क्षोभ । यत्नातिशयव्यग्रता उद्योग । उत्थिताकाङ्क्षालक्षणप्रवृत्ते क्षोभत्वाभावेऽपि उत्थाप्याकाङ्क्षालक्षणस्योद्योगस्य क्षोभत्व स्थितप्रज्ञता-विरोधित्वम् । तदभाव स्थितप्रज्ञता । अन्नभोगेच्छापूर्त्तौ कृतकृत्यतानन्दस्तृप्ति । इत्थ चतुर्विधा स्थितप्रज्ञता युक्तस्य सिद्धरूपा भवति । अथोत्तरे द्वे साध्यरूपे युञ्जानस्थे भवतः ॥५॥

*ध्यायतो विषयानिति—मनसो विषयाकाराकारितत्व वासना नाम सस्कार । स्वजनितसस्कार-द्वारा विषये मनसो बन्धनमासक्ति· । मनसानुभवजन्यसस्कारस्याधानेऽनुभवस्य चिरकालिकत्व हेतु । तच्च न सभवति-सकल्पविकल्पात्मकस्य मनसः क्षणिकपरिग्रहपरित्यागलक्षणत्वात् । तस्माद्बुद्धिसह-कृतस्य मनस. सस्काराधायकत्व वाच्यम् । सा बुद्धिरपि द्विविधा—उपेक्षाबुद्धिरपेक्षाबुद्धिश्च । मनो-बुद्धचो. सहयोगे बुद्धचा मनोधीनत्वे-उपेक्षा । मनसो बुद्धचधीनत्वे त्वपेक्षा । तत्रोपेक्षाबुद्धिसह-कृतस्यापि मनस. सस्काराधायकत्व न दृश्यते । अपेक्षाबुद्धिसहकारे तु बुद्धचा विषयग्रहणस्य चिरकालि-कत्वात् सहकृतस्य मनसश्चिरकालिकत्वमुपपद्यते । तत्र बुद्धेर्विषयाकारितापरिणामाभावेऽपि मनस. सयुक्तरूपग्राहित्वस्वाभाव्याद्—विषयाकाराकारितत्व भवतीति सस्कारो जायते । अथ यदाकारा-कारितत्वं मनस , तस्मिन् विषये बन्धो भवति, सैवासक्तिर्नाम । तथा च अविद्याबुद्धिसहकृतेन मनसा चिरकालिक विषयानुचिन्तनमनुध्यानम् । तदासक्तिहेतुत्वादासक्तिः । प्रज्ञाने विज्ञानानुष्वङ्गोऽनुध्यानम् । अविद्यारूपयाऽपेक्षाबुद्धचा मनोगृहीतार्थविषयक चिरपरिग्रहणमनुध्यानम् ।

†सङ्गस्तेषूपजायते—इति—चिरकालिको मानसो विषयसयोगो बन्धनात्मक· सङ्ग: । मनसा-कारिते विषये बहिर्धा मनसो जिघृक्षा काम. । तत· कामसिद्धिप्रतिबन्धके क्रोधः । अनुकूलसयोगलक्षण —

क्रोधाद् भवति समोह [५] समोहात् [६]स्मृतिविभ्रम ।
स्मृतिभ्रशाद् [७]बुद्धिनाशो बुद्धिनाशात् प्रणश्यति ॥२।६३॥

७—रागद्वेषजनितवासनामयकषायनाशे बुद्धिप्रसादाद्विमलबुद्धिलक्षणस्य बुद्धियोगस्य ब्राह्मस्थिति-हेतुत्वम् ।

रागद्वेषवियुक्तैस्तु विषयानिन्द्रियैश्चरन् ।
आत्मवश्यैर्विधेयात्मा प्रसादमधिगच्छति ॥२।६४॥
प्रसादे सर्वदु खाना हानिरस्योपजायते
प्रसन्नचेतसो ह्याशु बुद्धि पर्य्यवतिष्ठते ॥२।६५॥
नास्ति बुद्धिरयुक्तस्य न चायुक्तस्य भावना ।
न चाभावयत शान्तिरशान्तस्य कुत सुखम् ॥२।६६॥
इन्द्रियाणा हि चरता यन्मनोऽनुविधीयते ।
तदस्य हरति प्रज्ञा वायुर्नावमिवाम्भसि ॥२।६७॥
तस्माद्यस्य महावाहो निगृहीतानि सर्वश ।
इन्द्रियाणीन्द्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता ॥२।६८॥
या निशा सर्वभूताना तस्या जागर्ति सयमी ।
यस्या जाग्रति भूतानि सा निशा पश्यतो मुने ॥२।६९॥

—सुखानुशयी संस्कारः कामः । प्रतिकूलसयोगलक्षणो दु.खानुशयी संस्कारः क्रोधः । सङ्घात्मक-संस्कारसहयोगनित्यौ हीमौ सस्कारौ भवतः । तयोर्विरुद्धसयोग· समोहं जनयति । अन्योन्यप्रत्याघातात् सस्काराणामुपमर्द्दः सम्मोहः । सस्कारस्वरूपयाथार्थ्यविच्छेदात् सस्कारोपजनित स्मृतिर्ज्ञान विभ्रंशते । अनन्तवासनासंस्कारजनितानि भूयासि स्मृतिज्ञानान्येव च विज्ञानबुद्धिरूपारम्भणानि भवन्ति । यावन्तो-ऽनुभवा. परिवर्द्धन्ते, तावदस्य विज्ञानं प्रतिफलित भवति । स्मरणाना विज्ञानस्वरूपाधायकत्वात् । तथा च स्मरणनाशाद् बुद्धिभ्रंश· । ततः कर्तव्याकर्तव्यविवेकनाशात् सर्वो लोको विषीदति । तस्मादा-सक्तिः श्रेयसे नास्ति १—विषयाभिध्यानम् । २—विषयाभिषङ्गः । ३—काम. । ४—क्रोध· । ५—संमोहः । ६—स्मृतिविभ्रमः । ७—बुद्धिनाशः । ८—प्रणाशः ।

*विधेयात्मेति—पराचः कामाननुयन्ति बालास्ते मृत्योर्यन्ति विततस्य पाशम् ।
अथ धीरा अमृतत्वं विदित्वा ध्रुवमध्रुवेष्विह प्रार्थयन्ते ॥१॥
कामान् यः कामयते मन्यमानः कामभिर्जायते तत्र तत्र ।
पर्य्याप्तकामस्य कृतात्मनस्तु इहैव सर्वे प्रविलीयन्ति कामा ॥२॥
(मुण्डकोपनिषदि)

योगमनारुरुक्षुरयं सर्वो लोक —अकृतात्मा । योगारूढः कृतात्मा । आरुरुक्षुर्विधेयात्मा । विकारैकान्तनिरसनान्निर्मलीभावः प्रसादः ।

विज्ञानमानन्दं ब्रह्म । प्रत्यक् पराग् ब्रह्म-विद्या—सा द्वेधा—ज्ञानं च विज्ञानं च । विज्ञानविद्यया विषयानन्दः समृद्धिः । शान्तानन्दस्यानुभवो नास्ति—अनैन्द्रियकत्वात् । विषयानन्दस्यानुभवो भवति, ऐन्द्रियकत्वात् । अत एव सोऽनुभवः सुख नाम । क्षणिक च तत्सुखम् । ब्रह्मणि कर्म्मपृथक्त्वरूपस्या-नन्दस्य क्षणिकत्वात् । सद्यः कर्म्मावरणात् सुखानुभवो विलीयते । शान्तिः सुस्थिरा, आत्मानन्दत्वात् ।

(२) (प्रेयोऽनासक्तिमूला)—दु खेष्वनुद्विग्नमना सुखेषु विगतस्पृह ।
वीतरागभयक्रोध स्थितधीर्मुनिरुच्यते ॥२।५६॥

(३) (श्रेयोऽनासक्तिमूला)—य सर्वत्रानभिस्नेहस्तत्तत् प्राप्य शुभाशुभम् ।
नाभिनन्दति न द्वेष्टि तस्य प्रज्ञा प्रतिष्ठिता ॥२।५७॥

(४) (तृप्तिमूला)—यदा सहरते चाय कूर्म्मोऽङ्गानीव सर्वश ।
इन्द्रियाणीन्द्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता ॥२।५८॥

(५) (अनशनतपोमूला)—विषया विनिवर्त्तन्ते निराहारस्य देहिन ।
रसवर्ज रसोऽप्यस्य पर दृष्ट्वा निवर्तते ॥२।५९॥

(६) (इन्द्रियवशीकारमूला)—यततो ह्यपि कौन्तेय पुरुषस्य विपश्चित ।
इन्द्रियाणि प्रमाथीनि हरन्ति प्रसभ मन ॥२।६०॥
तानि सर्वाणि सयम्य युक्त आसीत मत्पर ।
वशे हि यस्येन्द्रियाणि तस्य प्रज्ञा प्रतिष्ठिता ॥२।६१॥

६—बुद्धियोगप्रतिबन्धकधर्म्माः ।

ध्यायतो* विषयान्[१] पुस सङ्गस्तेषूपजायते[२]† ।
सङ्गात् सजायते काम [३] कामात् [४]क्रोधोऽभिजायते ॥२।६२॥

(पूर्व पृष्ठ शेषः) अधिष्ठान तथा कर्ता करण च पृथग्विधम् ।
विविधाश्च पृथक् चेष्टा दैव चैवात्र पञ्चमम् ॥१॥
शरीरवाङ्मनोभिर्यत् कर्म्म प्रारभते नर. ।
न्याय्यं वा विपरीत वा पञ्चैते तस्य हेतवः ॥२॥

इति पञ्चहेतुपरिग्रह क्षोभ । प्रवृत्तावुद्योगो मानस· क्षोभ । यत्नातिशयव्यग्रता उद्योग । उत्थिताकाङ्क्षालक्षणप्रवृत्ते क्षोभत्वाभावेऽपि उत्थाप्याकाङ्क्षालक्षणस्योद्योगस्य क्षोभत्व स्थितप्रज्ञता-विरोधित्वम् । तदभाव. स्थितप्रज्ञता । अन्नभोगेच्छापूर्त्तौ कृतकृत्यतानन्दस्तृप्ति । इत्थ चतुर्विधा स्थितप्रज्ञता युक्तस्य सिद्धरूपा भवति । अथोत्तरे द्वे साध्यरूपे युञ्जानस्थे भवत. ॥५॥

*ध्यायतो विषयानिति—मनसो विषयाकाराकारितत्व वासना नाम सस्कार· । स्वजनितसस्कार-द्वारा विषये मनसो बन्धनमासक्ति । मनसानुभवजन्यसस्कारस्याधानेऽनुभवस्य चिरकालिकत्व हेतु । तच्च न सभवति-सकल्पविकल्पात्मकस्य मनसः क्षणिकपरिग्रहपरित्यागलक्षणत्वात् । तस्माद्बुद्धिसह-कृतस्य मनसः सस्काराधायकत्व वाच्यम् । सा बुद्धिरपि द्विविधा—उपेक्षाबुद्धिरपेक्षाबुद्धिश्च । मनो-बुद्धचो सहयोगे बुद्धचा मनोधीनत्वे-उपेक्षा । मनसो बुद्धचधीनत्वे त्वपेक्षा । तत्रोपेक्षाबुद्धिसह-कृतस्यापि मनस सस्काराधायकत्व न दृश्यते । अपेक्षाबुद्धिसहकारे तु बुद्धचा विषयग्रहणस्य चिरकालि-कत्वात् सहकृतस्य मनसश्चिरकालिकत्वमुपपद्यते । तत्र बुद्धेर्विषयाकारितापरिणामाभावेऽपि मनस. सयुक्तरूपग्राहित्वस्वाभाव्याद्—विषयाकाराकारितत्व भवतीति सस्कारो जायते । अथ यदाकारा-कारितत्वं मनस , तस्मिन् विषये बन्धो भवति, सैवासक्तिर्नाम । तथा च अविद्याबुद्धिसहकृतेन मनसा चिरकालिक विषयानुचिन्तनमनुध्यानम् । तदासक्तिहेतुत्वादासक्ति· । प्रज्ञाने विज्ञानानुष्वङ्गोऽनुध्यानम् । अविद्यारूपयाऽपेक्षाबुद्धचा मनोगृहीतार्थविषयक चिरपरिग्रहणमनुध्यानम् ।

†सङ्गस्तेषूपजायते—इति—चिरकालिको मानसो विषयसयोगो बन्धनात्मकः सङ्ग । मनसा-कारिते विषये बहिर्धा मनसो जिघृक्षा काम. । तत कामसिद्धिप्रतिबन्धके क्रोध· । अनुकूलसंयोगलक्षण —

क्रोधाद् भवति समोह [५] समोहात् [६]स्मृतिविभ्रम ।
स्मृतिभ्रशाद् [७]बुद्धिनाशो बुद्धिनाशात् प्रणश्यति ॥२।६३॥

७—रागद्वेषजनितवासनामयकषायनाशे बुद्धिप्रसादाद्विमलबुद्धिलक्षणस्य बुद्धियोगस्य ब्राह्मस्थिति-हेतुत्वम् ।

रागद्वेषवियुक्तैस्तु विषयानिन्द्रियैश्चरन् ।
आत्मवश्यैर्विधेयात्मा प्रसादमधिगच्छति ॥२।६४॥
प्रसादे सर्वदु खाना हानिरस्योपजायते
प्रसन्नचेतसो ह्याशु बुद्धि पर्य्यवतिष्ठते ॥२।६५॥
नास्ति बुद्धिरयुक्तस्य न चायुक्तस्य भावना ।
न चाभावयत शान्तिरशान्तस्य कुत सुखम् ॥२।६६॥
इन्द्रियाणा हि चरता यन्मनोऽनुविधीयते ।
तदस्य हरति प्रज्ञा वायुर्नावमिवाम्भसि ॥२।६७॥
तस्माद्यस्य महाबाहो निगृहीतानि सर्वश ।
इन्द्रियाणीन्द्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता ॥२।६८॥
या निशा सर्वभूताना तस्या जागर्ति सयमी ।
यस्या जाग्रति भूतानि सा निशा पश्यतो मुने ॥२।६९॥

—सुखानुशयी संस्कारः कामः । प्रतिकूलसयोगलक्षणो दु.खानुशयी संस्कारः क्रोध । सङ्गात्मक-सस्कारसहयोगनित्यौ हीमौ सस्कारौ भवतः । तयोर्विरुद्धसयोगः समोहं जनयति । अन्योन्यप्रत्याघातात् सस्काराणामुपमर्दः सम्मोहः । सस्कारस्वरूपयाथार्थ्यविच्छेदात् सस्कारोपजनित स्मृतिर्ज्ञानं विभ्रशते । अनन्तवासनासस्कारजनितानि भूयासि स्मृतिज्ञानान्येव च विज्ञानबुद्धिरूपारम्भणानि भवन्ति । यावन्तो-ऽनुभवा. परिवर्द्धन्ते, तावदस्य विज्ञान प्रतिफलित भवति । स्मरणानां विज्ञानस्वरूपाधायकत्वात् । तथा च स्मरणनाशाद् बुद्धिभ्रश. । ततः कर्तव्याकर्तव्यविवेकनाशात् सर्वो लोको विषीदति । तस्मादा-सक्तिः श्रेयसे नास्ति १—विषयाभिध्यानम् । २—विषयाभिषङ्गः । ३—काम: । ४—क्रोधः । ५—समोहः । ६—स्मृतिविभ्रमः । ७—बुद्धिनाशः । ८—प्रणाशः ।

*विधेयात्मेति—पराच कामाननुयन्ति बालास्ते मृत्योर्यन्ति विततस्य पाशम् ।
अथ धीरा अमृतत्वं विदित्वा ध्रुवमध्रुवेष्विह प्रार्थयन्ते ॥१॥
कामान् य. कामयते मन्यमानः कामभिर्जायते तत्र तत्र ।
पर्य्याप्तकामस्य कृतात्मनस्तु इहैव सर्वे प्रविलीयन्ति कामाः ॥२॥
(मुण्डकोपनिषदि)

योगमनारुरुक्षुरयं सर्वो लोक '—अकृतात्मा । योगारूढः कृतात्मा । आरुरुक्षुर्विधेयात्मा । विकारैकान्तनिरसनान्निर्मलीभावः प्रसाद. ।

विज्ञानमानन्दं ब्रह्म । प्रत्यक् पराग् ब्रह्म-विद्या—सा द्वेधा—ज्ञानं च विज्ञानं च । विज्ञानविद्यया विषयानन्दः समृद्धिः । शान्तानन्दस्यानुभवो नास्ति—अनैन्द्रियकत्वात् । विषयानन्दस्यानुभवो भवति, ऐन्द्रियकत्वात् । अत एव सोऽनुभवः सुखं नाम । क्षणिकं च तत्सुखम् । ब्रह्मणि कर्म्मपृथक्त्वरूपस्या-नन्दस्य क्षणिकत्वात् । सद्यः कर्म्मावरणात् सुखानुभवो विलीयते । शान्तिः सुस्थिरा, आत्मानन्दत्वात् ।

आपूर्य्यमाणमचलप्रतिष्ठ समुद्रमाप प्रविशन्ति यद्वत् ।
तद्वत् कामा य प्रविशन्ति सर्वे स शान्तिमाप्नोति न कामकामी ॥२।७०॥
विहाय* कामान् य सर्वान् पुमाश्चरति नि स्पृह ।
निर्ममो निरहकार स शान्तिमधिगच्छति ॥२।७१॥
एषा† ब्राह्मी स्थिति पार्थ ! नैना प्राप्य विमुह्यति ।
स्थित्वास्यामन्तकालेऽपि ब्रह्मनिर्वाणमृच्छति ॥२।७२॥

इति द्वितीयाध्यायः। सेय योगनिष्ठायामनुशोकानौचित्योपनिषत् ।

---

*विहाय कामान् य· सर्वानिति—द्विविधा हीमे लोका भवन्ति—अन्तर्मुखा आत्मपरायणाः संयमिनः। ते ज्ञानेनात्मानं गृह्णानाः शान्तिलक्षणमानन्द लभन्ते किन्तु नानुभवन्ति। अथ विषयपरायणा बहिर्मुखा· साधारणाः। ते ज्ञानेन विषयान् गृह्णाना. समृद्धिलक्षणमानन्दमनुभवन्ति सुख नाम।

†एषा ब्राह्मी स्थितिरिति—ब्रह्मकर्म्मणी द्वे तत्त्वे। ब्रह्म द्विविधम्—प्रत्यक् च पराक् च। प्रत्यग्विषया विद्या ज्ञानम्। परागविषया तु विज्ञान विविधत्वात्। उभयथा श्रूयते—"सत्य ज्ञानमनन्त ब्रह्म" "नित्य विज्ञानमानन्दं ब्रह्मेति"। उभयं चेदं ज्ञान विज्ञानं चानन्दहेतुः—अविनाभूतत्वात्। तथा चानन्दो द्विविधः—आत्मानन्दः, विषयानन्दश्चेति। तत्रात्मानन्दः शान्तिः। तस्यानुभवो नास्ति—अनिन्द्रियत्वात्, अनुभवस्येन्द्रियसापेक्षत्वात्। अथ विषयानन्दः समृद्धि—तस्यानुभवः सुखम्। स क्षणिकः, कर्म्मविषये आनन्दप्रकाशप्रतिबन्धकस्य कर्म्मावरणस्य क्षणिकविघातेनात्मानन्दविषयानन्दयोरेकीभावस्य क्षणिकत्वात्, विषयावच्छिन्नानन्दस्यान्तःकरणवृत्त्यवच्छिन्नानन्देनैकीभावस्य सुखानुभवरूपत्वात्। तथा चानन्दहेतुद्वैविध्यादानन्दसापेक्ष्यवैशेष्याच्च द्विविधा विधेयात्मानो भवन्ति—समृद्धानन्दसापेक्षाः, शान्तानन्दसापेक्षाश्च—इति ॥

(३) बुद्धियोगिनः कर्म्मपरित्यागानौचित्योपनिषत्

१—कर्म्मसन्यास-कर्म्मारम्भलक्षणयोः साख्ययोगयोर्योगस्यैव श्रेयस्त्वम् ।

अर्जुन उवाच

ज्यायसी चेत् कर्म्मणस्ते मता बुद्धिर्जनार्दन ।
तत् कि कर्म्मणि घोरे मा नियोजयसि केशव ॥३।१॥
व्यामिश्रेणेव वाक्येन बुद्धि मोहयसीव मे ।
तदेक वद निश्चित्य येन श्रेयोऽहमाप्नुयाम् ॥३।२॥

श्रीभगवानुवाच

लोके ऽस्मिन् द्विविधा निष्ठा पुरा प्रोक्ता मयानघ ।
ज्ञानयोगेन [*]साख्याना कर्म्मयोगेन योगिनाम् ॥३।३॥

२—[१] नैष्कर्म्योपायत्वात्, [२]कर्म्मसन्यासवैयर्थ्यात्, [३]कर्म्मपरित्यागाशक्यत्वात्, [४]प्रकृतिसिद्धत्वात्, अनासक्तकर्म्मयोगवैशेष्यात्[५], कर्म्मारम्भकर्म्मसन्यासयो [६] कर्म्मारम्भश्रैष्ठचात्, [७]जीवन-निर्वाहकत्वाच्चेति सप्तधा नाप्राप्तकर्म्मणः परित्यागाशक्यत्वम् ।

न कर्म्मणामनारम्भान्नैष्कर्म्य[१] पुरुषोऽश्नुते ।
न च सन्यस[२]नादेव सिद्धि समधिगच्छति ॥३।४॥
न[३] हि कश्चित् क्षणमपि जातु तिष्ठत्यकर्म्मकृत् ।
कार्य्यते[४] ह्यवश कर्म सर्व प्रकृतिजैर्गुणै ॥३।५॥
[५]कर्म्मेन्द्रियाणि सयम्य य आस्ते मनसा स्मरन् ।
इन्द्रियार्थान् विमूढात्मा मिथ्याचार स उच्यते ॥३।६॥
[६]यस्त्विन्द्रियाणि मनसा नियम्यारभतेऽर्जुन ।
कर्म्मेन्द्रियै कर्म्मयोगमसक्त स विशिष्यते ॥३।७॥

---

[*] साख्यानामिति—शरीराभेदेन प्रतीतेऽस्मिन्नात्मनि सतामनेकेषा पदार्थानां पृथक्त्वेन सख्यानात्, तेभ्यः संख्यातपदार्थेभ्य· पृथक्त्वेनात्मन परिज्ञानं संख्यातः प्राप्तत्वात् साख्यम् । बहून् संख्याय तत्रैकस्यात्मत्वेन निर्धारण साख्यम् । तथा चाहत्वेन प्रतिपन्नस्य देहिन प्रकृतिपुरुषयोर्विवेकेन ज्ञानं साख्यम् ।

नियत कुरु कर्म्म त्व कर्म्म ज्यायो ह्यकर्म्मण ।
[७]शरीरयात्रापि च ते न प्रसिद्धचेदकर्म्मण ॥३।८॥

३—यज्ञार्थकर्म्मणामनासक्तिकृतत्वादबन्धनत्वादवश्यकर्तव्यत्वम् । यज्ञकर्म्मणोऽवश्यकर्तव्यत्वात्परित्यागानौचित्यम् ।

यज्ञार्थात्कर्म्मणोऽन्यत्र लोकोऽय कर्म्मबन्धन ।
तदर्थ कर्म्म कौन्तेय ! मुक्तसङ्ग समाचर ॥३।९॥
सहयज्ञा प्रजा सृष्ट्वा पुरोवाच प्रजापति ।
अनेन प्रसविष्यध्वमेष वोऽस्त्विवष्टकामधुक् ॥३।१०॥
देवान् भावयतानेन ते देवा भावयन्तु व ।
परस्पर भावयन्त श्रेय परमवाप्स्यथ ॥३।११॥
इष्टान् भोगान् हि वो देवा दास्यन्ते यज्ञभाविता ।
तैर्दत्तानप्रदायैभ्यो यो भुङ्क्ते स्तेन एव स ॥३।१२॥
यज्ञशिष्टाशिन सन्तो मुच्यन्ते सर्वकिल्विषै ।
भुञ्जते ते त्वघ पापा ये पचन्त्यात्मकारणात् ॥३।१३॥
अन्नाद् भवन्ति भूतानि* पर्जन्यादन्नसभव ।
यज्ञाद् भवति पर्जन्यो यज्ञ कर्म्मसमुद्भव ॥३।१४॥
कर्म्म ब्रह्मोद्भव विद्धि ब्रह्माक्षरसमुद्भवम् ।
तस्मात् सर्वगत ब्रह्म† नित्य यज्ञे प्रतिष्ठितम् ॥३।१५॥
एव प्रवर्तित चक्र नानुवर्त्तयतीह य ।
अघायुरिन्द्रियारामो मोघ पार्थ स जीवति ॥३।१६॥

४—उपेक्षाबुद्धिसहकृतकर्मणामनासक्तिकृतत्वादबन्धनत्वाददुष्टत्वम् । आत्मारामस्यात्मपरायणस्य विषयानासक्तस्य बहिर्लोकयात्रायामुपेक्षाबुद्धौ, अपेक्षाबुद्धिमूलकसंस्कारोदयासभवादबन्धनस्यात्मज्ञानौपयिकस्य कर्म्मण. परित्यागानौचित्यम् ।

यस्त्वात्मरतिरेव स्यादात्मतृप्तश्च मानव ।
आत्मन्येव च सतुष्टस्तस्य कार्य्य न विद्यते ॥३।१७॥
नैव तस्य कृतेनार्थो नाकृतेनेह कश्चन ।
न चास्य सर्वभूतेषु कश्चिदर्थव्यपाश्रय ॥३।१८॥
तस्मादसक्त सतत कार्य्य कर्म्म समाचर ।
असक्तो ह्याचरन् कर्म्म परमाप्नोति पूरुष ॥३।१९॥
कर्म्मणैव हि ससिद्धिमास्थिता जनकादय ।

*** १ अक्षराद्—ब्रह्म । २ ब्रह्मण—कर्म्म । ३ कर्म्मणो—यज्ञः । ४ यज्ञात्—पर्जन्यः । ५ पर्जन्याद्—अन्नम् । ६ अन्नाद्—भूतानि । ७ भूतानि—इमानि सर्वाणि ।**

† ब्रह्म नित्यं यज्ञे प्रतिष्ठितमिति—अक्षरवदक्षरमयं ब्रह्म शश्वत् कर्म्माणि जनयद् यज्ञ जनयति । तस्माद् ब्रह्मेदं यज्ञे प्रतिष्ठितम् ।

५—विद्वत्पामराद्युच्चावचसर्वविधलोकस्थितिनिर्वाहो लोकसग्रह । लोकसग्रहकर्तव्यतादृष्ट्या कृतस्य कर्म्मणोऽनासक्तिहेतुत्वादबन्धनत्वात् परित्यागानौचित्यम् ।

५—लोकसग्रहमेवापि सपश्यन् कर्त्तुमर्हसि ॥३।२०॥
यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जन ।
स यत्प्रमाण कुरुते लोकस्तदनुवर्त्तते ॥३।२१॥
न मे पार्थास्ति कर्तव्य त्रिषु लोकेषु किञ्चन ।
नानवाप्तमवाप्तव्य वर्त एव च कर्म्मणि ॥३।२२॥
यदि ह्यह न वर्त्तेय जातु कर्म्मण्यतन्द्रित ।
मम वर्त्मानुवर्तन्ते मनुष्या पार्थ ! सर्वश ॥३।२३॥
उत्सीदेयुरिमे लोका न कुर्य्या कर्म्म चेदहम् ।
सकरस्य च कर्त्ता स्यामुपहन्यामिमा प्रजा ॥३।२४॥
सक्ता कर्म्मण्यविद्वासो यथा कुर्वन्ति भारत ।
कुर्य्याद्विद्वास्तथाऽसक्तश्चिकीर्षुर्लोकसग्रहम् ॥३।२५॥
न बुद्धिभेद जनयेदज्ञाना कर्म्मसङ्गिनाम् ।
जोषयेत् सर्वकर्म्माणि विद्वान् युक्त समाचरन् ॥३।२६॥

६—प्रकृतिसिद्धसहजगुणकर्म्मण्यनासक्तौ कर्तृत्वानभिमानादबन्धनत्वात्परित्यगायोग्यत्वम् ।

६—प्रकृते क्रियमाणानि गुणै कर्म्माणि* सर्वश ।
अहकारविमूढात्मा कर्त्ताहमिति मन्यते ॥३।२७॥
तत्त्ववित्तु महाबाहो गुणकर्म्मविभागयो ।
गुणा गुणेषु वर्तन्त इति मत्वा न सज्जते ॥३।२८॥
प्रकृतेर्गुणसमूढा सज्जन्ते गुणकर्म्मसु ।
तानकृत्स्नविदो मन्दान् कृत्स्नविन्न विचालयेत् ॥३।२९॥
मयि सर्वाणि कर्म्माणि सन्यस्याध्यात्मचेतसा ।
निराशीर्निर्ममो भूत्वा युध्यस्व विगतज्वर ॥३।३०॥

७—कर्म्मत्यागानौचित्यस्य भगवन्मतत्वप्रतिज्ञानम् ।

७—ये मे मतमिद नित्यमनुतिष्ठन्ति मानवा ।
श्रद्धावन्तोऽनसूयन्तो मुच्यन्ते तेऽपि कर्म्मभि ॥३।३१॥

*** कर्म्माणीति—वीर्य्यं विसर्ग आरम्भो यज्ञ आत्मार्थसस्कृती ।**
इत्येतान्येव कर्म्माणि षड्विधानि प्रचक्षते ॥१॥
वीर्य्यं कर्म्मेति सभये (७।४।१) वाजिब्राह्मण उच्यते ।
आत्मनस्तु मन.प्राणवाचामन्योन्ययोगतः ॥२॥
भूतभावोद्भवकरो विसर्ग. कर्म्मसज्ञक ।
प्रवृत्तिकर्म्म वाग्बुद्धिशरीरारम्भण पृथक् ॥३॥
यज्ञः श्रेष्ठतमं कर्म्मेत्याम्नातं याजुषश्रुतौ ।
धी-भो-गे (९।४।३) विश्वकर्म्माणि मतान्यग्निरय चितः ॥४॥

ये त्वेतदभ्यसूयन्तो नानुतिष्ठन्ति मे मतम् ।
सर्वज्ञानविमूढास्तान् विद्धि नष्टानचेतस ॥३।३२॥

* इति आत्माश्रितसाम्ययोग·

· आत्माश्रितसाम्ययोगेति—अव्ययस्यात्मनो द्वे भक्ती—विद्या च कर्म्म च। विद्यारसो ज्ञानम्, कर्म्मरस क्रिया। अनासक्ति निष्काम निवृत्त कर्म्म कृतमावरणबन्धन नाप्नोति, तेन ज्ञान नापैति। तेन ज्ञानकर्म्मणो साम्ययोग; निष्ठासाम्ययोग, स आत्माश्रितसाम्ययोग। कर्म्मणाम-निवार्य्यत्वात् केषाचित्कर्म्मणामबन्धनत्वाच्च कर्म्मपरित्यागानौचित्यम्-इत्यात्माश्रितसाम्ययोगोपनिषत्। कर्म्मणामनिवार्य्यत्व पञ्चधा। पञ्चविधानां कर्म्मणामबन्धनत्वम्। इत्युपनिषत्।

(४) बुद्धियोगप्रतिबन्धकदोषपरित्यागौचित्योपनिषत्

१—इन्द्रियधर्म्मत्वादनात्मधर्म्मयो· प्रकृत्यधिष्ठानयो रागद्वेषयोरासक्तिहेतुत्वाद् बुद्धियोगपरिपन्थित्वम् ।

सदृश चेष्टते स्वस्या प्रकृतेर्ज्ञानवानपि ।
प्रकृति यान्ति भूतानि निग्रह किं करिष्यति ॥३।३३॥
इन्द्रियस्येन्द्रियस्यार्थे रागद्वेषौ व्यवस्थितौ ।
तयोर्न वशमागच्छेत्तौ ह्यस्य परिपन्थिनौ ॥३।३४॥
श्रेयान् स्वधर्म्मो विगुण परधर्म्मात्स्वनुष्ठितात् ।
स्वधर्म्मे निधन श्रेय परधर्म्मो भयावह ॥३।३५॥

२—इन्द्रियमनोबुद्ध्यधिष्ठानयो रागद्वेषयोर्बुद्धिद्वारा प्रत्यगात्मावरणत्वाद्दूषितस्यात्मनः पारवश्येनानिष्टकर्म्माचरणे प्रवृत्तिः ।

अर्जुन उवाच

अथ केन प्रयुक्तोऽय पाप चरति पूरुष ।
अनिच्छन्नपि वार्ष्णेय ! बलादिव नियोजित ॥३।३६॥

श्रीभगवानुवाच

काम एष क्रोध एष रजोगुणसमुद्भव ।
महाशनो महापाप्मा· विद्ध्येनमिह वैरिणम् ॥३।३७॥
धूमेनाव्रियते वह्निर्यथादर्शो मलेन च ।
यथोल्बेनावृतो गर्भस्तथा तेनेदमावृतम् ॥३।३८॥
आवृत ज्ञानमेतेन ज्ञानिनो नित्यवैरिणा ।
कामरूपेण कौन्तेय दुष्पूरेणानलेन च ॥३।३९॥

महापाप्मेति—रागद्वेषौ कामक्रोधौ पाप्मा। आत्मविद्याभागस्य रश्मिभूत ज्ञान बुद्धौ मनसि इन्द्रियेषु चानुवर्तन्ते। ज्ञाने च रागद्वेषौ पाप्मानौ संसृष्टौ ज्ञानं विज्ञानं च नाशयत.। तत्रैतौ पाप्मानौ प्रागिन्द्रियेषु ततो मनसि ततो बुद्धौ तत आत्मनि च ज्ञानं मलिनयतः। बुद्धिपर्य्यन्तमनुगतयोर्यदि बुद्धे परतो रागद्वेषौ सस्तम्भयति, तर्हि सतोरपि रागद्वेषयोरात्मापवारकत्वं नोपपद्यते—इत्युपनिषत् ॥

इन्द्रियाणि मनो बुद्धिरस्याधिष्ठानमुच्यते ।
एतैर्विमोहयत्येष ज्ञानमावृत्य देहिनम् ॥३।४०॥

३—इन्द्रियमनोबुद्धिनिग्रहणाद्रागद्वेषासक्तिनिवृत्ति ।

तस्मात्त्वमिन्द्रियाण्यादौ नियम्य भरतर्षभ ।
पाप्मान प्रजहि ह्येन ज्ञानविज्ञाननाशनम् ॥३।४१॥
इन्द्रियाणि पराण्याहुरिन्द्रियेभ्य पर मन ।
मनसस्तु परा बुद्धिर्यो बुद्धे परतस्तु स ॥३।४२॥
एव बुद्धे पर बुद्ध्वा सस्तभ्यात्मानमात्मना ।
जहि शत्रु महाबाहो कामरूप दुरासदम् ॥३।४३॥

इति तृतीयाध्याय ॥२॥

(५) बुद्धियोगस्य भगवन्मतसिद्धसनातनत्वोपनिषत्

१—राजर्षिषु सनातनबुद्धियोगविद्याया भगवत्प्रवर्तितत्वम् ।
साम्ययोगस्य ज्ञानयोगकर्म्मयोगाभ्यामतिप्राचीनत्वम् ॥

श्रीभगवानुवाच

इम विवस्वते योग प्रोक्तवानहमव्ययम् ।
विवस्वान् मनवे प्राह मनुरिक्ष्वाकवे ऽब्रवीत् ॥४।१॥
एव परम्पराप्राप्तमिम राजर्षयो विदु ।
स कालेनेह महता योगो नष्ट परतप ! ॥४।२॥
स एवाय मया तेऽद्य योग प्रोक्त पुरातन ।
भक्तोऽसि मे सखा चेति रहस्य ह्येतदुत्तमम् ॥४।३॥

२—नानादेहधारिण. कृष्णस्याच्युतभगवत्त्वाज्जातिस्मरत्वम् ।

अर्जुन उवाच

अपर भवतो जन्म पर जन्म विवस्वत ।
कथमेतद्विजानीया त्वमादौ प्रोक्तवानिति ॥४।४॥

श्रीभगवानुवाच

बहूनि मे व्यतीतानि जन्मानि तव चार्जुन ।
तान्यह वेद* सर्वाणि न त्व वेत्थ परतप ॥४।५॥

---

*तान्यह वेद सर्वाणीति—भाग० १०।३
अदृष्ट्वान्यतम लोके शीलौदार्यगुणैः समम्
अहं सुतो वामभव पृश्निगर्भ इति श्रुत ॥४१॥
तयोर्वा पुनरेवाहमदि यामास कश्यपात् ।
उपेन्द्र इति विख्यातो यामनत्वाच्च वामनः ॥४२॥
तृतीयेऽस्मिन् भवेऽह वै तेनैव वपुषाथ वाम् ।
जातो भूयस्तयोरेव सत्यं मे व्याहृत सति ॥४३॥
एतद्वा दर्शित रूपं प्राग्जन्मस्मरणाय मे ।
नान्यथा मद्भवं ज्ञान मर्त्यलिङ्गेन जायते ॥४४॥
युवा वा पुत्रभावेन ब्रह्मभावेन चासकृत् ।
चिन्तयन्तौ कृतस्नेहौ यास्येथे मद्गति पराम् ॥४५॥
इत्येव समानयोरेव मातापित्रोस्त्रीण्यि जन्मान्युक्तानि ॥

३—श्रीकृष्ण*स्याधिकारिकरूपत्वात्स्वेच्छया नानाजन्मग्राहित्वं जातिस्मरत्वं च ।

अजोऽपि सन्नव्ययात्मा भूतानामीश्वरोऽपि सन् ।
प्रकृति स्वामधिष्ठाय सभवाम्यात्ममायया ॥४।६॥
यदा यदा हि धर्म्मस्य ग्लानिर्भवति भारत ।
अभ्युत्थानमधर्म्मस्य तदाऽऽत्मान सृजाम्यहम् ॥४।७॥
परित्राणाय साधूना विनाशाय च दुष्कृताम् ।
†धर्म्मसस्थापनार्थाय सभवामि युगे युगे ॥४।८॥
जन्म कर्म्म च मे दिव्यमेव यो वेत्ति तत्त्वत ।
त्यक्त्वा देह पुनर्जन्म नैति मामेति सोऽर्जुन ॥४।९॥

---

*श्रीकृष्णस्येति—श्रीकृष्णस्याश्वत्थिकजीवत्वाभाव । आधिकारिकरूपत्वम् ।
कर्म्माधीनपरवशजन्मग्रहणाभाव । स्वेच्छाधीनानेकशरीरग्रहणम् ।
†धर्मसस्थापनार्थायेति—
यदा यदेह धर्मस्य क्षयो वृद्धिश्च पाप्मन. ।
तदा तु भगवानीश आत्मान सृजते हरि· ॥भा० ९।१४।५६॥
न ह्यस्य जन्मनो हेतुः कर्म्मणो वा महीपते ।
आत्ममाया विनेशस्य परस्य द्रष्टरात्मन. ॥भा० ९।१४।५७॥

(६) बुद्धियोगाविरोधिकर्म्मयोगज्ञानयोगोपादेयत्वोपनिषत्

१—कर्म्मण उपासनाया ज्ञानस्य चाव्ययाभिगामित्वे सत्यबन्धनत्वम् ।

वीतरागभयक्रोधा* मन्मया मामुपाश्रिता ।
वहवो ज्ञानतपसा पूता मद्भावमागता ॥४।१०॥
ये यथा मा प्रपद्यन्ते तास्तथैव भजाम्यहम् ।
मम वर्त्मानुवर्तन्ते मनुष्या पार्थ सर्वश ॥४।११॥
काङ्क्षन्त कर्म्मणा सिद्धि यजन्त इह देवता ।
क्षिप्र हि मानुपे लोके सिद्धिर्भवति कर्म्मजा ॥४।१२॥

२—चातुर्वर्ण्यकर्म्मणामव्ययात्मोपजनितत्वेनाबन्धनत्वम् ।

चातुर्वर्ण्य मया सृष्ट गुणकर्म्मविभागश ।
तस्य कर्तारमपि मा विद्धचकर्त्तार†मव्ययम् ॥४।१३॥
न मा कर्म्माणि लिम्पन्ति न मे कर्म्मफले स्पृहा ।
इति मा योऽभिजानाति कर्म्मभिर्न स बध्यते ॥४।१४॥
एव ज्ञात्वा कृत कर्म्म पूर्वैरपि मुमुक्षुभि ।
कुरु कर्म्मैव तस्मात्त्व पूर्वै पूर्वतर कृतम् ॥४।१५॥

३—त्याज्यकर्म्मोपादेयकर्म्मविवेके ज्ञानानुस्यूतस्य निवृत्तकर्म्मणो ज्ञानाग्निदग्धत्वात् सस्काराजनकत्वेनाबन्धनत्वम् ।

कि कर्म्म‡ किमकर्म्मेति कवयोऽप्यत्र मोहिता ।
तत्ते कर्म्म प्रवक्ष्यामि यज्ज्ञात्वा मोक्ष्यसेऽशुभात् ॥४।१६॥
कर्म्मणो ह्यपि बोद्धव्य बोद्धव्य च विकर्म्मण ।
अकर्म्मणश्च बोद्धव्य गहना कर्म्मणो गति ॥४।१७॥

---

* वीतरागेति—रागद्वेषभयादयः पाप्मान—आत्मज्योतिषो ज्ञानस्यावरकत्वात् । सत्यम्, तप , ब्रह्मचर्य्यम्, ज्ञानमिति पावनानि पवित्राणि—आत्मानावरकत्वात् । आत्मज्योतिराप्यायकत्वाच्च ॥

† विद्धचकर्तारमव्ययमिति—सूर्य्यरश्मीना जलतापकत्वेऽप्यतापकत्वम् । न जलतापाय स्पृहा, न जलस्य सूर्य्यरश्मौ लेप । अक्लेदात् । आत्मविदूषकपाप्मनामसहयोगेन कृताना कर्म्मणामबन्धनत्वम् ॥

‡ कि कर्म्मेति—

१—क्रतु , कृति , यत्न., अध्यवसाय । आत्मबलत्यागाय मनोव्यापार । (आग्रेमपृष्ठे)

कर्म्मण्यकर्म्म य पश्येदकर्म्मणि च कर्म्म य ।
स बुद्धिमान् मनुष्येषु स युक्त कृत्स्नकर्म्मकृत् ।।४।१८।।
यस्य सर्वे समारम्भा कामसङ्कल्पवर्जिता ।
ज्ञानाग्निदग्धकर्म्माण तमाहु पण्डित बुधा ।।४।१९।।
त्यक्त्वा कर्म्मफलासङ्ग नित्यतृप्तो निराश्रय ।
कर्म्मण्यभिप्रवृत्तोऽपि नैव किञ्चित् करोति स ।।४।२०।।
निराशीर्यतचित्तात्मा त्यक्तसर्वपरिग्रह ।
शारीर केवल कर्म्म कुर्वन्नाप्नोति किल्विषम् ।।४।२१।।
यदृच्छालाभसतुष्टो द्वन्द्वातीतो विमत्सर ।
सम सिद्धावसिद्धौ च कृत्वापि न निबद्धचते ।।४।२२।।

४—ब्रह्मार्पणयज्ञः[१], दैवयज्ञ.[२], ब्रह्माग्नियज्ञ·[३], सयमाग्नियज्ञ [४], इन्द्रियाग्नियज्ञ.[५], योगाग्नियज्ञः[६], द्रव्ययज्ञ [७], तपोयज्ञः[८], योगयज्ञ [९], स्वाध्याययज्ञ [१०], ज्ञानयज्ञ [११], प्राणायामयज्ञः[१२], प्राणयज्ञः[१३]—इति त्रयोदशविधानि अबन्धनानि यज्ञकर्म्माणि ।

गतसङ्गस्य मुक्तस्य ज्ञानावस्थितचेतस ।
यज्ञायाचरत कर्म्म समग्र प्रविलीयते ।।४।२३।।
ब्रह्मार्पण ब्रह्महविर्ब्रह्माग्नौ ब्रह्मणा हुतम् ।।
ब्रह्मैव तेन गन्तव्य ब्रह्मकर्म्मसमाधिना ।।४।२४।।
दैवमेवापरे यज्ञ योगिन पर्य्युपासते ।
ब्रह्माग्नावपरे यज्ञ यज्ञेनैवोपजुह्वति ।।४।२५।।

(पूर्वपृष्ठशेषः) २—क्षणकर्म्म—चेष्टा । अन्यत्राधानार्थं स्वबलप्रयोग । अन्यथासतो बलस्यान्यथात्व क्षणः ।

३—भावकर्म्म—गमनपठनभाषणादिव्यवसायः ।

४—सस्कारकर्म्म—वासना । दोषमार्जनमतिशयाधानं हीनाङ्गपूर्तिश्चेति ।

५—विकारकर्म्म—अनव्ययमव्ययाश्रितधर्म्मम्, दोष, पाप्मा ।

६—सत्त्वकर्म्म—घटपटपुरुषादिरुत्पन्न प्राणी ।

*** कर्म्मण्यकर्म्मेति—ब्रह्म द्वेधा विवर्तते—अमृतं मृत्युश्चेति । "अन्तरं मृत्योरमृतं मृत्याव-मृतमाहितम्" इति श्रूयते । अङ्गुलि. कम्पमाना बलवद्रस । तत्र दृश्यते अङ्गुल्या क्रिया, क्रियाया वेयम-ङ्गुलीति । रसोऽयमकर्म्म, बल कर्म्म । तदाह—कर्म्मण्यकर्म्म अकर्म्मणि कर्म्मेति । अत एवाय रसः कर्म्मसम्बन्धात् त्रिविधो भवति—सत्ता—चेतना—आनन्दश्चेति । बले कर्म्मण्यधिष्ठितमन्तराहितममृतं सत्तानाम रूपम् । बलस्य कर्म्मण्यधिष्ठानममृत चेतना नाम रूपम् । चेतनाया ज्ञाने कर्म्मेद विषयत-याऽन्तर्निविष्टं भवति । अथ कर्म्मणा यावदिव न स्पृश्यते, तदिद कर्म्मण· पृथग्भूतं स्वरूपेणामृतमानन्दो नाम रूपम् । तथा चानन्द एवैक विशुद्ध ब्रह्मत्तत्त्वं कर्म्मस्पर्शास्पर्शाभ्या त्रैरूप्यं भजते ।**

तथा चैवं कर्म्मण्यकर्म्म—अकर्मणि च कर्म्म पश्यन् मृत्यु चामृतं च विवेकेन पश्यति । अमृता-वच्छेदक मृत्यु पृथक्त्वेन पश्यन् विश्वव्यापकमेकरसमेतमात्मान पश्यति । सर्वाण्येव कर्म्माणि तत्रोप-सन्नानीत्याह—कृत्स्नकर्म्मकृदिति । कर्म्मणि दृष्टा सत्ता न कर्म्मव्यामिश्रा । कर्म्मगर्भिता चेतना न कर्म्मव्यामिश्रा । तस्माद् रस एवैतानि रूपाणि-सत्ता-ज्ञानमानन्द इति ।।

श्रोत्रादीनीन्द्रियाण्यन्ये सयमाग्निषु जुह्वति ।
शब्दादीन् विषयानन्य इन्द्रियाग्निषु जुह्वति ॥४।२६॥
सर्वाणीन्द्रियकर्म्माणि प्राणकर्म्माणि चापरे ।
आत्मसयमयोगाग्नौ जुह्वति ज्ञानदीपिते ॥४।२७॥
द्रव्ययज्ञास्तपोयज्ञा योगयज्ञास्तथापरे ।
स्वाध्यायज्ञानयज्ञाश्च यतय सशितव्रता ॥४।२८॥
अपाने जुह्वति प्राण प्राणेऽपान तथाऽपरे ।
प्राणापानगती रुद्ध्वा प्राणायामपरायणा ॥४।२९॥
अपरे नियताहारा प्राणान् प्राणेषु जुह्वति ।
सर्वेऽप्येते यज्ञविदो यज्ञक्षपितकल्मषा ॥४।३०॥
यज्ञशिष्टामृतभुजो यान्ति ब्रह्म सनातनम् ।
नाय लोकोऽस्त्ययज्ञस्य कुतोऽन्य कुरुसत्तम ॥४।३१॥
एव बहुविधा यज्ञा वितता ब्रह्मणो मुखे ।
कर्म्मजान् विद्धि तान् सर्वानेव ज्ञात्वा विमोक्ष्यसे ॥४।३२॥

५—द्रव्ययज्ञापेक्षया ज्ञानयज्ञस्य कर्म्मबन्धक्षयहेतुत्वाद्, मोहोत्पत्तिप्रतिबन्धहेतुत्वाद्, आत्मनि परमात्मनि सर्वभूतसत्तानुभवहेतुत्वाच्च श्रेष्ठत्वम् ।

श्रेयान् द्रव्यमयाद्यज्ञाज्ज्ञानयज्ञ परतप ।
सर्व कर्म्माखिल पार्थ ज्ञाने परिसमाप्यते ॥४।३३॥
तद्विद्धि प्राणिपातेन परिप्रश्नेन सेवया ।
उपदेक्ष्यन्ति ते ज्ञान ज्ञानिनस्तत्त्वदर्शिन ॥४।३४॥
यज्ज्ञात्वा न पुनर्मोहमेव यास्यसि पाण्डव ! ।
येन भूतान्यशेषेण द्रक्षस्यात्मन्यथो मयि ॥४।३५॥
अपि चेदसि पापेभ्य सर्वेभ्य पापकृत्तम ।
सर्व ज्ञानप्लवेनैव वृजिन सतरिष्यसि ॥४।३६॥
यथैधासि समिद्धोऽग्निर्भस्मसात्कुरुते ऽर्जुन ।
ज्ञानाग्नि सर्वकर्म्माणि भस्मसात् कुरुते तथा ॥४।३७॥
न हि ज्ञानेन सदृश पवित्रमिह विद्यते ।
तत्स्वय योगससिद्ध कालेनात्मनि विन्दति ॥४।३८॥
श्रद्धावाँल्लभते ज्ञान तत्पर सयतेन्द्रिय ।
ज्ञान लब्ध्वा परा शान्तिमचिरेणाधिगच्छति ॥४।३९॥
अज्ञश्चाश्रद्दधानश्च सशयात्मा विनश्यति ।
नाऽय लोकोऽस्ति न परो न सुख सशयात्मन ॥४।४०॥
योगसन्यस्तकर्म्माण ज्ञानसच्छिन्नसशयम् ।
आत्मवन्त न कर्म्माणि निबध्नन्ति धनजय ॥४।४१॥
तस्मादज्ञानसभूत हृत्स्थ ज्ञानासिनात्मन ।
छित्वैन सशय योगमातिष्ठोत्तिष्ठ भारत ॥४।४२॥

इति चतुर्थोऽध्याय ॥ ४ ॥

(७) बुद्धियोगस्य कामासक्तिसंन्यासोपलक्षितकर्म्मारम्भ-लक्षणत्वात् कर्म्मयोग-ज्ञानयोगोभयात्मकत्वोपनिषत्

१—कर्म्मयोगश्रैष्ठचोपदेशे ज्ञानयज्ञश्रैष्ठचोपदेशात्संशये प्रश्नः ।

अर्जुन उवाच

सन्यास कर्म्मणा कृष्ण पुनर्योग च शससि ।
यच्छ्रेय एतयोरेक तन्मे ब्रूहि सुनिश्चितम् ॥५।१॥

२—कर्म्मयोग-ज्ञानयोगयोर्बुद्धियोगेनैकभाव्ये योगिन. प्रत्यगात्मनो ब्रह्मसिद्धि ।

श्रीभगवानुवाच

सन्यास कर्म्मयोगश्च नि श्रेयसकरावुभौ ।
तयोस्तु कर्म्मसन्यासात् कर्म्मयोगो विशिष्यते ॥५।२॥
ज्ञेय स नित्यसन्यासी यो न द्वेष्टि न काङ्क्षति ।
निर्द्वन्द्वो हि महाबाहो सुख बन्धात् प्रमुच्यते ॥५।३॥
साख्ययोगौ पृथग् बाला प्रवदन्ति न पण्डिता ।
एकमप्यास्थित सम्यगुभयोर्विन्दते फलम् ॥५।४॥
यत् साख्यै प्राप्यते स्थान तद्योगैरपि गम्यते ।
एक[1] साख्य च योग च य पश्यति स पश्यति ॥५।५॥
सन्यासस्तु महाबाहो दु खमाप्तुमयोगत ।
योगयुक्तो मुनिर्ब्रह्म न चिरेणाधिगच्छति ॥५।६॥
योगयुक्तो विशुद्धात्मा विजितात्मा जितेन्द्रिय ।
सर्वभूतात्मभूतात्मा कुर्वन्नपि न लिप्यते ॥५।७॥
नैव किञ्चित् करोमीति युक्तो मन्येत तत्त्ववित् ।
पश्यन् शृण्वन् स्पृशन् जिघ्रन्नश्नन् गच्छन् स्वपन् श्वसन् ॥५।८॥
प्रलपन् विसृजन् गृह्णन्नुन्मिषन् निमिषन्नपि ।
इन्द्रियाणीन्द्रियार्थेषु वर्तन्त इति धारयन् ॥५।९॥

---

[1]एक साख्य च योग चेति—ज्ञानस्य कर्म्मपृथक्त्वेन विशुद्धरूपेणोपस्थान साख्यबुद्धि । ज्ञानस्य सविषयकस्य कर्म्मापरित्यागेन तत्सहकारेण ज्ञानोपासन बुद्धियोगबुद्धि । साख्यबुद्धि साख्यम् । बुद्धियोगबुद्धियोंग इति सक्षेपशब्द । एक एवार्थ साख्य च योगश्च । उभयथा ज्ञानस्यैवोपासितत्वात् । कर्म्मविकलस्य कर्म्मसकलस्य वा ज्ञानस्यार्थतो भेदाभावात् ॥

ब्रह्मण्याधाय कर्म्माणि सङ्ग त्यक्त्वा करोति य ।
लिप्यते न स पापेन पद्मपत्रमिवाम्भसा ॥५।१०॥
कायेन मनसा बुद्धया केवलैरिन्द्रियैरपि ।
योगिन कर्म्म कुर्वन्ति सङ्ग त्यक्त्वाऽऽत्मशुद्धये ॥५।११॥
युक्त कर्म्मफल त्यक्त्वा शान्तिमाप्नोति नैष्ठिकीम् ।
अयुक्त कामकारेण फले सक्तो निबध्यते ॥५।१२॥
सर्वकर्म्माणि मनसा सन्यस्यास्ते सुख वशी ।
नवद्वारे पुरे देही नैव कुर्वन् न कारयन् ॥५।१३॥

३—अव्ययस्यात्मनो ज्ञानज्योतिषो रागद्वेषविकारासंयोगे सोपसर्गानुपसर्गादिकर्म्मकृतसर्वावस्था-स्वेकरसत्वम् ।

न कर्तृत्व न कर्म्माणि लोकस्य सृजति प्रभु ।
न कर्म्मफलसयोग स्वभावस्तु प्रवर्तते ॥५।१३॥
नादत्ते कस्यचित् पाप न चैव सुकृत विभु ।
अज्ञानेनावृत ज्ञान तेन मुह्यन्ति जन्तव ॥५।१५॥
ज्ञानेन तु तदज्ञान येषा नाशितमात्मन ।
तेषामादित्यवज्ज्ञान प्रकाशयति तत्परम् ॥५।१६॥

४—बाह्यविषयसयोगजसुखापेक्षया आत्मान्तःसुखस्य नित्यशान्तत्वात् प्राशस्त्यम् ।

तद्बुद्धयस्तदात्मानस्तन्निष्ठास्तत्परायणा ।
गच्छन्त्यपुनरावृत्ति ज्ञाननिर्धूतकल्मषा ॥५।१७॥
विद्याविनयसपन्ने ब्राह्मणे गवि हस्तिनि ।
शुनि चैव श्वपाके च पण्डिता समदर्शिन ॥५।१८॥
इहैव तैर्जित सर्गो येषा साम्ये स्थित मन ।
निर्दोष हि सम ब्रह्म तस्माद् ब्रह्मणि ते स्थिता ॥५।१९॥
न प्रहृष्येत् प्रिय प्राप्य नोद्विजेत् प्राप्य चाप्रियम् ।
स्थिरबुद्धिरसमूढो ब्रह्मविद् ब्रह्मणि स्थित ॥५।२०॥
बाह्यस्पर्शेष्वसक्तात्मा विन्दत्यात्मनि यत् सुखम् ।
स ब्रह्मयोगयुक्तात्मा सुखमक्षय्यमश्नुते ॥५।२१॥
ये हि सस्पर्शजा भोगा दुःखयोनय एव ते ।
आद्यन्तवन्त कौन्तेय ! न तेषु रमते बुध ॥५।२२॥

५—निवृत्तरागद्वेषकामाना प्रत्यावृत्तचक्षुषाममृतत्वविदा विजितात्मनामन्तर्ज्योतिष्ट्वादन्तरारामत्व-मन्त सुखत्व च ।

शक्नोतीहैव य सोढु प्राक् शरीरविमोक्षणात् ।
कामक्रोधोद्भव वेग स युक्त स सुखी नर ॥५।२३॥

योऽन्त सुखोऽन्तरारामस्तथान्तर्ज्योतिरेव य ।
स योगी ब्रह्मनिर्वाण ब्रह्मभूतोऽधिगच्छति ॥५।२४॥
लभन्ते ब्रह्मनिर्वाणमृषय क्षीणकल्मषा ।
छिन्नद्वैधा यतात्मान सर्वभूतहिते रता ॥५।२५॥
कामक्रोधवियुक्ताना यतीना यतचेतसाम् ।
अभितो ब्रह्मनिर्वाण वर्तते विदितात्मनाम् ॥५।२६॥

६—परमशान्तिहेत्तोरात्मज्ञानस्योपायभूत-योगाभ्यासवशात् सर्वदु खोपशमसिद्धि ।

स्पर्शान् कृत्वा बहिर्बाह्यांश्चक्षुश्चैवान्तरे भ्रुवो ।
प्राणापानौ समौ कृत्वा नासाभ्यन्तरचारिणो ॥५।२७॥
यतेन्द्रियमनोबुद्धिर्मुनिर्मोक्षपरायण ।
विगतेच्छाभयक्रोधो य सदा मुक्त एव स ॥५।२८॥
भोक्तार यज्ञतपसा सर्वलोकमहेश्वरम् ।
सुहृद सर्वभूताना ज्ञात्वा मा शान्तिमृच्छति ॥५।२९॥

इति पञ्चमोध्यायः ॥

७—बुद्धियोगिन. सर्वकर्म्मारम्भकत्वात् कर्मयोगित्वं च, सकल्पकामासक्तिसन्यासात् सन्यासित्व च ।

श्रीभगवानुवाच

अनाश्रित कर्म्मफल कार्य्य कर्म्म करोति य ।
स सन्यासी च योगी च न निरग्निर्न चाक्रिय ॥६।१॥
य सन्यासमिति प्राहुर्योग त विद्धि पाण्डव ।
न ह्यसन्यस्तसकल्पो योगी भवति कश्चन ॥६।२॥
आरुरुक्षोर्मुनेर्योग कर्म्म कारणमुच्यते ।
योगारूढस्य तस्यैव शम कारणमुच्यते ॥६।३॥
यदा हि नेन्द्रियार्थेषु न कर्म्मस्वनुषज्जते ।
सर्वसकल्पसन्यासी योगारूढस्तदोच्यते ॥६।४॥

८—ज्ञानयोगादात्मविजयसिद्धिरिति—अजितात्मन्यनात्मनि कर्म्मयोगस्य दु.खानुविधायित्वम् ।

उद्धरेदात्मनाऽऽत्मान नात्मानमवसादयेत् ।
आत्मैव ह्यात्मनो बन्धुरात्मैव रिपुरात्मन ॥६।५॥
बन्धुरात्माऽऽत्मनस्तस्य येनात्मैवात्मना जित ॥
अनात्मनस्तु शत्रुत्वे वर्तेतात्मैव शत्रुवत् ॥६।६॥

९—कर्म्मयोगेन कर्म्मनिष्ठस्यापि ज्ञानयोगेन जितात्मन· समबुद्धित्वोदयात् प्राशस्त्यम् ।

जितात्मन प्रशान्तस्य परमात्मा समाहित ।
शीतोष्णसुखदु खेषु तथा मानापमानयो ॥६।७॥

ज्ञानविज्ञानतृप्तात्मा कूटस्थो विजितेन्द्रिय ।
युक्त इत्युच्यते योगी समलोष्टाश्मकाञ्चन ॥६।८॥
सुहृन्मित्रार्य्युदासीनमध्यस्थद्वेष्यबन्धुषु ।
साधुष्वपि च पापेषु समबुद्धिर्विशिष्यते ॥६।९॥

(८) बुद्धियोगसाधनकर्म्मयोगोपादेयत्वोपनिषद्

१—बुद्धियोगसिद्ध्युपायभूत योगाभ्याससाधनम् ।

योगी युञ्जीत सततमात्मान रहसि स्थित ।
एकाकी यतचित्तात्मा निराशीरपरिग्रह ॥६।१०॥
शुचौ देशे प्रतिष्ठाप्य स्थिरमासनमात्मन ।
नात्युच्छ्रित नातिनीच चैलाजिनकुशोत्तरम् ॥६।११।
तत्रैकाग्र मन कृत्वा यतचित्तेन्द्रियक्रिय ।
उपविश्यासने युञ्ज्याद्योगमात्मविशुद्धये ॥६।१२॥
सम कायशिरोग्रीव धारयन्नचल स्थिर ।
सम्प्रेक्ष्य नासिकाग्र स्व दिशश्चानवलोकयन् ॥६।१३॥
प्रशान्तात्मा विगतभीर्ब्रह्मचारिव्रते स्थित ।
मन सयम्य मच्चित्तो युक्त आसीत मत्पर ॥६।१४॥
युञ्जन्नेव सदात्मान योगी नियतमानस ।
शान्ति निर्वाणपरमा मत्सस्थामधिगच्छति ॥६।१५॥

२—योगाभ्याससाधने साधकबाधकौ ।

नात्यश्नतस्तु योगोऽस्ति न चैकान्तमनश्नत ।
न चातिस्वप्नशीलस्य जाग्रतो नैव चार्जुन ! ॥६।१६॥
युक्ताहारविहारस्य युक्तचेष्टस्य कर्म्मसु ।
युक्तस्वप्नावबोधस्य योगो भवति दु खहा ॥६।१७॥

३—बुद्धियोगसिद्धिलक्षणम् ।

यदा विनियत चित्तमात्मन्येवावतिष्ठते ।
नि स्पृह सर्वकामेभ्यो युक्त इत्युच्यते तदा ॥६।१८॥
यथा दीपो निवातस्थो नेङ्गते सोपमा स्मृता ।
योगिनो यतचित्तस्य युञ्जतो योगमात्मन ॥६।१९॥

४—बुद्धियोगस्वरूपलक्षणम् ।

यत्रोपरमते चित्त निरुद्ध योगसेवया ।
यत्र चैवात्मनाऽऽत्मान पश्यन्नात्मनि तुष्यति ॥६।२०॥
सुखमात्यन्तिक यत्तद् बुद्धिग्राह्यमतीन्द्रियम् ॥
वेत्ति यत्र न चैवाय स्थितश्चलति तत्त्वत ॥६।२१॥
य लब्ध्वा चापर लाभ मन्यते नाधिक तत ।
यस्मिन् स्थितो न दु खेन गुरुणाऽपि विचाल्यते ॥६।२२॥
त विद्याद् दु खसयोगवियोग योगसज्ञितम् ।
स निश्चयेन योक्तव्यो योगो ऽनिर्विण्णचेतसा ॥६।२३॥

५—बुद्धियोगसिद्धये योगाभ्यासानुष्ठानक्रमः ।

सकल्पप्रभवान् कामास्त्यक्त्वा सर्वानशेषत ।
मनसैवेन्द्रियग्राम विनियम्य समन्तत ॥६।२४॥
शनै शनैरुपरमेद् बुद्धया धृतिगृहीतया ।
आत्मसस्थ मन कृत्वा न किञ्चिदपि चिन्तयेत् ॥६।२५॥
यतो यतो निश्चरति मनश्चञ्चलमस्थिरम् ॥
ततस्ततो नियम्यैतदात्मन्येव वश नयेत् ॥६।२६॥
प्रशान्तमनस ह्येन योगिन सुखमुत्तमम् ।
उपैति शान्तरजस ब्रह्मभूतमकल्मषम् ॥६।२७॥
युञ्जन्नेव सदाऽऽत्मान योगी विगतकल्मष ।
सुखेन ब्रह्मसस्पर्शमत्यन्त सुखमश्नुते ॥६।२८॥

६—बुद्धियोगसाधने समबुद्धित्वानुध्यानाभ्यासक्रम. ।

सर्वभूतस्थमात्मान सर्वभूतानि चात्मनि ।
ईक्षते योगयुक्तात्मा सर्वत्र समदर्शन ॥६।२९॥
यो मा पश्यति सर्वत्र सर्व च मयि पश्यति ।
तस्याह न प्रणश्यामि स च मे न प्रणश्यति ॥६।३०॥
सर्वभूतस्थित यो मा भजत्येकत्वमास्थित ।
सर्वथा वर्तमानोऽपि स योगी मयि वर्तते ॥६।३१॥
आत्मौपम्येन सर्वत्र सम पश्यति योऽर्जुन ! ।
सुख वा यदि वा दु ख स योगी परमो मत ॥६।३२॥

७—बुद्धियोगसिद्धचौपयिकमन.स्थिरताविचारः ।

अर्जुन उवाच

योऽय योगस्त्वया प्रोक्त साम्येन मधुसूदन ! ।
एतस्याह न पश्यामि चञ्चलत्वात् स्थिति स्थिराम् ॥६।३३॥

चञ्चल हि मन कृष्ण ! प्रमाथि बलवद् दृढम् ।
तस्याह निग्रह मन्ये वायोरिव सुदुष्करम् ॥६।३४॥

श्रीभगवानुवाच

असशय महाबाहो ! मनो दुर्निग्रह चलम् ।
अभ्यासेन तु कौन्तेय ! वैराग्येण च गृह्यते ॥६।३५॥
असयतात्मना योगो दुष्प्राप इति मे मति ।
वश्यात्मना तु यतता शक्योऽवाप्तुमुपायत ॥६।३६॥

८—दैवाद् योगभ्रष्टस्योदर्कविचार. ।

अर्जुन उवाच

अयति श्रद्धयोपेतो योगाच्चलितमानस ।
अप्राप्य योगससिद्धि का गति कृष्ण ! गच्छति ॥६।३७॥
कच्चिन्नोभयविभ्रष्टश्छिन्नाभ्रमिव नश्यति ।
अप्रतिष्ठो महाबाहो विमूढो ब्रह्मण पथि ॥६।३८॥
एतन्मे सशय कृष्ण ! च्छेत्तुमर्हस्यशेषत ।
त्वदन्य सशयस्यास्य च्छेत्ता न ह्युपपद्यते ॥६।३९॥

श्रीभगवानुवाच

पार्थ ! नैवेह नामुत्र विनाशस्तस्य विद्यते ।
न हि कल्याणकृत् कश्चिद् दुर्गति तात ! गच्छति ॥६।४०॥
प्राप्य पुण्यकृता लोकानुषित्वा शाश्वती समा ।
शुचीना श्रीमता गेहे योगभ्रष्टोऽभिजायते ॥६।४१॥
अथवा योगिनामेव कुले भवति धीमताम् ।
एतद्धि दुर्लभतर लोके जन्म यदीदृशम् ॥६।४२॥
तत्र त बुद्धिसयोग लभते पौर्वदेहिकम् ।
यतते च ततो भूय ससिद्धौ कुरुनन्दन ! ॥६।४३॥
पूर्वाभ्यासेन तेनैव ह्रियते ह्यवशोऽपि स ।
जिज्ञासुरपि योगस्य शब्दब्रह्मातिवर्तते ॥६।४४॥
प्रयत्नाद्यतमानस्तु योगी सशुद्धकिल्विष ।
अनेकजन्मससिद्धस्ततो याति परा गतिम् ॥६।४५॥

९—कर्म्मयोगि-तपोयोगि-ज्ञानयोगिभ्यो बुद्धियोगिन· श्रेष्ठत्वम्, बुद्धियोगिष्वपि श्रद्धावत. श्रेष्ठत्वम् ।

तपस्विभ्योऽधिको योगी ज्ञानिभ्योऽपि मतोऽधिक ।
कर्म्मिभ्यश्चाधिको योगी तस्माद्योगी भवार्जुन ! ॥६।४६॥

योगिनामपि सर्वेषा मद्गतेनान्तरात्मना ।
श्रद्धावान् भजते यो मा स मे युक्ततमो मत ॥६।४७॥

इति षष्ठोऽध्यायः ॥

इति भगवद्गीतोपनिषदि रागद्वेषक्लेशनिवर्त्तिका वैराग्यबुद्धियोगलक्षणा भगवद्विद्या-परपर्याया प्रथमा राजर्षिविद्या समाप्ता।

अथ सिद्धविद्याया ज्ञानबुद्धियोगेन संस्कार आदिश्यते

प्रकृतिपुरुषविवेकज्ञानम्, तथा चतुरधिकरण ब्रह्मकर्म्माभिनयलक्षणविज्ञानम्, अधिकरणविनिमयविज्ञान चेति ज्ञानविज्ञानाभ्या द्विविधाभ्या भावनाभ्या जीवाव्ययस्य स्वरूपकैवत्यनिर्धारण ज्ञानविद्या नाम। सेय पुरायुगे साख्यशास्त्रप्रवर्तककपिलादिसिद्धकुले भूयसा प्रचरति स्म। तत्रत्यकतिपयानुपादेयविषयाणा परिशोधनाय तदुपादेयविषयाणा चानुज्ञानाय केषुचिदशेषु स्वसमति दर्शयितु तामप्येता सिद्धविद्यामिह गीताया भगवानन्वादिशति—अष्टपञ्चाशन्मितै श्लोकै (५८)॥

तत्र तावदव्यये बुद्धियोग कल्याणहेतु, ज्ञानबुद्धचुपपादक प्रत्यय सिद्धविद्यारहस्यम्। ज्ञान हि अन्तर्ज्योति सिद्धविद्याया बुद्धेरव्यये प्रवेशद्वारमिष्यते, ज्ञानविज्ञानाभ्यामज्ञानमोहावरणनाशाद्विशुद्धस्वरूपतया सान्तर्ज्योतिमयी बुद्धिरप्रतिबन्धमव्यये युज्यते।

(१) प्रकृति-पुरुषविवेकज्ञानोपनिषत्।

१—पुरुषसाक्षात्कारोपयोगिज्ञानविज्ञानोपदेशोपक्रमः।

श्रीभगवानुवाच

मय्यासक्तमना पार्थ योग युञ्जन् मदाश्रय।
असशय समग्र मा यथा ज्ञास्यसि तच्छृणु ॥७।१॥
ज्ञानं[1] तेऽह स[2]विज्ञानमिद वक्ष्याम्यशेषत।
यज् ज्ञात्वा नेह भूयोऽन्यज् ज्ञातव्यमवशिष्यते ॥७।२॥
मनुष्याणा सहस्रेषु कश्चिद्यतति सिद्धये[3]।
यततामपि सिद्धाना कश्चिन् मा वेत्ति तत्त्वत ॥७।३॥

२—पुरुषस्याव्ययात्मन· क्षराक्षरप्रकृतिद्वैविध्यम्।

भूमि[4]रापोऽनलो वायु ख मनो बुद्धिरेव च।
अहकार इतीय मे भिन्ना प्रकृतिरष्टधा ॥७।४॥

---

[1]**ज्ञानमिति—विश्वेषामधिष्ठानत्वेनैकस्मिन् ब्रह्मणि बुद्धेरवगाहन ज्ञानम्। काय्यर्येभ्यः कारणदृष्टिर्ज्ञानम्॥**

[2]**सविज्ञानमिति—ब्रह्मण्यध्याहितत्वेन बहुषु कर्म्मसु बुद्धेरवगाहन विज्ञानम्। कारणात् काय्यर्येषु दृष्टिर्विज्ञानम्॥**

[3]**सिद्धये-इति—आत्मन सर्वावरणनिराकरणात् स्वीयवास्तविकज्योति·स्वरूपावाप्तिः परमा सिद्धिः। अज्ञानिजीवस्य ज्ञानमयात्मत्वस्वरूपावाप्तिः सिद्धिः॥**

[4]भूमिरापोऽनलो वायु खमिति—

अपरेयमितस्त्वन्या प्रकृति विद्धि मे पराम् ।
जीवभूता महाबाहो ययेद धार्य्यते जगत् ॥७।५॥

३—प्रकृतेरशेषजगदुपादानत्वम्, पुरुषस्याशेषजगदाधारत्वम् ।

एत्तद्योनीनि भूतानि सर्वाणीत्युपधारय ।
अह कृत्स्नस्य जगत प्रभव प्रलयस्तथा ॥७।६॥
[१]मत्त परतर नान्यत् किञ्चिदस्ति धनञ्जय ।
मयि सर्वमिद प्रोत सूत्रे मणिगणा इव ॥७।७॥

पुरुष [१]। अव्यक्तम्[२]। महान्[३]। अहकार [४]। बुद्धि [५]। मन [६]। पञ्चार्था [७]। पञ्चेन्द्रियाणि[८]। शरीरम्[९]—इत्येतेषु नवसख्येषु अध्यात्मभावेषु शरीरस्येन्द्रियाणा च विकारत्वम्। पञ्चार्था मनोबुद्ध्यहकाराश्चेत्येतेषा प्रकृतिविकृतित्वादपरप्रकृतित्वम् । महतश्चाव्यक्तस्य चाविकृतित्वात् परप्रकृतित्वम्। अव्यक्तमक्षरम् । महत् क्षरम् । एकस्यैव ब्रह्मणोऽर्द्धममृतमर्द्ध मर्त्यमिति श्रूयते । तत्रामृतेऽस्मिन्नक्षरशब्द । मर्त्ये तु क्षरशब्द । क्षराक्षराभ्या द्वेधा विभक्तस्यापि विशिष्टस्यैकत्वादिहैकत्वेन परप्रकृतेरुपदेश । क्षर परिणामी विकुर्वाण । अक्षरोऽपरिणामी न विकुरुते । एवमपि क्षरभागद्वारैतदक्षरस्य प्रकृतित्वमादिश्यते । तथा च श्रूयते—

"यथा सुदीप्तात् पावकाद्विस्फुलिङ्गा सहस्रश प्रभवन्ते सरूपा ।
तथाक्षराद्विविधा सोम्य ! भावा प्रजायन्ते तत्र चैवापियन्ति ।"
यथोर्णनाभि सृजते गृह्णते च यथा पृथिव्यामोषधय सभवन्ति ।
यथा सत पुरुषात् केशलोमानि तथाक्षरात् सभवतीह विश्वम् ।" (मुण्डके)

महत् क्षर त्रेधा रूप धत्ते—अक्षरस्थो मर्त्य क्षरपुरुष सत्त्वम् । तद्विकारक्षरो रज । तस्य पञ्चीकरणाद याज्ञिक रूप तम ॥

आत्मा = पुरुषः—		१० अहम्	= अव्ययः ।
परा = प्रकृति.—		९ अव्यक्तम्	= शान्तात्मा ।
		८ अहकारः	= सत्त्वात्मा ।
		७ बुद्धि·	= विज्ञानात्मा ।
		६ मन.	= प्रज्ञानात्मा प्राणात्मा च
अपरा प्रकृति.		५ आकाशः	भूतात्मा
		४ वायुः	
		३ तेज.	
		२ आपः	
		१ भूमि·	

[१]मत्त. परतरं नान्यदिति—तरङ्गभङ्गिफेनबुद्बुदादीना समुद्रप्रतिष्ठापरायणकत्वात् समुद्रपरतरत्वाभाववद्, अव्ययसमुद्रे कृत्स्न जगदुद्भूयोद्भूय विलीयते। यावन्तो ब्रह्मविवर्ता भावा, यावन्तो

४–पुरुषस्यैकस्य परापरप्रकृतिवशादशेषजगद्भावित्वे पञ्चदशोदाहरणानि ।

†रसोऽहमप्सु कौन्तेय प्रभास्मि शशिसूर्य्ययो ।
प्रणव सर्ववेदेषु शब्द खे पौरुष नृषु ॥७।८॥
पुण्यो गन्ध पृथिव्या च तेजश्चास्मि विभावसौ ।
जीवन सर्वभूतेषु तपश्चास्मि तपस्विषु ॥७।९॥
बीज मा सर्वभूताना विद्धि पार्थ ! सनातनम् ।
बुद्धिर्बुद्धिमतामस्मि तेजस्तेजस्विनामहम् ॥७।१०॥
बल बलवतामस्मि कामरागविवर्जितम् ।
धर्म्माविरुद्धो भूतेषु कामोऽस्मि भरतर्षभ ! ॥७।११॥

५–प्रकृतिगुणत्रयभिन्नानामपि भावाना मायिकाना प्रकृतिद्वारा पुरुषनिष्ठत्वम् ।

ये चैव सात्त्विका भावा* राजसास्तामसाश्च ये ।
मत्त एवेति तान् विद्धि न त्वह तेषु ते मयि ॥७।१२॥

वा ब्रह्मप्रकृतिवैकारिका गुणभावाः, सर्वेप्येते उभये अव्ययसमुद्र नातिवर्तन्ते । अव्ययस्थानामव्ययप्रकृतिस्थानां वा अव्ययसमुद्रे एवैकान्ततोऽवस्थानात् । अव्ययविभूतिमत्त्वमव्ययोगित्व वाऽव्ययजत्वम् । एव प्रकृतिविभूतिमत्त्व प्रकृतियोगित्वं वा प्रकृतिजत्वम् । प्रकृतिजे भावे अव्ययोगो नास्ति । न त्वयन्तेषु, अव्यये तु ते तिष्ठन्त्येवेति बोध्यम् ।

† रसोहमप्सु कौन्तेय—इत्यादि—

१	पृथिव्याम् =	गन्ध	६	वेदेषु =	प्रणव	११	सर्वभूतानाम्= बीजम्
२	अप्सु =	रस	७	नृषु =	पौरुषम्	१२	बुद्धिमताम् = बुद्धि
३	अग्नौ =	तेज	८	सूर्य्याचन्द्रयो =	प्रभा	१३	तेजस्विनाम्= तेज
४	वायौ =	स्पर्श	९	सर्वभूतेषु =	जीवनम्	१४	बलवताम् = बलम्
५	आकाशे =	शब्द	१०	तपस्विषु =	तप	१५	भूतानाम् = {कामो— धर्म्माविरुद्ध

*ये चैव सात्त्विका भावा—इति। भावा द्विविधा—सात्मका—निरात्मकाश्च । आत्मना विधृता प्रकृतेर्विकारा प्रकृति बिभ्रति नात्मानम् । कार्य्याणा स्वकारणानुविधायित्वात् । पर्वते मनुष्यवृक्षादय, न तु ते पर्वता—तस्मात्ते निरात्मका । अथ ये आत्मान बिभ्रति ते आत्मभृत आत्मचित । यथा बुद्धौ ज्ञाने, मनसीच्छाया विषया पर्य्यवतिष्ठन्ते, किन्तु न तेषु विषयेषु मनोबुद्धी, इच्छाज्ञाने भासेते—अचेतनत्वात् । तथान्यत्र यस्मिन्—अव्ययस्य योग, स आत्मभृत् आत्मन्वी सात्मको भाव । यस्मिन् विभूतिमात्र न योग, स निरात्मको भाव । प्रकृतिजाते भावे प्रकृतेर्योगश्च विभूतिश्च । अव्ययस्य तु पुरुषस्य तत्र विभूतिमात्र न योग, प्रकृतिमात्रपर्य्याप्तत्वात् । तथा च—सात्मको विवर्तभावो विद्यामयाव्ययस्यात्मन आवरको नोपपद्यते—अव्ययस्योल्बणत्वात् । अथ गुणभावे विकारभावे चायमव्ययो नास्तीत्यनात्मकेन तेन विद्यामयाव्ययस्यावरणमुपपद्यते । अत एव गुणमयैर्भावैरावरण भवतीत्याह—॥ इदन्तु बोध्यम्—विशुद्ध सत्त्व नात्यन्तमावृणुते, रजस्तमसी तु दोषत्वादावृण्वाते । तन्मिश्र

६—शुद्धसत्त्वमयी प्रकृतिर्देवप्राणोपस्थापकत्वाद् दैवी माया ॥ अथ मलिनसत्त्वादिगुणत्रयवती प्रकृतिरासुरप्राणोपसंक्रामकत्वाद्—आसुरी माया। दैवमायावशादभासितस्यात्मनो बुद्धियोगवशात् साक्षात्कारेऽपि आसुरमायावृतस्य बुद्धियोगाय प्रवृत्त्ययोगात् साक्षात्कारासंभवः।

त्रिभिर्गुणमयैर्भावैरेभि सर्वमिद जगत् ।
मोहित नाभिजानाति मामेभ्य परमव्ययम् ॥७।१३॥
दैवी ह्येषा गुणमयी मम माया दुरत्यया ।
मामेव ये प्रपद्यन्ते मायामेता तरन्ति ते ॥७।१४॥
(१) न मा दुष्कृतिनो मूढा प्रपद्यन्ते नराधमा ।
माययापहृतज्ञाना आसुर भावमाश्रिता ॥७।१५॥

७—आत्मार्पितमनोबुद्धचभ्यासेन बुद्धियोगप्रवृत्तानां चातुर्विध्यम्, तेषु ज्ञानिनोऽनन्यभक्तित्वात् श्रैष्ठ्यम्।

चतुर्विधा भजन्ते मा जना सुकृतिनोऽर्जुन !
आर्तो[१] जिज्ञासु[२]रर्थार्थी[३] ज्ञानी[४] च भरतर्षभ ! ॥७।१६॥
तेषा ज्ञानी नित्ययुक्त एकभक्तिर्विशिष्यते ।
प्रियो हि ज्ञानिनोऽत्यर्थमह स च मम प्रिय ॥७।१७॥
उदारा सर्व एवैते ज्ञानी त्वात्मैव मे मतम् ।
आस्थित स हि युक्तात्मा मामेवानुत्तमा गतिम् ॥७।१८॥
बहूना जन्मनामन्ते ज्ञानवान् मा प्रपद्यते ।
वासुदेव सर्वमिति स महात्मा सुदुर्लभ ॥७।१९॥

८—दैवमायावृतात्मन. स्वात्माश्रिततत्तद्देवताराधनया देवताधारभूताव्ययप्रसादादैहिकामुष्मिकसर्वविधकामानां सिद्धावपि, आत्मसाक्षात्कारस्य विशुद्धाव्ययार्पितमनोबुद्धचभ्यासात् सिद्धि.।

कामैस्तैस्तैर्हृतज्ञाना प्रपद्यन्ते ऽन्यदेवता ।
त त नियममास्थाय प्रकृत्या नियता स्वया ॥७।२०॥
यो यो या या तनु भक्त श्रद्धयार्चितुमिच्छति ।
तस्य तस्याचला श्रद्धा तामेव विदधाम्यहम् ॥७।२१॥
स तया श्रद्धया युक्तस्तस्याराधनमीहते ।
लभते च तत कामान् मयैव विहितान्हि तान् ॥७।२२॥

सत्त्व मलिन भूत्वा पुनरावृणुते। रजस्तमोमयभावसपादका जना दुष्कृतिनो मूढा । ते अव्ययात्मान न प्रपद्यन्ते, तमसान्तरायेण प्रच्छन्नत्वात् ॥ ॥

१—न मा दुष्कृतिनो मूढा—गुणत्रयभिन्नस्य गुणत्रयालम्बनस्यापरिणामिनो विशुद्धाव्ययस्य त्रैगुण्यात्मकमायाप्रच्छन्नतया तादृशत्रिगुणमात्रप्रत्यन्तरितदृष्टिभिरासुरप्रकृतिभिर्दुष्कृतिभिरभास्यत्वम्।

अन्तवत्तु फल तेषा तद् भवत्यल्पमेधसाम् ।
देवान् देवयजो यान्ति मद्भक्ता[1] यान्ति मामपि ॥७।२३॥

९—योगमायापहृतज्ञानस्याव्ययपुरुषमात्मानमनवगाहमानस्याबुद्धेरात्मालम्बिततत्तद्देवताराधनप्रवणत्वम्।

अव्यक्त व्यक्तिमापन्न मन्यन्ते मामबुद्धय ।
पर भावमजानन्तो ममाव्ययमनुत्तमम् ॥७।२४॥
नाह प्रकाश सर्वस्य योगमायासमावृत ।
मूढोऽय नाभिजानाति लोको मामजमव्ययम् ॥७।२५॥

१०—रागद्वेषद्वन्द्वमोहेन मुग्धाना त्रिकालज्ञानमयात्मज्योतिर्व्यामोहनात् त्रैकालिकज्ञानाभावेऽपि निवृत्त-रागद्वेषाणामात्मज्ञानज्योति·प्रसादात् त्रिकालदर्शित्वसभव. ।

वेदाह समती[2]तानि वर्तमानानि चार्जुन ! ।
भविष्याणि च भूतानि मा तु वेद न कश्चन ॥७।२६॥

---

[1]मद्भक्ता यान्ति मामपि—अमृतम्, ब्रह्म, सुब्रह्म, शुक्रम्, पाप्मा चेति—पञ्चनिकाय पुरुषो भवति । तत्र-अव्यय, अक्षर, क्षर इत्येतावानमृत पुरुष । तत्र गतिस्थितिबलशालि वाय्वाकाशलक्षण-यजुरग्निर्ब्रह्म । अथ स्नेहतेजोबलशालि भृग्वङ्गिरोलक्षणमथर्वाप सुब्रह्म । अग्निगर्भाब्गर्भितवाङ्-मयमण्डल तु शुक्रम् । त्रीणि सत्यानि, त्रयो गुणा, द्वे बुद्धी, तिस्रो मात्रा, बीजदेवभूताना ग्रामा पाप्मा । तत्र ब्रह्मसुब्रह्मणी ब्रह्म सत्यम् । शुक्र देवसत्यम् । पाप्मा त्वनृतम् । तत्र भोक्तात्मा भूतात्मा यदि देव-सत्यप्रवण, स देवयाट् । अथ यदि अमृतप्रवणश्चेत् स आत्मभक्त आत्मान याति ।

अमृतशुक्रम्			मर्त्यशुक्रम्		
वाक्	आप	अग्नि	अग्नि	आप	वाक्
अमृतम् ।	अमृतम् ।	अमृतम् ।	मर्त्यम् ।	मर्त्यम् ।	मर्त्यम् ।
सत्यानि ।	गुणा ।	विद्याबुद्धि ।	अभिनिवेश ।	मात्रा ।	शरीराणि
नियति ।	सत्त्वम् ।	धर्म्मा ।	अविद्याबुद्धि ।	प्रज्ञा ।	बीजग्राम
वेदा ।	रज ।	ज्ञानम् ।	मोह ।	प्राणा ।	देवग्राम
अभ्वे नामरूपे ।	तम ।	वैराग्यम् ।	अस्मिता ।	भूतानि ।	भूतग्राम
		ऐश्वर्य्यम् ।	रागद्वेषौ ।		

[2]वेदाह समतीतानीति—यद्यपि सर्वोऽय भूतात्मा ज्योतिष्मानेव, तथापि सर्गकाले द्वन्द्वलक्षण समोह यातीत्यज्योतिष्मान् भवति । तेन भूत भव्य वर्तमान च सर्व न जानाति-बुद्धियोगवैकल्यात् । दुष्कृतात्यये तु द्वन्द्वमोहविनिर्मुक्त स्वेनैव प्रकाशेन भूत भव्य वर्तमान च सर्व यथावद् जानाति । अर्थात्—ज्योतिष्मत्त्वात् सस्काररूपेण स्थितत्वादतीतानि, बीजरूपेण स्थितत्वाद् भविष्याणि च वेद ।

इच्छा[1] द्वेषसमुत्थेन द्वन्द्वमोहेन भारत ।
सर्वभूतानि समोह सर्गे यान्ति परन्तप ॥७।२७॥
येषान्त्वन्तगत पाप जनाना पुण्यकर्म्मणाम् ।
ते द्वन्द्वमोहनिर्मुक्ता भजन्ते मा दृढव्रता ॥७।२८॥

---

[1] इच्छाद्वेषेति—इच्छया ग्राह्यम् । द्वेषेण त्याज्यम् । आभ्या द्वन्द्वमनेकधोत्पद्यते—सुखदु खे, शुभाशुभे, प्रियाप्रिये, शीतोष्णे इत्यादि । द्वन्द्वलक्षणो मोह । सर्वाण्येव भूतानि सर्गे निसर्गात् समोह यान्त्येव । मुक्तिपक्षे तु मोहाद् द्वन्द्वलक्षणात् त्यज्यन्ते । उभयो साम्येनोपपत्ते रागद्वेषविनाशात् ॥

*(२) [1]ब्रह्म[1]कर्मणो-[4]चतुरधिकरणम् [2]अहो रात्रौ [2]सर्गप्रलयौ [1]भक्तियोगः [1]आत्मगतिरिति द्वादशविज्ञानोपनिषत् ।

१—योगमायावरणवशादात्मानवगाहे द्वादशस्वात्मायतनेषु मनोबुद्ध्यर्पणाभ्यासादात्मोपलब्धि. ॥

जरामरणमोक्षाय मामाश्रित्य यतन्ति ये ।
ते ब्रह्म (१) तद्विदु कृत्स्नमध्यात्म[4] कर्म्म (२) चाखिलम् ॥७।२९॥
साधि[2]भूताधिदैव[1] मा साधियज्ञ[3] च ये विदु ।
प्रयाण[5]कालेऽपि च मा तेविदुर्युक्तचेतस ॥७।३०

(इति सप्तमोऽध्यायः ॥)

२—ब्रह्मकर्म्मणो [2], आधिदैविकाधिभौतिकयोः[2], आधियज्ञिका[2]ध्यात्मिकयो·, सृष्टिप्रलययोः[2], भोगमोक्षयो.[2], गत्यागत्योः[2], स्वरूपजिज्ञासायां तदुपपादनम् ।

अर्जुन उवाच

कि तद् ब्रह्म(१) किमध्यात्म[4]– कि कर्म्म(२) पुरुषोत्तम ! ।
अधिभूत[2] च कि प्रोक्तम[1]धिदैव किमुच्यते ॥८।१॥
अधियज्ञ [3] कथ कोऽत्र देहेऽस्मिन् मधुसूदन ! ।
प्रयाणकाले[5] च कथ ज्ञेयोऽसि नियतात्मभि ॥८।२॥

---

*

द्वादश विज्ञानानि		
१ ब्रह्म २ कर्म्म	१ अक्षर परमं ब्रह्म—नियन्तृ । २ भूतभावोद्भवकरो विसर्गः वीर्य्यम्	१ सृष्टि.[9], प्रलय·[8] ३ भोगः[6], मोक्षः[10]
१ अध्यात्मम् २ अधिभूतम् ३ अधिदैवतम् ४ अधियज्ञम्	३ स्वभाव., प्रकृतिप्रपञ्च. ४ क्षरभाव·, भूतप्रपञ्चः २ पुरुषः, दैवतप्रपञ्च· १ अव्यय आत्मा, अमृतषोडशी	५ गतिः[11], आगतिः[12]

१

श्रीभगवानुवाच

*अक्षर ब्रह्म[१] परम स्वभावोऽध्यात्म[३]मुच्यते। ।
भूतभावोद्भवकरो विसर्ग [२]कर्म्मसज्ञित † ॥८।३॥
अधिभूत[४] क्षरो भाव पुरुषश्चाधि[५]दैवतम्। ।
अधि[६]यज्ञोऽहमेवात्र देहे देहभृता वर ! ॥८।४॥

गति-विद्या

३—अथ गतिविद्यायामन्ते मतिः सा गतिरिति सिद्धान्तात् परावरभेदेन दैवगतिद्वैविध्यं भवति । तथा हि—तत्तल्लौकिकभावार्पितमनोबुद्धे· प्रेतस्य तत्तल्लौकिकभाव एव गतिः सा तावदवरा ॥ अथ तत्तद्भावाव्ययार्पितमनोबुद्धेः प्रेतस्य तत्तद्भावाव्ययो गतिः । सा च परा ।

अन्तकाले[७] च मामेव[६] स्मरन् मुक्त्वा कलेवरम् ।
य प्रयाति स मद्भाव[६] याति नास्त्यत्र सशय ॥८।५॥
य य वापि स्मरन् भाव त्यजत्यन्ते कलेवरम् ।
त तमेवैति कौन्तेय ! सदा तद्भावभावित ॥८।६॥

---

*अक्षर ब्रह्म परममिति—ब्रह्मकर्म्मणी इत्यव्ययस्य द्वे भक्ती भवत । आनन्दो विज्ञान मन —सेय प्रकाशमयी विद्या-इत्यमृत ब्रह्म। अथ मन प्राणो वागिति मर्त्य कर्म्म, सोऽय भूतभावोद्भवकरो विसर्ग । विद्याभागानुगृहीतममृत परम ब्रह्माक्षरम् । विसर्गभागानुगृहीत मर्त्य क्षरम् । ब्रह्मकर्म्ममय स क्षराक्षरविशिष्टोऽयमव्यय पुरुष आत्मा यावदेतेषु चेतनप्राणिषूपपद्यते तदध्यात्मम् । यावदेतेषु जडभूतेपु तदधिभूतम् । यावद्वा देवेषु तदधिदैवतम् । अथ यावदमुष्मिन् दैवतभूतोत्पादके प्रजापतौ विज्ञायते सोऽधियज्ञ । अथवा—एतस्मिन् चेतनप्राणिन्येव यावदय भूतकोशेऽभिव्याप्नोति तदधिभूतम् । यावद्वा दैवतकोशे तदधिदैवतम् । यावद्वा बीजकोशे तदध्यात्मम् । अथ यावदस्मिन् शरीरग्राहिणि शारीरके यज्ञात्मन्युपपद्यते सोधियज्ञ इत्येवमेकस्यैवाव्ययस्याधिकरणभेदेन साक्षात्कार । अन्ते तु शरीरत्रयपरित्यागेन विशुद्धाव्ययैकभाव्यानुभव ।

†कर्म्मसंज्ञिक इति—"वीर्य्य वै कर्म्म" (वाजिश्रुति ७।४।१।२५) "विष्णोः कर्म्माणि पश्यत यतो व्रतानि पस्पशे । इन्द्रस्य युज्यः सखा" । प्रादेशमात्रो वै गर्भो विष्णुरन्नम् ।७।४।१।१४। यत्तदन्नम्—एष स विष्णुर्देवता ।७।४।१।२१।"—

१	अधिदैवतम्	= ईश्वरपुरुषः	=	ब्रह्म-कर्म्ममय. प्रजापतिः १—महामायावच्छिन्नः
२	अधिभूतम्	= क्षरभावः (ऐ)		ब्रह्म-कर्म्ममया गुणविकाराः
३	अधियज्ञः	= जीवपुरुष.	=	ब्रह्म-कर्म्ममय· प्रजापतिः २—योगमायावच्छिन्न·
४	अध्यात्मम्	= स्वभावः (जै)		ब्रह्म-कर्म्ममया गुणविकाराः
		अक्षर. विसर्गः		
५	आधियज्ञिकाध्यात्मिकाना भावानाम्—आधिदैविकाधिभौतिकेषु गति.			

तस्मात् सर्वेषु कालेषु मामनुस्मर[६] युद्धय च ।
मय्यर्पित[६] मनो बुद्धिर्मामेवैष्यस्य[६] सशय ॥८।७॥

४—ईश्वरार्पितमनोबुद्धे प्रेतस्य ईश्वरो गति. । किन्तु ईश्वराव्ययार्पितमनोबुद्धे· प्रेतस्य ईश्वराव्ययो गतिः ॥

अभ्यासयोगयुक्तेन चेतसा नान्यगामिना ।
परम[५] पुरुष दिव्य याति पार्थानुचिन्तयन् ॥८।८॥
कवि पुराणमनुशासितारमणोरणीयासमनुस्मरेद्य ।
सर्वस्य धातारमचिन्त्यरूपमादित्यवर्ण तमस परस्तात् ॥८।९॥
प्रयाणकाले मनसाऽचलेन भक्त्या[११] युक्तो योगबलेन चैव ।
भ्रुवोर्म्मध्ये प्राणमावेश्य सम्यक् स त पर [५]पुरुषमुपैति दिव्यम् ॥८।१०॥

५—एव परावरभेदेनाक्षरगतिद्वैविध्याद् "ओम्" इत्येकाक्षरोच्चारणपूर्वकमक्षरानुस्मृतिपूर्वकं शरीरं *त्यजतस्तदक्षरमव्यक्त गति । सा तावदवरा । अथ सेतुभूताक्षरद्वारा तदव्ययार्पितमनोबुद्धेः प्रेतस्य तदक्षराव्ययो गति । सा परा ॥

यदक्षर[५] वेदविदो वदन्ति विशन्ति यद्यतयो वीतरागा ।
यदिच्छन्तो ब्रह्मचर्य्यं चरन्ति तत्ते पद सग्रहेण प्रवक्ष्ये ॥८।११॥
सर्वद्वाराणि सयम्य मनो हृदि निरुध्य च ।
मध्न्यर्धायात्मन प्राणमास्थितो[११] योगधारणाम् ॥८।१२॥
ओमित्येकाक्षर ब्रह्म व्याहरन् मामनुस्मरन् ।
य प्रयाति त्यजन् देह स याति परमा गतिम् ॥८।१३॥

६—अथैतदन्यान्यजगद्भावं वा—ईश्वरं वा—अक्षरं वा—कचिदप्यन्यमक्रोडीकृत्य विशुद्धमव्ययमेवानुचिन्तयन् य प्रैति, तस्यायमात्माऽव्ययः साक्षाद् गृहीतत्वात् सुलभा परमा गति. ॥ परमा संसिद्धिः ॥०॥

अनन्यचेता सतत यो मा स्मरति नित्यश ।
तस्याह सुलभ पार्थ नित्ययुक्तस्य योगिन ॥८।१४॥

४	विकारक्षरभूमिः	अग्नीषोमौ	देवसत्यम्	
		वाक्	ब्रह्मसत्यम्	अव्यक्तपर्य्यवसाना गतिः ।
३	आत्मक्षरभूमिः	आप.	अमृतभूमिः	पुनरावर्तनीया लोकयात्रा ।
		प्राणः		
२	अक्षरभूमिः			परमा गतिः
१	अव्ययभूमिः			अपुनरावर्तनीयं शान्तिधाम ।

*

मामुपेत्य पुनर्जन्म दु खालयमशाश्वतम् ।
नाप्नुवन्ति महात्मान ससिद्धि परमा गता ॥८।१५॥

७—अव्यक्तात्मक्षरपर्य्यवसायिना सर्वेषा भूतविकाराणामात्मानुबन्धिभ्या विद्याकर्म्मभ्या पुनरावृत्त्य-पुनरावृत्तिभाक्त्वं ब्रह्माहोरात्रनिबन्धनसृष्टिप्रलयभाक्त्वं च ।

आ ब्रह्मभुवनाल्लोका पुनरावर्तिनोऽर्जुन ! ।
मामुपेत्य तु कौन्तेय ! पुनर्जन्म न विद्यते ॥८।१६॥
सहस्रयुगपर्यन्तमहर्यद् ब्रह्मणो विदु ।
रात्रि युगसहस्रान्ता तेऽहोरात्रविदो जना ॥८।१७॥
अव्यक्ताद्व्यक्तय सर्वा प्रभवन्त्यहरागमे
राज्यागमे प्रलीयन्ते तत्रैवाव्यक्तसज्ञके ॥८।१८॥
भूतग्राम स एवाय भूत्वा भूत्वा प्रलीयते ।
राज्यागमेऽवश पार्थ ! प्रभवत्यहरागमे ॥८।१९॥

८—अव्यक्तात्मक्षरमात्रपर्य्यवसायिना भूतात्मना पुनरावर्तित्वेऽपि तदव्यक्तक्षरात् परयोरव्यक्तयो—रक्षराव्ययोर्निर्विकारामृतरूपत्वात् तदनुगताना भूतात्मनामपुनरावर्तितया परमा गतिः ॥

परस्तस्मात्तु[6] भावोऽन्योऽव्यक्तो[4]ऽव्यक्तात् सनातन ।
य स सर्वेषु भूतेषु नश्यत्सु न विनश्यति ॥८।२०॥
अव्यक्तो[4]ऽक्षर इत्युक्तस्तमाहु परमा गतिम् ।
य प्राप्य[6] न निवर्तन्ते तद्धाम परम मम ॥८।२१॥
पुरुष[4] स पर पार्थ भक्त्या लभ्यस्त्वनन्यया ।
यस्यान्त स्थानि भूतानि येन सर्वमिद ततम् ॥८।२२॥

९—ज्ञानकर्म्मजनितभावनावासनासस्कारावच्छिन्नस्य भोक्तु कर्म्मात्मनो विद्याप्राबल्ये विद्यामार्गेण शुक्लेन देवयानेन गमनात् क्रममुक्तिसिद्धेरपुनरावृत्ति. । कर्म्मप्राबल्ये तु कर्म्ममार्गेण कृष्णेन पितृयाणेन गमनात् पुनरावृत्तिः—इति गत्यागतिहेतुप्रतिपत्तिः ॥

यत्र काले त्वनावृत्तिमावृत्ति चैव योगिन ।
प्रयाता यान्ति त काल वक्ष्यामि भरतर्षभ ! ॥८।२३॥
अग्निर्ज्योतिरह शुक्ल षण्मासा उत्तरायणम् ।
तत्र प्रयाता गच्छन्ति ब्रह्म ब्रह्मविदो जना ॥८।२४॥
धूमो रात्रिस्तथा कृष्ण षण्मासा दक्षिणायनम् ॥
तत्र चान्द्रमस ज्योतिर्योगी प्राप्य निवर्त्तते ॥८।२५॥
†शुक्लकृष्णे गती ह्येते जगत शाश्वते मते ।
एकया यात्यनावृत्तिमन्ययाऽऽवर्त्तते पुन ॥८।२६॥

---

†शुक्लकृष्णे गती ह्येते—इति—
"द्वे सृती अशृणव पितृणामह देवानामुत मर्त्यानाम् ।

नैते सृती पार्थ ! जानन् योगी मुह्यति कश्चन ।
तस्मात् सर्वेषु कालेषु योगयुक्तो भवार्जुन ! ॥८।२७॥
वेदेषु यज्ञेषु तपस्सु चैव दानेषु यत्पुण्यफल प्रदिष्टम् ।
अत्येति तत्सर्वमिद विदित्वा योगी पर स्थानमुपैति चाद्यम् ॥८।२८॥

इति अष्टमोऽध्याय· ॥

इति भगवद्गीतोपनिषदि मोहक्लेशनिवर्त्तिका ज्ञानबुद्धियोगपरिष्कृता* सिद्धविद्या समाप्ता ।

ताभ्यामिद विश्वमेजत् समेति यदन्तरा पितर मातर च ॥ ऋ० स० (१०।८८।१५) ।

इति श्रुत्या—देवाना पितॄणामुत मर्त्याना च कृते देवयानपितृयाणाख्यौ द्वौ मार्गौ प्रदर्शितौ भवत । तत्र विद्यया देवयान । कर्म्मणा पितृयाण । तयो ज्योतिरह सितपक्ष इत्यादिभि पृथक् पृथक् पर्वाण्युपदिशन्ति । तत्रैते देवयानस्यातिवाहका भवन्ति—

ज्योति , अह , सितपक्ष , उत्तरायणम्, सवत्सर सौर इति । तदनन्तर "स एत देवयान पन्थानमापद्याग्निलोकमागच्छति, स वायुलोक स वरुणलोक स इन्द्रलोक स प्रजापतिलोक स ब्रह्मलोकम्"—इति कौषीतकिश्रुत्या तस्य ब्रह्मप्राप्तिरुपपद्यते, तत स मानवावर्तमतिक्रान्तो मुक्त सन् न पुनरावर्तते । अत एवोक्तम्—एकया यात्यनावृत्तिमिति ॥ एष वै देवयान पन्था , अयमेव शुक्लमार्ग प्रकाशमयत्वात् । तथा च स्मर्य्यते—

नागवीथ्युत्तर यच्च सप्तर्षिभ्यश्च दक्षिणम् ।
उत्तर सवितु पन्था देवयान स वै स्मृत ॥इति॥

"उत्तरा हि दिग् देवानाम् । दक्षिणा पितॄणाम्" ।

एवमेते पितृयाणस्यातिवाहका—धूम , रात्रि , कृष्णपक्ष , षण्मासा दक्षिणायनम्, सवत्सरश्चान्द्रश्चेति । तथा चोक्तम्—"अथ यो दक्षिणे प्रमीयते पितॄणामेव महिमान गत्वा चन्द्रमस सायुज्य गच्छति" इति । अर्थात् पितृलोकमागच्छति—"विधूर्ध्वभागे पितरो वसन्ती" ति स्मरणात् । तदनन्तरम्—"यदा तत् पर्य्यवैति अथैतमेवाध्वान पुनर्निवर्तन्ते—तथा हि—चन्द्रम्, पुनराकाशम्, वायुम्, धूमाभ्र, मेघ वृष्टचन्नम्, रेत , अय पुरुष इतीय पुनरावृत्ति प्रवर्तते । अत एव 'अन्ययावर्तते पुन' इत्युक्तम् । सैष दक्षिणमार्ग पितृयाण कर्म्मणा भवति । पितृयाणप्रदेशस्तु—

"उत्तर यदगस्त्यस्य अजवीथ्याश्च दक्षिणम् ।
पितृयाण स वै पन्था वैश्वानरपथाद् बहि ॥इति॥

स चैष कृष्णमार्ग -सूर्य्याशुराहित्यात् ।

*** परिष्कृतेति—विद्या द्विविधा—आत्मलक्षणा अव्ययभक्ति· प्रथमा। प्रकृतिलक्षणा बुद्धिभक्तिर्द्वितीया । तथा च अव्ययभक्तौ विद्यायामात्मरूपायां बुद्धिभक्तेः प्रकृतिलक्षणाया विद्याया योगो बुद्धियोगः । तेनात्मविद्याया बुद्धिविद्याया योगादात्मनि प्रविष्टानामविद्यारूपाणां पञ्चक्लेशानां निवृत्तिर्भवति, विद्याबुद्धीनां वैराग्यज्ञानैश्वर्य्यधर्म्मलक्षणानामात्मप्रविष्टपञ्चक्लेशलक्षणाविद्याबुद्धिनिवर्तकत्वात् ॥०॥**

अथ राजविद्याया ऐश्वर्यबुद्धियोगेन संस्कार आदिश्यते

सर्वैकप्रभवत्वलक्षणैश्वर्य्यज्ञानेन ईश्वरपुरुष भावयतो जीवस्योभयाव्ययैकीभावादुद्धार परा मुक्ति, सेय प्रथमा सिद्धिरलौकिकी ॥१॥ अथ ईश्वरसबन्धिनानाविभूतिलक्षणैश्वर्य्यविज्ञानेन ईश्वरपुरुषं भावयतो जीवस्य ईश्वरानेकशक्त्यनुस्रवणाद् अभ्युदयविशेषोपलब्धिर्द्वितीया सिद्धिरैहलौकिकी ॥२॥ अथ ईश्वरपुरुषस्योपासनया सालोक्य-सामीप्य-सारूप्य-सायुज्यान्यतमसिद्धिलक्षणा जीवस्यापरा मुक्ति, सेय तृतीया सिद्धि पारलौकिकी ॥३॥ तथा चेत्थ ज्ञानविज्ञानोपासनाभिस्त्रिविधाभिर्भावनाभिरीश्वरपुरुषे जीवपुरुषस्यानुगतिः—राजविद्या नाम ॥ सेय पुराकाले कतिपयराजकुले भूयसा प्रचरति स्म। तदुपादेय-भूयोविषयाणामनुज्ञानाय स्वसमति दर्शयितु तामप्येता राजविद्यामिह गीताया भगवान् अन्वादिशति एकपञ्चाशदधिकशतमितलोकै (१५१) ॥

(१) ईश्वरस्वरूपज्ञानोपनिषत्

ईश्वरसाक्षात्कारौपयिकयो राजपर्षन्निगूहितयोर्ज्ञानविज्ञानयो राजविद्यात्वम्।

श्रीभगवानुवाच

१—इद तु ते गुह्यतम प्रवक्ष्याम्यनसूयवे।
ज्ञान विज्ञानसहित यज्ज्ञात्वा मोक्ष्यसेऽशुभात् ॥९।१॥
राजविद्या राजगुह्य पवित्रमिदमुत्तमम्।
प्रत्यक्षावगम धर्म्म्य सुसुख कर्त्तुमव्ययम् ॥९।२॥
अश्रद्दधाना पुरुषा धर्मस्यास्य परन्तप।
अप्राप्य मा निवर्तन्ते मृत्युससारवर्त्मनि ॥९।३॥

२—असङ्गत्वादशेषभूतग्रामास्पर्शिनोऽपीश्वराव्ययपुरुषस्याशेषविकारपरायणपरापरप्रकृत्यधिष्ठातृत्वाद् भूतसृष्टचै प्रकृतिनियोक्तृत्वाच्च सर्वभूताधिष्ठातृत्वम् ॥

मया ततमिद सर्व जगदव्यक्तमूर्त्तिना।
मत्स्थानि सर्वभूतानि न चाह तेष्ववस्थित ॥९।४॥
न च मत्स्थानि भूतानि पश्य मे योगमैश्वरम् ॥
भूतभृन्न च भूतस्थो ममात्मा भूतभावन ॥९।५॥
यथाकाशस्थितो नित्य वायु सर्वत्रगो महान्।
तथा सर्वाणि भूतानि मत्स्थानीत्युपधारय ॥९।६॥
सर्वभूतानि कौन्तेय प्रकृति यान्ति मामिकाम्।
कल्पक्षये पुनस्तानि कल्पादौ विसृजाम्यहम् ॥९।७॥
प्रकृति स्वामवष्टभ्य विसृजामि पुन पुन।
भूतग्राममिम कृत्स्नमवश प्रकृतेर्वशात् ॥९।८॥

न च मा तानि कर्माणि निवध्नन्ति धनजय ! ।
उदासीनवदासीनमसक्त तेपु कर्म्मसु ॥९।९॥
मयाध्यक्षेण प्रकृति सूयते सचराचरम् ।
हेतुनानेन कोन्तेय जगद्विपरिवर्त्तते ॥९।१०॥

३—आसुरमायामयप्रकृतिमता मूढाना मनुष्यशरीरस्थेऽस्मिन्नननन्तशक्तिमति महेश्वरे प्रतिपत्त्यभावेन तदवज्ञानाज्ज्ञानवैकल्य चेष्टावैफल्य नैराश्य वैचित्त्य चापद्यते ।

अवजानन्ति मा मूढा मानुपी तनुमाश्रितम् ।
पर भावमजानन्तो मम भूतमहेश्वरम् ॥९।११॥
मोघाशा मोघकर्म्माणो मोघज्ञाना विचेतस ।
राक्षसीमासुरी चैव प्रकृति मोहिनी श्रिता ॥९।१२॥

४—दैवमायामयप्रकृतिमता तु महात्मना सर्वविकाराभ्यन्तरतमाव्ययदृष्ट्या विकारवैशिष्ट्याज्ञानात्वेन, विकारोपहितत्वादेकत्वेन वा प्रतिपत्तिभेदादनेकधोपासना ।

महात्मानस्तु मा पार्थ ! दैवी प्रकृतिमाश्रिता ।
भजन्त्यनन्यमनसो ज्ञात्वा भूतादिमव्ययम् ॥९।१३॥
सतत कीर्तयन्तो मा यतन्तश्च दृढव्रता ।
नमस्यन्तश्च मा भक्त्या नित्ययुक्ता उपासते ॥९।१४॥
ज्ञानयज्ञेन चाप्यन्ये यजन्तो मामुपासते ।
एकत्वेन पृथक्त्वेन बहुधा विश्वतोमुखम् ॥९।१५॥

५—यज्ञारम्भकाणा यज्ञैकत्ववत्, भिन्नसंबन्धाना पुरुषैकत्ववत्, वेदविभक्तीना वेदैकत्ववत्, प्रकृतिविकाराणा प्रकृत्येकत्वेनैकस्यैवेश्वराव्ययस्य सर्वत्रोपासना ।

अह क्रतुरह यज्ञ स्वधाहमहमौषधम् ।
मन्त्रोऽहमहमेवाज्यमहमग्निरह हुतम् ॥९।१६॥
पिताहमस्य जगतो माता धाता पितामह ।
वेद्य पवित्रमोङ्कार ऋक् साम यजुरेव च ॥९।१७॥

६—एकस्यैवेश्वराव्ययस्य विश्वकर्म्मत्वेन द्वादशधा विश्वस्मिन् विभवत सर्वत्रोपासना ।

गतिर्भर्त्ता प्रभु साक्षी निवास शरण सुहृत् ।
प्रभव प्रलय स्थान निधान बीजमव्ययम् ॥९।१८॥

७—विरुद्धाविरुद्धसर्वद्वन्द्वसाधारणत्वेनैकस्यैवेश्वराव्ययस्य सर्वत्रोपासना ।

तपाम्यहमह वर्ष निगृह्णाम्युत्सृजामि च ।
अमृत चैव मृत्युश्च सदसच्चाहमर्जुन ! ॥९।१९॥

८—ऐहिकामुष्मिकोन्नतिमिच्छद्भिस्त्रैविद्यै कर्म्मयोगिभिस्त्रिकालज्ञमीश्वरमेव कर्म्मसाक्षिण-मास्थाय कृतेन यज्ञकर्म्मणा ईश्वराव्ययोपासना ।

त्रैविद्या मा सोमपा पूतपापा यज्ञैरिष्ट्वा स्वर्गति प्रार्थयन्ते ।
ते पुण्यमासाद्य सुरेन्द्रलोकमश्नन्ति दिव्यान्दिवि देवभोगान् ॥९।२०॥
ते त भुक्त्वा स्वर्गलोक विशाल क्षीणे पुण्ये मर्त्यलोक विशन्ति ।
एव त्रयीधर्म्ममनुप्रपन्ना गतागत कामकामा लभन्ते ॥९।२१॥

९—लययोग-राजयोग-मन्त्रयोग-हठयोगैश्चतुर्धा भिन्नाना भक्तियोगिना सगुणविद्योपासकाना सान्त-रायत्वादव्ययानवगाहितया मन्दफलत्वम् ।

अनन्याश्चिन्तयन्तो मा ये जना पर्य्युपासते ।
तेषा नित्याभियुक्ताना योगक्षेम वहाम्यहम् ॥९।२२॥
येऽप्यन्यदेवताभक्ता यजन्ते श्रद्धयान्विता ।
तेऽपि मामेव कौन्तेय ! यजन्त्यविधिपूर्वकम् ॥९।२३॥
अह हि सर्वयज्ञाना भोक्ता च प्रभुरेव च ।
न तु मामभिजानन्ति तत्त्वेनातश्च्यवन्ति ते ॥९।२४॥
यान्ति देवव्रता देवान् पितॄन् यान्ति पितृव्रता ।
भूतानि यान्ति भूतेज्या यान्ति मद्याजिनोऽपि माम् ॥९।२५॥

१०—सर्वकर्म्मार्पणभक्तियोगेनाव्ययोपासनाया कर्म्मबन्धनिवर्तकत्वम् ।

पत्र पुष्प फल तोय यो मे भक्त्या प्रयच्छति ।
तदह भक्त्युपहृतमश्नामि प्रयतात्मन ॥९।२६॥
यत्करोषि यदश्नासि यज्जुहोषि ददासि यत् ।
यत्तपस्यसि कौन्तेय ! तत् कुरुष्व मदर्पणम् ॥९।२७॥
शुभाशुभफलैरेव मोक्ष्यसे कर्म्मबन्धनै ।
सन्यासयोगयुक्तात्मा विमुक्तो मामुपैष्यसि ॥९।२८॥

११—निर्गुणविद्योपासकाना ज्ञानयोगिना विशुद्धैकाव्ययानन्यभक्तिमाहात्म्यम् ।

समोऽह सर्वभूतेषु न मे द्वेष्योस्ति न प्रिय ।
ये भजन्ति तु मा भक्त्या मयि ते तेषु चाप्यहम् ॥९।२९॥
अपि चेत् सुदुराचारो भजते मामनन्यभाक् ।
साधुरेव स मन्तव्य सम्यग्व्यवसितो हि स ॥९।३०॥
क्षिप्र भवति धर्म्मात्मा शश्वच्छान्ति निगच्छति ।
कौन्तेय ! प्रतिजानीहि न मे भक्त प्रणश्यति ॥९।३१॥
मा हि पार्थ ! व्यपाश्रित्य येऽपि स्यु पापयोनय ।
स्त्रियो वैश्यास्तथा शूद्रास्तेऽपि यान्ति परा गतिम् ॥९।३२॥

किं पुनर्ब्राह्मणा पुण्या भक्ता राजर्षयस्तथा ।
अनित्यमसुखं लोकमिमं प्राप्य भजस्व माम् ॥९।३३॥
मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु ।
मामेवैष्यसि युक्त्वैवमात्मानं मत्परायणः ॥९।३४॥

इति नवमोऽध्यायः ॥

---

(२) ईश्वरीययोगविभूतिलक्षणविज्ञानद्वयोपनिषत्

१—ईश्वरविभूतिज्ञानमाहात्म्यम् ।

श्रीभगवानुवाच

भूय एव महावाहो शृणु मे परम वच ।
यत्तेऽह प्रीयमाणाय वक्ष्यामि हितकाम्यया ॥१०।१॥
न मे विदु सुरगणा प्रभव न महर्षय ।
अहमादिर्हि देवाना महर्षीणा च सर्वश ॥१०।२॥
यो मामजमनादि च वेत्ति लोकमहेश्वरम् ।
असमूढ स मर्त्येषु सर्वपापै प्रमुच्यते ॥१०।३॥

२—आध्यात्मिकमानसभावानामीश्वराव्ययानुभावितत्वम् ।

बुद्धि[१]र्ज्ञान[२]ममसोह[३] क्षमा[४] सत्य[५] दम[६] शम[७] ।
सुख[८] दु ख[९] भवो[१०] भावो[११] भय[१२] चाभयमेव[१३] च ॥१०।४॥
अहिसा[१४] समता[१५] तुष्टि[१६] स्तपो[१७] दान[१८] यशो[१९]ऽयश[२०] ।
भवन्ति भावा भूताना मत्त एव पृथग्विधा ॥१०।५॥

३—आधिदैविकमानसभावानामीश्वराव्ययानुभावितत्वम् ।

महर्षय सप्त पूर्वे चत्वारो मनवस्तथा ।
मद्भावा मानसा जाता येषा लोक इमा प्रजा ॥१०।६॥

४—ईश्वरयोगज्ञानमाहात्म्यम् ।

एता विभूति[१] योग च मम यो वेत्ति तत्त्वत ।
सोऽविकम्पेन योगेन युज्यते नात्र सशय ॥१०।७॥

एता विभूति योग चेति—दहरोत्तरयोर्भावयो ससर्गो द्विविध—योगो विभूतिश्चेति । उत्तर-प्रवृक्तत्वेन दहरेऽनुग्रहो योग । अप्रवृक्तस्य दहरेऽनुग्रहो विभूति ॥१॥ तुषारस्यागलितस्य जले प्रवेशो विभूति । गलितस्य तु योग ॥२॥ सूर्य्यप्रतिबिम्बे सूर्य्यप्रकाशस्य विभूति । प्रतिविम्बस्य विलीनस्य

५—ईश्वरसाक्षात्कारोपयिकबुद्धियोगप्राप्त्युपाया ।

अह सर्वस्य प्रभवो मत्त सर्व प्रवर्तते ।
इति मत्वा भजन्ते मा बुधा भावसमन्विता ॥१०।८॥
मच्चित्ता मद्गतप्राणा बोधयन्त परस्परम् ।
कथयन्तश्च मा नित्य तुष्यन्ति च रमन्ति च ॥१०।९॥
तेषा सततयुक्ताना भजना प्रीतिपूर्वकम् ।
ददामि बुद्धियोग त येन मामुपयान्ति ते ॥१०।१०॥
तेषामेवानुकम्यार्थमहमज्ञानज तम ।
नाशयाम्यात्मभावस्थो ज्ञानदीपेन भास्वता ॥१०।११॥

६—ईश्वराव्ययदिव्यविभूतिजिज्ञासा ।

अर्जुन उवाच

पर ब्रह्म पर धाम पवित्र परम भवान् ।
पुरुष शाश्वत दिव्यमादिदेवमज विभुम् ॥१०।१२॥
आहुस्त्वामृषय सर्वे देवर्षिर्नारदस्तथा ।
असितो देवलो व्यास स्वय चैव ब्रवीषि मे ॥१०।१३॥
सर्वमेतदृत मन्ये यन्मा वदसि केशव ।
न हि ते भगवन् ! व्यक्ति विदुर्देवा न दानवा ॥१०।१४॥
स्वयमेवात्मनात्मान वेत्थ त्व पुरुषोत्तम ! ।
भूतभावन भूतेश देवदेव जगत्पते ! ॥१०।१५॥
वक्तुमर्हस्यशेषेण दिव्या ह्यात्मविभूतय ।
याभिर्विभूतिभिर्लोकानिमास्त्व व्याप्य तिष्ठसि ॥१०।१६॥

सूर्य्यप्रकाशे योग ॥३॥ अग्नियोगादपा द्रवीभाव । अग्निविभूतेरपा सतप्तत्वम् ॥४॥ अपा योगात्तन्दुलस्योदनत्वम् । अपा विभूतेस्तन्दुलस्यार्द्रत्वम् ॥५॥ कस्तूरीकेसरकर्पूरप्रसूनादिषु गन्धविशेषाणा योगा । वायौ तु तेषा विभूति ॥६॥ पुष्परसाना पुष्पेषु भिन्ना योगा । तेषा मधुमक्षिकामधुनि पुनरेको योग । धात्रीमुरब्बाया मधुनो योगश्च विभूतिश्च ॥७॥ सूर्य्यप्रतिबिम्बे सूर्य्यबिम्बे च तेजसो योग । प्रतिबिम्बस्य जलदर्पणनेत्रादौ विभूति ॥८॥ मर्द्दितविकृते लोष्टे बलयोग । प्रक्षिप्ते लोष्टे बलविभूति ॥९॥ वस्त्रे सुधाचूर्णादौ श्वैत्यस्य योग । सुधाचूर्णोपरञ्जितभित्तौ श्वैत्यविभूति ॥१०॥ गृहादिशिल्पकलारचनाया बुद्धियोग । गृहादिशिल्पनिर्म्माणक्रमसमालोचनाया बुद्धिविभूति ॥११॥ स्वधा योग । स्वाहा विभूति ॥१२॥ अन्तर्यामो योग । बहिर्य्यामो विभूति ॥१३॥ स्वरूपधर्म्मो योग । आश्रितधर्म्मो विभूति ॥१४॥ बुद्धिर्ज्ञानमसमोह क्षमा सत्य दम शम—इत्यादिर्योगोऽव्ययस्य । भूतानामादिमध्यान्तव्यापी अव्ययो विभूति ॥१५॥ आदित्यान मह विष्णु, मरीचिर्मरुताम्, इन्द्रियाणा मन इत्यादिरधिष्ठानाभिव्यापी प्रधानोऽधष्ठाता विभूति ॥१६॥

रससामान्यस्य अप्सामान्ये सामान्यभावेनावस्थान विभूति ।
रसस्य अप्सु सर्वेतरवैलक्षण्येनावस्थान विशेषसयेग ॥१७॥

कथ विद्यामह योगिस्त्वा सदा परिचिन्तयन् ।
केषु केषु च भावेषु चिन्त्योऽसि भगवन् ! मया ॥१०।१७॥
विस्तरेणात्मनो योग विभूति च जनार्दन ! ।
भूय कथय तृप्तिर्हि शृण्वनो नास्ति मेऽमृतम् ॥१०।१८॥

७—ईश्वराव्ययदिव्यविभूतीना [७२]द्वासप्ततिरुदाहरणानि ।

श्रीभगवानुवाच

हन्त ते कथयिष्यामि दिव्या ह्यात्मविभूतय ।
प्राधान्यत कुरुश्रेष्ठ ! नास्त्यन्तो विस्तरस्य मे ॥१०।१९॥
अहमात्मा[१] गुडाकेश ! सर्वभूताशयस्थित ।
अहमादिश्च[२] मध्य च भूतानामन्त एव च ॥१०।२०॥
आदित्यानामह विष्णु[३]र्ज्योतिषा रवि[४]रशुमान् ।
मरीचि[५]र्मरुतामस्मि नक्षत्राणामह शशी[६] ॥१०।२१॥
वेदाना साम[७]वेदोऽस्मि देवानामस्मि वासव[८] ।
इन्द्रियाणा मन[९]श्चास्मि भूतानामस्मि चेतना[१०] ॥१०।२२॥
रुद्राणा शङ्कर[११]श्चास्मि वित्तेशो[१२]यक्षरक्षसाम् ।
वसूना पावक[१३]श्चास्मि मेरु[१४] शिखरिणामहम् ॥१०।२३॥
पुरोधसा च मुख्य मा विद्धि पार्थ ! बृहस्पतिम्[१५] ॥
सेनानीनामह स्कन्द[१६] सरसामस्मि सागर[१७] ॥१०।२४॥
महर्षीणा भृगुरह[१८] गिरामस्म्येकमक्षरम्[१९] ।
यज्ञाना जप[२०]यज्ञोऽस्मि स्थावराणा हिमालय[२१] ॥१०।२५॥
अश्वत्थ[२२] सर्ववृक्षाणा देवर्षीणा च नारद[२३] ।
गन्धर्वाणा चित्ररथ[२४] सिद्धाना कपिलो[२५]मुनि ॥१०।२६॥
उच्चैश्रव[२६]समश्वाना विद्धि माममृतोद्भवम् ।
ऐरावत[२७] गजेन्द्राणा नराणा च नराधिपम्[२८] ॥१०।२७॥
आयुधानामह वज्र[२९] धेनूनामस्मि कामधुक्[३०] ।
प्रजनश्चास्मि कन्दर्प[३१] सर्पाणामस्मि वासुकि[३२] ॥१०।२८॥
अनन्त[३३]श्चास्मि नागाना वरुणो[३४] यादसामहम् ।
पितॄणामर्यमा[३५] चास्मि यम[३६] सयमतामहम् ॥१०।२९॥
प्रह्लाद[३७]श्चास्मि दैत्याना काल[३८] कलयतामहम् ।
मृगाणा च मृगेन्द्रो[३९]ऽह वैनतेय[४०]श्च पक्षिणाम् ॥१०।३०॥
पवन[४१] पवतामस्मि राम[४२] शस्त्रभृतामहम् ।
झषाणा मकरश्चास्मि[४३] स्रोतसामस्मि जाह्नवी[४४] ॥१०।३१॥
सर्गाणामादिरन्तश्च[४५] मध्य चैवाहमर्जुन ! ।
अध्यात्मविद्या[४६] विद्याना वाद[४७] प्रवदतामहम् ॥३२॥
अक्षराणामकारोऽस्मि[४८] द्वन्द्व[४९] सामासिकस्य च ।
अहमेवाक्षय[५०] कालो धाताह[५१] विश्वतोमुख ॥१०।३३॥
मृत्यु[५२] सर्वहरश्चाहमुद्भवश्च[५३] भविष्यताम् ।
कीर्त्ति श्रीर्वाक्[५४] च नारीणा स्मृतिर्मेधा धृति क्षमा ॥१०।३४॥

वृहत्साम[५५] तथा साम्ना गायत्री[५६] छन्दसामहम् ।
मासाना मार्गशीर्षो[५७]ऽहमृतूना कुसुमाकर[५८] ॥१०।३५॥
द्यूत[५९] छलयतामस्मि तेज[६०]स्तेजस्विनामहम् ।
जयोऽस्मि[६१] व्यवसायोऽस्मि[६२] सत्त्व[६३] सत्त्ववतामहम् ॥१०।३६॥
वृष्णीना वासुदेवो[६४]ऽस्मि पाण्डवाना धनञ्जय[६५] ॥
मुनीनामप्यह व्यास[६६] कवीनामुशना[६७] कवि ॥१०।३७॥
दण्डो[६८] दमयतानस्मि नीतिरस्मि[६९] जिगीषताम् ।
मौन[७०] चवास्मि गुह्याना ज्ञान[७१] ज्ञानवतामहम् ॥१०।३८॥
यच्चापि सर्वभूताना बीज[७२] तदहमर्जुन ।
न तदस्ति विना यत्स्यान्मया भूत चराचरम् ॥१०।३९॥
नान्तोऽस्ति मम दिव्याना विभूतीना परन्तप ।
एष तूद्देशत प्रोक्तो विभूतेर्विस्तरो मया ॥१०।४०॥
यद् यद् विभूतिमत्सत्त्व श्रीमदूर्जितमेव वा ।
तत्तदेवावगच्छ त्व मम तेजोऽशसभवम् ॥१०।४१॥
अथवा बहुनैतेन कि ज्ञातेन तवार्जुन ।
विष्टभ्याहमिद कृत्स्नमेकाशेन स्थितो जगत् ॥१०।४२॥

इति दशमोऽध्याय. ॥

८—अर्जुनस्य ईश्वरवैश्वरूप्यदर्शनाकाङ्क्षा ।

अर्जुन उवाच

मदनुग्रहाय परम गुह्यमध्यात्मसज्ञितम् ।
यत् त्वयोक्त वचस्तेन मोहोऽय विगतो मम ॥११।१॥
भवाप्ययौ हि भूताना श्रुतौ विस्तरशो मया ।
त्वत्त कमलपत्राक्ष माहात्म्यमपि चाव्ययम् ॥११।२॥
एवमेतद् यथात्थ त्वमात्मान परमेश्वर ।
द्रष्टुमिच्छामि ते रूपमैश्वर पुरुषोत्तम ॥११।३॥
मन्यसे यदि तच्छक्य मया द्रष्टुमिति प्रभो ।
योगेश्वर ततो मे त्व दर्शयात्मानमव्ययम् ॥११।४॥

९—योगविद्याप्रभावेण अर्जुनाय विश्वरूपदर्शनोपयोगिदिव्यचक्षुःप्रदानम् ।

श्रीभगवानुवाच

पश्य मे पार्थ रूपाणि शतशोऽथ सहस्रश ।
नानाविधानि दिव्यानि नानवर्णाकृतीनि च ॥११।५॥
पश्यादित्यान् वसून् रुद्रानश्विनौ मरुतस्तथा ।
बहून्यदृष्टपूर्वाणि पश्याश्चर्याणि भारत ॥११।६॥

इहैकस्थ जगत् कृत्स्न पश्याद्य सचराचरम् ।
मम देहे गुडाकेश ! यच्चान्यद् द्रष्टुमिच्छसि ॥११।७॥
न तु मा शक्यसे द्रष्टुमनेनैव स्वचक्षुषा ।
दिव्य ददामि ते चक्षु पश्य मे योगमैश्वरम् ॥११।८॥

१०—वासुदेवशरीरावच्छिन्नाव्यये योगविद्याप्रभावसपन्ने ईश्वराव्ययाभेदोपपत्त्या ईश्वरवैश्वरूप्य-प्रदर्शनम् ।

सञ्जय उवाच

एवमुक्त्वा ततो राजन् महायोगेश्वरो हरि ।
दर्शयामास पार्थाय परम रूपमैश्वरम् ॥११।९॥
अनेकवक्त्रनयनमनेकाद्भुतदर्शनम् ।
अनेकदिव्याभरण दिव्यानेकोद्यतायुधम् ॥११।१०॥
दिव्यमाल्याम्बरधर दिव्यगन्धानुलेपनम् ।
सर्वाश्चर्यमय देवमनन्त विश्वतोमुखम् ॥११।११॥
दिवि सूर्यसहस्रस्य भवेद्युगपदुत्थिता ।
यदि भा सदृशी सा स्याद् भासस्तस्य महात्मन ॥११।१२॥
तत्रैकस्थ जगत्कृत्स्न प्रविभक्तमनेकधा ।
अपश्यद्देवदेवस्य शरीरे पाण्डवस्तदा ॥११।१३॥
तत स विस्मयाविष्टो हृष्टरोमा धनञ्जय ।
प्रणम्य शिरसा देव कृताञ्जलिरभाषत ॥११।१४॥

११—अर्जुनकृता ईश्वरस्तुति ।

अर्जुन उवाच

पश्यामि देवास्तव देव देहे सर्वास्तथा भूतविशेषसघान् ।
ब्रह्माणमीश कमलासनस्थमृषीश्च सर्वानुरगाश्च दिव्यान् ॥११।१५॥
अनेकबाहूदरवक्त्रनेत्र पश्यामि त्वा सर्वतोऽनन्तरूपम् ॥
नान्त न मध्य न पुनस्तवादि पश्यामि विश्वेश्वर विश्वरूप ! ॥११।१६॥
किरीटिन गदिन चक्रिण च तेजोराशि सर्वतो दीप्तिमन्तम् ।
पश्यामि त्वा दुर्निरीक्ष्य समन्ताद्दीप्तानलार्कद्युतिमप्रमेयम् ॥११।१७॥
त्वमक्षर परम वेदितव्य त्वमस्य विश्वस्य पर निधानम् ।
त्वमव्यय शाश्वतधर्मगोप्ता सनातनस्त्व पुरुषो मतो मे ॥११।१८॥
अनादिमध्यान्तमनन्तवीर्य्यमनन्तबाहु शशिसूर्यनेत्रम् ।
पश्यामि त्वा दीप्तहुताशवक्त्र स्वतेजसा विश्वमिद तपन्तम् ॥११।१९॥
द्यावापृथिव्योरिदमन्तर हि व्याप्त त्वयैकेन दिशश्च सर्वा ।
दृष्ट्वाद्भुत रूपमुग्र तवेद लोकत्रय प्रव्यथित महात्मन् ! ॥११।२०॥

अमी हि त्वा सुरसघा विशन्ति केचिद् भीता प्राञ्जलयो गृणन्ति ।
स्वस्तीत्युक्त्वा महर्षिसिद्धसघा स्तुवन्ति त्वा स्तुतिभि पुष्कलाभि ॥११।२१॥
रुद्रादित्या वसवो ये च साध्या विश्वेऽश्विनौ मरुतश्चोष्मपाश्च ।
गन्धर्वयक्षासुरसिद्धसघा वीक्षन्ते त्वा विस्मिताश्चैव सर्वे ॥११।२२॥
रूप महत्ते वहुवक्त्रनेत्र महावाहो ! वहुवाहूरुपादम् ।
वहूदर वहुदष्ट्राकराल दृष्ट्वा लोका प्रव्यथितास्तथाऽहम् ॥११।२३॥
नभ स्पृश दीप्तमनेकवर्ण व्यात्तानन दीप्तविशालनेत्रम् ।
दृष्ट्वा हि त्वा प्रव्यथितान्तरात्मा धृति न विन्दामि शम च विष्णो ! ॥११।२४॥
दष्ट्राकरालानि च ते मुखानि दृष्ट्वैव कालानलसनिभानि ।
दिशो न जाने न लभे च शर्म्म प्रसीद देवेश जगन्निवास ! ॥११।२५॥
अमी च त्वा धृतराष्ट्रस्य पुत्रा सर्वे सहैवावनिपालसघै ।
भीष्मो द्रोण सूतपुत्रस्तथासौ सहास्मदीयैरपि योधमुख्यै ॥११।२६॥
वक्त्राणि ते त्वरमाणा विशन्ति दष्ट्राकरालानि भयानकानि ।
केचिद्विलग्ना दशनान्तरेषु सदृश्यन्ते चूर्णितैरुत्तमाङ्गै ॥११।२७॥
यथा नदीना वहवोऽम्वुवेगा समुद्रमेवाभिमुखा द्रवन्ति ।
तथा तवामी नरलोकवीरा विशन्ति वक्त्राण्यभिविज्वलन्ति ॥११।२८॥
यथा प्रदीप्त ज्वलन पतङ्गा विशन्ति नाशाय समृद्धवेगा ।
तथैव नाशाय विशन्ति लोकास्तवापि वक्त्राणि समृद्धवेगा ॥११।२९॥
लेलिह्यसे ग्रसमान समन्ताल्लोकान् समग्रान् वदनैर्ज्वलद्भि ।
तेजोभिरापूर्य जगत्समग्र भासस्तवोग्रा प्रतपन्ति विष्णो ! ॥११।३०॥
आख्याहि मे को भवानुग्ररूपो नमोऽस्तु ते देववर ! प्रसीद ।
विज्ञातुमिच्छामि भवन्तमाद्य न हि प्रजानामि तव प्रवृत्तिम् ॥११।३१॥

१२—अर्जुन प्रति भगवदनुग्रहवाक्यम् ।

श्रीभगवानुवाच ।

कालोऽस्मि लोकक्षयकृत् प्रवृद्धो लोकान् समाहर्त्तुमिह प्रवृत्त ।
ऋतेऽपि त्वा न भविष्यन्ति सर्वे येऽवस्थिता प्रत्यनीकेषु योधा ॥११।३२॥
तस्मात्त्वमुत्तिष्ठ यशो लभस्व जित्वा शत्रून् भुङ्क्ष्व राज्य समृद्धम् ।
मयैवैते निहता पूर्वमेव निमित्तमात्र भव सव्यसाचिन् ! ॥११।३३॥
द्रोण च भीष्म च जयद्रथ च कर्ण तथाऽन्यानपि योधवीरान् ।
मया हतास्त्व जहि मा व्यथिष्ठा युध्यस्व जेतासि रणे सपत्नान् ॥११।३४॥

१३—अर्जुनकृता श्रीकृष्णाय अपराधक्षमाप्रार्थना ।

सञ्जय उवाच

एतच्छ्रुत्वा वचन केशवस्य कृताञ्जलिर्वेपमान किरीटी ॥
नमस्कृत्वा भूय एवाह कृष्ण सगद्गद भीतभीत प्रणम्य ॥११।३५॥

अर्जुन उवाच

स्थाने हृषीकेश ! तव प्रकीर्त्या जगत् प्रहृष्यत्यनुरज्यते च ।
रक्षासि भीतानि दिशो द्रवन्ति सर्वे नमस्यन्ति च सिद्धसघा ॥११।३६॥
कस्माच्च ते न नमेरन् महात्मन् ! गरीयसे ब्रह्मणोऽप्यादिकर्त्रे ।
अनन्त देवेश जगन्निवास ! त्वमक्षर सदसत् तत्पर यत् ॥११।३७॥
त्वमादिदेव पुरुष पुराणस्त्वमस्य विश्वस्य पर निधानम् ।
वेत्तासि वेद्य च पर च धाम त्वया तत विश्वमनन्तरूप ! ॥११।३८॥
वायुर्यमोऽग्निर्वरुण शशाङ्क प्रजापतिस्त्व प्रपितामहश्च ।
नमो नमस्तेऽस्तु सहस्रकृत्व पुनश्च भूयोऽपि नमो नमस्ते ॥११।३९॥
नम पुरस्तादथ पृष्ठतस्ते नमोऽस्तु ते सर्वत एव सर्व ! ।
अनन्तवीर्यामितविक्रमस्त्व सर्व समाप्नोपि ततोऽसि सर्व ॥११।४०॥
सखेति मत्वा प्रसभ यदुक्त हे कृष्ण हे यादव हे सखेति ।
अजानता महिमान तवेद मया प्रमादात् प्रणयेन वापि ॥११।४१॥
यच्चावहासार्थमसत्कृतोऽसि विहारशय्यासनभोजनेषु ।
एकोऽथवाप्यच्युत ! तत्समक्ष तत् क्षामये त्वामहमप्रमेयम् ॥११।४२॥
पितासि लोकस्य चराचरस्य त्वमस्य पूज्यश्च गुरुर्गरीयान् ।
न त्वत्समोऽस्त्यभ्यधिक कुतोऽन्यो लोकत्रयेऽप्यप्रतिमप्रभाव ॥११।४३॥
तस्मात् प्रणम्य प्रणिधाय काय प्रसादये त्वामहमीशमीड्यम् ।
पितेव पुत्रस्य सखेव सख्यु प्रिय प्रियायार्हसि देव सोढुम् ॥११।४४॥
अदृष्टपूर्व हृषितोऽस्मि दृष्ट्वा भयेन च प्रव्यथित मनो मे ।
तदेव मे दर्शय देव रूप प्रसीद देवेश जगन्निवास ! ॥११।४५॥
किरीटिन गदिन चक्रहस्तमिच्छामि त्वा द्रष्टुमह तथैव ।
तेनैव रूपेण चतुर्भुजेन सहस्रबाहो ! भव विश्वमूर्त्ते ! ॥११।४६॥

१४—पुनरर्जुन प्रति भगवदनुग्रहवाक्यम् ।

श्रीभगवानुवाच

मया प्रसन्नेन तवार्जुनेद रूप पर दर्शितमात्मयोगात् ।
तेजोमय विश्वमनन्तमाद्य यन्मे त्वदन्येन न दृष्टपूर्वम् ॥११।४७॥
न वेदयज्ञाध्ययनैर्नदानैर्न च क्रियाभिर्न तपोभिरुग्रै ।
एवरूप शक्य अह नृलोके द्रष्टु त्वदन्येन कुरुप्रवीर ! ॥११।४८॥
मा ते व्यथा मा च विमूढभावो दृष्ट्वा रूप घोरमीदृङ् ममेदम् ।
व्यपेतभी प्रीतमना पुनस्त्व तदेव मे रूपमिद प्रपश्य ॥११।४९॥

१५—ईश्वरवैश्वरूप्यप्रदर्शनोत्तरं पुनर्मानुषरूपप्रदर्शने अर्जुनाश्वासनार्थं कृष्णार्जुनसवाद. ।

सञ्जय उवाच

इत्यर्जुन वासुदेवस्तथोक्त्वा स्वक रूप दर्शयामास भूय ।
आश्वासयामास च भीतमेन भूत्वा पुन सौम्यवपुर्महात्मा ॥११।५०॥

अर्जुन उवाच

दृष्ट्वेद मानुप रूप तव सोम्य जनार्दन ! ।
इदानीमस्मि सवृत्त सचेता प्रकृति गत ॥११।५१॥

श्रीभगवानुवाच

सुदुर्दर्शमिद रूप दृष्टवानसि यन्मम ।
देवा अप्यस्य रूपस्य नित्य दर्शनकाङ्क्षिण ॥११।५२॥
नाह वेदैर्न तपसा न दानेन न चेज्यया ।
शक्य एवविधो द्रष्टु दृष्टवानसि मा यथा ॥११।५३॥
भक्त्या त्वनन्यया शक्य अहमेवविधोऽर्जुन ! ।
ज्ञातु द्रष्टु च तत्त्वेन प्रवेष्टु च परतप ! ॥११।५४॥
मत्कर्मकृन् मत्परमो मद्भक्त सगवर्जित ।
निर्वैर सर्वभूतेषु य स मामेति पाण्डव ! ॥११।५५॥

इति एकादशोऽध्यायः ॥

---

(३) ईश्वरोपासनोपनिषत्

१—सगुणेश्वरोपासना—निर्गुणात्मोपासनयोर्विवेकजिज्ञासा ।

अर्जन उवाच

एव सततयुक्ता ये भक्तास्त्वा पर्युपासते ।
ये चाप्यक्षरमव्यक्त तेषा के योगवित्तमा ॥१२।१॥

२—निर्गुणात्मोपासनापेक्षया सगुणेश्वरोपासनायाः श्रेष्ठत्वे भगवत्सम्मतिः ।

श्रीभगवानुवाच

मय्यावेश्य मनो ये मा नित्ययुक्ता उपासते ।
श्रद्धया परयोपेतास्ते मे युक्ततमा मता ॥१२।२॥

३—ईश्वरव्यतिरेकेण कैवल्यात्मनोऽक्षरस्यानवस्थानादक्षरोपासनाया ईश्वरोपासनावदीश्वरप्राप्तकत्वेऽपि निर्गुणात्मनि मनोबुद्धिसचारे क्लेशाधिक्यान्नात्यन्तमपेक्षा ।

ये त्वक्षरमनिर्देश्यमव्यक्त पर्य्युपासते ।
सर्वत्रगमचिन्त्य च कूटस्थमचल ध्रुवम् ॥१२।३॥
सनियम्येन्द्रियग्राम सर्वत्र समबुद्धय ।
ते प्राप्नुवन्ति मामेव सर्वभूतहिते रता ॥१२।४॥
क्लेशोऽधिकतरस्तेषामव्यक्तासक्तचेतसाम् ।
अव्यक्ता हि गतिर्दुःख देहवद्भिरवाप्यते ॥१२।५॥

४—सर्वकर्म्मार्पणरूपेश्वराव्ययोपासनाया अनायासेनाविलम्बेन च परमपुरुषार्थप्रदायित्वात् श्रेष्ठत्वम् ।

ये तु सर्वाणि कर्माणि मयि सन्यस्य मत्परा ।
अनन्येनैव योगेन मा ध्यायन्त उपासते ॥१२।६॥
तेषामह समुद्धर्त्ता मृत्युससारसागरात् ।
भवामि न चिरात् पार्थ ! मय्यावेशितचेतसाम् ॥१२।७॥
मय्येव मन आधत्स्व मयि बुद्धि निवेशय ।
निवसिष्यसि मय्येव अत ऊर्ध्वं न सशय ॥१२।८॥

५—ईश्वरोपासनानुकल्पचतुर्विधप्रकारेषु-अभ्यास-ज्ञान-ध्यान-फलत्यागेषु उत्तरोत्तरश्रेयस्त्वम् । तत्र ईश्वरज्ञानोपयोगिकर्म्मप्रवणत्व ज्ञानम् । ईश्वरे परानुरक्तिहेतुकर्म्मप्रवणत्व ध्यानम् ।

अथ चित्त समाधातु न शक्नोषि मयि स्थिरम् ।
अभ्यास[१]योगेन ततो मामिच्छाप्तु धनञ्जय ! ॥१२।९॥
अभ्यासेऽप्यसमर्थोऽसि मत्कर्म[२] [३]परमो भव ।
मदर्थमपि कर्म्माणि कुर्वन् सिद्धिमवाप्स्यसि ॥१२।१०॥
अथैतदप्यशक्तोऽसि कर्त्तु मद्योगमाश्रित ।
सर्वकर्म्म[४]फलत्याग तत कुरु यतात्मवान् ॥१२।११॥
श्रेयो हि ज्ञान[२]मभ्या[१]साज्ज्ञानाद्ध्यान[३] विशिष्यते ।
ध्यानात्कर्म[४]फलत्यागस्त्यागाच्छान्तिरनन्तरम्॥१२।१२॥

६—ईश्वरप्रसादोपयोगिनो भक्तिभावनाप्रकारा ।

अद्वेष्टा सर्वभूताना मैत्र करुण एव च ।
निर्म्ममो निरहकार समदु खसुख क्षमी ॥१२।१३॥
सतुष्ट सतत योगी यतात्मा दृढनिश्चय ।
मय्यर्पितमनोबुद्धिर्यो मे भक्त स मे प्रिय ॥१२।१४॥
यस्मान्नोद्विजते लोको लोकान्नोद्विजते च य ।
हर्षामर्षभयोद्वेगैर्मुक्तो य स च मे प्रिय ॥१२।१५॥
अनपेक्ष शुचिर्दक्ष उदासीनो गतव्यथ ।
सर्वारम्भपरित्यागी यो मद्भक्त स मे प्रिय ॥१२।१६॥
यो न हृष्यति न द्वेष्टि न शोचति न काङ्क्षति ।
शुभाशुभपरित्यागी भक्तिमान् य स मे प्रिय ॥१२।१७॥
सम शत्रौ च मित्रे च तथा मानापमानयो ।
शीतोष्णसुखदु खेषु सम सङ्गविवर्जित ॥१२।१८॥
तुल्यनिन्दास्तुतिर्म्मौनी सतुष्टो येन केनचित् ।
अनिकेतस्थिरमतिर्भक्तिमान् मे प्रियो नर ॥१२।१९॥
ये तु धर्म्म्यामृतमिद यथोक्त पर्य्युपासते ।
श्रद्दधाना मत्परमा भक्तास्तेऽतीव मे प्रिया ॥१२।२०॥

इति द्वादशोऽध्यायः ॥

इति भगवद्गीतोपनिषदि अस्मिताक्लेशनिवर्तिका ऐश्वर्यबुद्धियोगपरिष्कृता *राजविद्या समाप्ता ।

(३)

---

*ऐश्वर्य्य—बुद्धयाऽऽराधिकाऽनन्यभक्ति =राजविद्यारहस्यम् ।
अनन्यभक्तिर्हि तत्राव्यये बुद्धे प्रवेशाय द्वारमपेक्ष्यते ॥

अथ आर्षविद्याया धर्मबुद्धियोगेन संस्कार आदिश्यते

प्रकृति-पुरुषयो, क्षेत्र-क्षेत्रज्ञयो, ज्ञान-ज्ञेययोरित्येव द्वन्द्व[१] त्रयस्य विज्ञानम् ।
सत्त्वरजस्तमोलक्षणगुण[२] त्रयविज्ञानम् ।
कर्मब्रह्मभेदादश्वत्थद्वय[३] विज्ञानम् ।
दैवासुरभूतसर्गद्वयभेदात् सपद्[४] द्वयविज्ञानम् ।
नैर्गुण्यनैष्कर्म्यप्रतिपत्तये गुणकर्मद्वयविज्ञानम्[५] ।
अवन्धनकर्मद्वयविज्ञानम्[६] ।

इत्येव षड्भावनाभिर्विश्वविज्ञानसिद्धिरार्षविद्या नाम ॥ सेय पुरायुगे ब्रह्मर्षिकुले भूयसा प्रचरति स्म। तामप्येतामनुज्ञादानाय स्वसमति प्रत्याययितुमिह गीताया भगवानन्वादिशति नवाशीत्यधिकशतश्लोकै ॥१८९॥

(१) प्रकृति-पुरुषौ, क्षेत्र-क्षेत्रज्ञौ, ज्ञान-ज्ञेयौ इति षड्विज्ञानोपनिषत्

१—प्रकृति-पुरुषयो', क्षेत्र-क्षेत्रज्ञयो, ज्ञान-ज्ञेययोश्च स्वरूपनिरूपणोपक्रम ।

अर्जुनउवाच

† प्रकृति[१] पुरुष[२] चैव क्षेत्र[३] क्षेत्रज्ञमेव[४] च ।
एतद्वेदितुमिच्छामि ज्ञान[५] ज्ञेय[६] च केशव ! ॥१३।१॥

२—क्षेत्रक्षेत्रज्ञयो, भूतग्राम-विज्ञानात्मनो,' शरीरशारीरकयोश्च विवेकलक्षण ज्ञानम् ।

श्रीभगवानुवाच

इद शरीर कौन्तेय ! **क्षेत्र**मित्यभिधीयते ।
एतद्यो वेत्ति त प्राहु **क्षेत्रज्ञ** इति तद्विद ॥१३।२॥
क्षेत्रज्ञ चापि मा विद्धि सर्वक्षेत्रेषु भारत ।
क्षेत्र-क्षेत्रज्ञयोर्ज्ञान यत्तज्ज्ञान मत मम ॥१३।३॥

---

† इदं पद्यं बहवो व्याख्याकारा न निबध्नन्ति। महाभारते तु दृश्यते ।
प्रकरणान्तरारम्भे उत्थानिका योग्येतीदमत्र निवेशितम् ।
ये त्विद न पठन्ति, तैः षोडशेऽध्याये पञ्चमश्लोकानन्तरम् "द्वौ भूतसर्गौ" इत्यादि पद्य पठनीयम्। तेन सख्याभेदो नास्ति ।

३—अष्टपुरीलक्षण—क्षेत्रनिरुक्ति ।

तत् क्षेत्र यच्च यादृक् च यद्विकारि यतश्च यत् ।
स च यो यत्प्रभावश्च तत् समासेन मे शृणु ॥१३।४॥
ऋषिभिर्बहुधा गीत छन्दोभिर्विविधै पृथक् ।
ब्रह्मसूत्रपदैश्चैव हेतुमद्भिर्विनिश्चितै ॥१३।५॥
†महाभूतान्यहकारो बुद्धिरव्यक्तमेव च ।
इन्द्रियाणि दशैक च पञ्च चेन्द्रियगोचरा ॥१३।६॥
इच्छा द्वेष सुख दु ख सघातश्चेतना धृति ।
एतत् क्षेत्र समासेन सविकारमुदाहृतम् ॥१३।७॥

४—विंशतिलक्षण—ज्ञाननिरुक्ति ।

क्षेत्रक्षेत्रज्ञविवेकज्ञानजनितानीमानि विंशतिर्लक्षणानि ।

*[१]अमानित्वमद[२]म्भित्व[३]महिंसा[४]क्षान्ति[५]रार्जवम् ।
[६]आचार्य्योपासन [७]शौच [८]स्थैर्य्य[९]मात्मविनिग्रह ॥१३।८॥
[१०]इन्द्रियार्थेषु वैराग्य[११]मनहंकार एव च ।
[१२]जन्ममृत्युजराव्याधिदु खदोषानुदर्शनम् ॥१३।९॥
[१३]असक्ति[१४]रनभिष्वङ्ग पुत्रदारगृहादिषु ।
[१५]नित्य च समचित्तत्वमिष्टानिष्टोपपत्तिषु ॥१३।१०॥
[१६]मयि चानन्ययोगेन भक्तिरव्यभिचारिणी ।
[१७]विविक्तदेशसेवित्व[१८]मरतिर्जनसंसदि ॥१३।११॥
[१९]अध्यात्मज्ञाननित्यत्व [२०]तत्त्वज्ञानार्थदर्शनम् ।
एतज्ज्ञानमितिप्रोक्तमज्ञान यदतोऽन्यथा ॥१३।१२॥

---

†५ महाभूतानि....	१	१ *अमानित्वम्	११ आत्मविनिग्रहः
५ कर्म्मेन्द्रियाणि	२	२ अदम्भित्वम्	१२ आत्मानन्यभक्ति.
५ ज्ञानेन्द्रियाणि.	३	३ अहिंसा	१३ अध्यात्मज्ञाननित्यता
५ इन्द्रियार्था.	४	४ अनहंकार	१४ तत्त्वज्ञानार्थदृष्टिः
४ अव्यक्तमहंकारो बुद्धिर्मनः	५	५ अनासक्ति.	१५ इष्टानिष्टादिसमचित्तत्वम्
५ इच्छाद्वेषौ सुखदुःखे धृति	६	६ अनभिष्वङ्ग	१६ आचार्य्योपासनम्
१ सघात...	७	७ संसद्यरति	१७ स्थैर्य्यम्
१ चेतना. .	८	८ इन्द्रियार्थवैराग्यम्	१८ आर्जवम्
		९ द्वन्द्वेषु दोषदृष्टि	१९ क्षान्ति·
		१० विविक्तदेशसेवित्वम्	२० शौचम्
३१ अष्टपुर्य्यः क्षेत्रम् । ८			२०

५—सर्वाधारभूत-परब्रह्माव्ययपुरुषलक्षण-ज्ञेयनिरुक्ति ।

ज्ञेय[5] यत्तत् प्रवक्ष्यामि यज्ज्ञात्वाऽमृतमश्नुते ।
अनादिमत् पर ब्रह्म न सत् तन्नासदुच्यते ॥१३।१३॥
सर्वत पाणिपाद तत् सर्वतोऽक्षिशिरोमुखम् ।
सर्वत श्रुतिमल्लोके सर्वमावृत्य तिष्ठति ॥१३।१४॥
सर्वेन्द्रियगुणाभास सर्वेन्द्रियविवर्जितम् ।
असक्त सर्वभृच्चैव निर्गुण गुणभोक्तृ च ॥१३।१५॥
बहिरन्तश्च भूतानामचर चरमेव च ।
सूक्ष्मत्वात्तदविज्ञेय दूरस्थ चान्तिके च तत् ॥१३।१५॥
अविभक्त च भूतेषु विभक्तमिव च स्थितम् ।
भूतभर्तृ च तज्ज्ञेय ग्रसिष्णु प्रभविष्णु च ॥१३।१७॥
ज्योतिषामपि तज्ज्योतिस्तमस परमुच्यते ।
ज्ञान ज्ञेय ज्ञानगम्य हृदि सर्वस्य विष्ठितम् ॥१३।१८॥
इति **क्षेत्र** तथा **ज्ञान ज्ञेय** चोक्त समासत ।
मद्भक्त एतद्विज्ञाय मद्भावायोपपद्यते ॥१३।१९॥

६—सर्वविधविकारग्रामसमुद्भावकत्रैगुण्यलक्षणप्रकृतिसज्ञस्य कर्म्मण, सर्वविधविकारगुणग्रामाधार-भूतनिष्क्रियनैर्गुण्यलक्षणपुरुषसंज्ञस्य ब्रह्मणश्च परस्परोपयोगाभिज्ञानानि ।

प्रकृति पुरुषं चैव विद्धचनादी उभावपि ।
विकाराश्च गुणाश्चैव विद्धि प्रकृतिसभवान् ॥१३।२०॥
कार्य्यकारणकर्तृत्वे हेतु **प्रकृति**रुच्यते ।
पुरुषः सुखदु खाना भोक्तृत्वे हेतुरुच्यते ॥१३।२१॥
पुरुषः प्रकृतिस्थो हि भुङ्क्ते प्रकृतिजान् गुणान् ।
कारण गुणसङ्गोऽस्य सदसद्योनिजन्मसु ॥१३।२२॥
उपद्रष्टानुमन्ता च भर्ता भोक्ता महेश्वरः ।
परमात्मेति चाप्युक्तो देहेऽस्मिन् पुरुष पर ॥१३।२३
य एव वेत्ति **पुरुष प्रकृति** च गुणै सह ।
सर्वथा वर्त्तमानोऽपि न स भूयोऽभिजायते ॥१३।२४॥

१—प्रकृतिः — कर्त्री = त्रैगुण्यम्
२—पुरुष. — भोक्ता = भूतात्मा
३—क्षेत्रम् — शरीरम् = अष्टपुर्य्य.
४—क्षेत्रज्ञः — शरीरी = विज्ञानात्मा
५—ज्ञानम् — शरीर—शारीरकयोर्विवेक.
६—ज्ञेयम् — सदसत् पर ब्रह्म-अव्ययम् ।

७—मृत्युनिस्तारक-पुरुषोपासनाभेदा ।

ध्यानेनात्मनि पश्यन्ति केचिदात्मानमात्मना ।
अन्ये साख्येन योगेन कर्मयोगेन चापरे ॥१३।२५॥
अन्ये त्वेवमजानन्त श्रुत्वान्येभ्य उपासते ।
तेऽपि चातितरन्त्येव मृत्यु श्रुतिपरायणा ॥१३।२६॥

८—सत्त्वस्य प्राणिन क्षेत्र-क्षेत्रज्ञसयोगोपाधिकत्वम् ।

यावत्सजायते किंचित् सत्त्व स्थावरजङ्गमम् ।
क्षेत्र-क्षेत्रज्ञसयोगात्तद्विद्धि भरतर्षभ ॥१३।२७॥

९—क्षेत्रस्थितस्य परमेश्वरस्य[1], ईश्वरस्य[2], परमात्मनो[3], विज्ञानात्मन[4]श्च क्षेत्रात् पृथक्त्वेन दर्शनमात्मसाक्षात्कारलक्षण पुरुषार्थ ।

सम सर्वेषु भूतेषु तिष्ठन्त [1]**परमेश्वरम्*** ।
विनश्यत्स्वविनश्यन्त य पश्यति स पश्यति ॥१३।२८॥
सम पश्यन् हि सर्वत्र समवस्थित**मीश्वरम्**[2] ।
न हिनस्त्यात्मनात्मान ततो याति परा गतिम् ॥१३।२९॥
प्रकृत्यैव च कर्म्माणि क्रियमाणानि सर्वश ।
य पश्यति तथा**त्मान**[4]**मकर्तार** स पश्यति ॥१३।३०॥
यदा भूतपृथग्भावमेकस्थमनुपश्यति ।
तत एव च विस्तार ब्रह्म सपद्यते तदा ॥१३।३१॥
अनादित्वान्निर्गुणत्वात् **परमा**[3]**त्मायमव्यय.** ।
शरीरस्थोऽपि कौन्तेय ! न करोति न लिप्यते ॥१३।३२॥
यथा सर्वगत सौक्ष्म्यादाकाश नोपलिप्यते ।
सर्वत्रावस्थितो देहे तथात्मा नोपलिप्यते ॥१३।३३॥
यथा प्रकाशयत्येक कृत्स्न लोकमिम रवि ।
क्षेत्र **क्षेत्री**[4] तथा कृत्स्न प्रकाशयति भारत ! ॥१३।३४॥
क्षेत्र-क्षेत्रज्ञयोरेवमन्तर ज्ञानचक्षुषा ।
भूतप्रकृतिमोक्ष च ये विदुर्य्यान्ति ते परम् ॥१३।३५॥

इति त्रयोदशोध्याय. ॥१३॥

---

*आनन्त्यविश्वाधिष्ठाता परमेश्वर. । अधिदैवतविश्वाधिष्ठाता अश्वत्थैकवल्शाध्यक्ष ईश्वर· । शरीरोपाधिको विशुद्धो जीवात्मा परमात्मा । शरीरविशिष्टस्तु सगुणो जीवात्मा भूतभृदात्मा ॥ अभिन्ना अप्येते चत्वारो विवक्षावशाच्चतुर्धा पृथक्कृत्येह व्याख्याताः । ते चैते ब्रह्मविज्ञाने सुविशदं व्याख्याता द्रष्टव्याः ॥

(२) सत्त्वरजस्तमोलक्षणगुणत्रयोपनिषत्

१—क्षेत्रज्ञे विशेषाधायकस्य गुणत्रयसमष्टिरूपस्य महतो ब्रह्मण सर्वभूतयोनित्वम् ।

श्रीभगवानुवाच

पर भूय प्रवक्ष्यामि ज्ञानाना **ज्ञान**मुत्तमम् ।
यज्ज्ञात्वा मुनय सर्वे परा सिद्धिमितो गता ॥१४।१॥
इद **ज्ञान**मुपाश्रित्य मम साधर्म्यमागता ।
सर्गेऽपि नोपजायन्ते प्रलये न व्यथन्ति च ॥१४।२॥
मम योनिर्महद् ब्रह्म तस्मिन् गर्भ दधाम्यहम् ।
सभव सर्वभूताना ततो भवति भारत ! ॥१४।३॥
सर्वयोनिषु कौन्तेय ! मूर्तय सभवन्ति या ।
तासा ब्रह्म महद्योनिरह बीजप्रद पिता ॥१४।४॥

२—गुणत्रयस्वरूपनिरूपणम् ।

***सत्त्वं रजस्तम** इति गुणा प्रकृतिसभवा ।
निबध्नन्ति महाबाहो देहे देहिनमव्ययम् ॥१४।५॥
तत्र सत्त्व निर्म्मलत्वात् प्रकाशकमनामयम् ।
सुखसङ्गेन बध्नाति ज्ञानसङ्गेन चानघ ! ॥१४।६॥
रजो रागात्मक विद्धि तृष्णासङ्गसमुद्भवम् ।
तन्निबध्नाति कौन्तेय ! कर्म्मसङ्गेन देहिनम् ॥१४।७॥
तमस्त्वज्ञानज विद्धि मोहन सर्वदेहिनाम् ।
प्रमादालस्यनिद्राभिस्तन्निबध्नाति भारत ! ॥१४।८॥
सत्त्व सुखे सञ्जयति रज कर्म्मणि भारत ! ।
ज्ञानमावृत्य तु तम प्रमादे सञ्जयत्युत ॥१४।९॥
रजस्तमश्चाभिभूय सत्त्व भवति भारत ! ।
रज सत्त्व तमश्चैव तम सत्त्व रजस्तथा ॥१४।१०॥
सर्वद्वारेषु देहेऽस्मिन् प्रकाश उपजायते ।
ज्ञान यदा तदा विद्याद्विवृद्ध सत्त्वमित्युत ॥१४।११॥
लोभ प्रवृत्तिरारम्भ कर्म्मणामशम स्पृहा ।
रजस्येतानि जायन्ते विवृद्धे भरतर्षभ ! ॥१४।१२॥
अप्रकाशोऽप्रवृत्तिश्च प्रमादो मोह एव च ।
तमस्येतानि जायन्ते विवृद्धे कुरुनन्दन ! ॥१४।१३॥
यदा सत्त्वे प्रवृद्धे तु प्रलय **याति** देहभृत् ।
तदोत्तमविदा लोकानमलान् प्रतिपद्यते ॥१४।१४॥

---

*सत्त्व रजस्तमश्चेति—सत्त्व प्रकाशक सुखसङ्गेन ज्ञानसङ्गेनात्मान बध्नाति । रजो रागमय तृष्णासङ्गेन कर्म्मसङ्गेनात्मान बध्नाति । तमो मोहन प्रमादालस्यनिद्राभिरात्मान बध्नाति ॥

रजसि प्रलय गत्वा कर्मसङ्गिषु जायते ।
तथा प्रलीनस्तमसि मूढयोनिषु जायते ॥१४।१५॥
कर्मण सुकृतस्याहु सात्त्विक निर्मल फलम् ।
रजसस्तु फल दु खमज्ञान तमस फलम् ॥१४।१६॥
सत्त्वात् सजायते ज्ञान रजसो लोभ एव च ।
प्रमादमोहौ तमसो भवतोऽज्ञानमेव च ॥१४।१७॥
ऊर्ध्व गच्छन्ति सत्त्वस्था मध्ये तिष्ठन्ति राजसा ।
जघन्यगुणवृत्तिस्था अधो गच्छन्ति तामसा ॥१४।१८॥
नान्य गुणेभ्य कर्तार यदा द्रष्टानुपश्यति ।
गुणेभ्यश्च पर वेत्ति मद्भाव सोऽधिगच्छति ॥१४।१९॥
गुणानेतानतीत्य त्रीन् देही देहसमुद्भवान् ।
जन्ममृत्युजरादु खैर्विमुक्तोऽमृतमश्नुते ॥१४।२०॥

३—गुणत्रयातीतस्य विदेहात्मनो लक्षणम् ।

अर्जुन उवाच

कैर्लिङ्गैस्त्रीन् गुणानेतानतीतो भवति प्रभो ! ।
किमाचार कथ चैतास्त्रीन् गुणानतिवर्तते ॥१४।२१॥

श्रीभगवानुवाच

प्रकाश च प्रवृत्ति च मोहमेव च पाण्डव ! ।
न द्वेष्टि सप्रवृत्तानि न निवृत्तानि काङ्क्षति ॥१४।२२॥
उदासीनवदासीनो गुणैर्यो न विचाल्यते ।
गुणा वर्तन्त इत्येव योऽवतिष्ठाति नेङ्गते ॥१४।२३॥
समदु खसुख स्वस्थ समलोष्टाश्मकाञ्चन ।
तुल्यप्रियाप्रियो धीरस्तुल्यनिन्दात्मसस्तुति ॥१४।२४॥
मानापमानयोस्तुल्यस्तुल्यो मित्रारिपक्षयो ।
सर्वारम्भपरित्यागी गुणातीत स उच्यते ॥१४।२५॥

४—जीवाव्ययकैवल्योपासनया ईश्वराव्ययकैवल्यसायुज्यसिद्धौ सर्वगुणात्ययाद् गुणातीतत्वसिद्धिः ।

मा च योऽव्यभिचारेण भक्तियोगेन सेवते ।
स गुणान् समतीत्यैतान् ब्रह्मभूयाय कल्पते ॥१४।२६॥

५—गुणत्रयातीतस्य ईश्वराव्ययस्य सर्वजीवसम्बन्धि-पुरुषत्रय-परात्पर-निर्विशेषसाधारणप्रतिष्ठात्वम् ।

ब्रह्मणो हि प्रतिष्ठाहममृतस्याव्ययस्य च ।
शाश्वतस्य च धर्मस्य सुखस्यैकान्तिकस्य च ॥१४।२७॥

इति चतुर्दशोऽध्यायः ॥१४॥

(३) अश्वत्थोपनिषत्

१—ब्रह्मकर्म्मणोरपृथक्त्वेन ब्रह्माश्वत्थकर्म्माश्वत्थयोरपृथग्ग्रहणात् त्रैगुण्योपपन्नकर्म्माश्वत्थनिरास-पूर्वकं ब्रह्माश्वत्थे प्रपत्त्युपदेश. ।

श्रीभगवानुवाच

ऊर्ध्वमूलमध शाखमश्व*त्थ प्राहुरव्ययम् ।
छन्दासि यस्य पर्णानि यस्त वेद स वेदवित् ॥१५।१॥

---

*अश्वत्थ प्राहुरव्ययमिति—

अश्वत्थो द्विविध —ब्रह्माश्वत्थ कर्म्माश्वत्थश्च । तदत्र प्रकरणवशाद् ब्रह्माश्वत्थ तावन्निरूपयामि ।

ऊर्ध्वमूलोऽवाक्शाख एषोऽश्वत्त्थ सनातन ।
तदेव शुक्र तद् ब्रह्म तदेवामृतमुच्यते ।
तस्मिन् लोका श्रिता सर्वे तदु नात्येति कश्चन (कठोपनिषदि)

एतावता—अमृत ब्रह्म शुक्र चेति त्रितयमेकोऽश्वत्थ । तत्र त्रिपुरुष पुरुषोऽमृतम् । प्राणा , आप , वाग्, अन्नम्, अन्नादश्चेति पञ्चकलप्रकृतिर्ब्रह्म । वागापोऽग्नि , अग्निरापो वागिति मर्त्यामृतभेदन पट् शुक्राणि । तदेतच्छुक्र प्रकृतिविकृति । अत्रेद बोध्यम्—ईश्वरस्तावद् वृक्षात्मना भाव्यमान उपास्यते, तथा च श्रूयते—

"तस्मात्पर नापरमस्ति किचित् तस्मान्नाणीयो न ज्यायोऽस्ति किञ्चित् ।
वृक्ष इव स्तब्धो दिवि तिष्ठत्येकस्तेनेद पूर्ण पुरुषेण सर्वम् ॥ इति ॥

स चोपासकविवक्षावशात् त्रेधाऽभिज्ञायते—ब्रह्मा चेदुदुम्बर । विष्णुश्चेद् अश्वत्थ । शिवश्चेद्-वट इति । अथवा अश्वत्थ एव सर्वत्र । तथा चाभियुक्ता आहु —

क्वचिन्मायाबलोद्रेकादसीमेऽस्मिन् परात्परे ।
मायावच्छेदतो मायी कल्पते पुरुषोऽव्यय ॥१॥
मायामित स पुरुषो विष्टब्धो दिवि तिष्ठति ।
एकत्र वृक्षवत् तेन परिपूर्णमिद जगत् ॥२॥
नातोऽणीयो न वा ज्यायो न पर नापर तत ।
एकेन तेन वृक्षेण जगद् व्याप्त समन्तत ॥३॥
सोऽव्ययोऽक्षरभेदेन त्रिधा कृत उपास्यते ।
स ब्रह्मा वा, स विष्णुर्वा, शकरो वा स भिन्नवत् ॥४॥
उदुम्बरद्रुमो ब्रह्मा विष्णुरश्वत्थपादप ।
वटो जटी पारिजात शकर स उपास्यते ॥५॥
अथवाऽश्वत्थ एवैको ब्रह्मा वा, शकरोऽपि वा ।
उत्थाप्यैक पद सृष्टचै त्रिपात् तिष्ठति सोऽश्ववत् ॥६॥
"त्रिपादूर्ध्व उदैत् पुरुष पादोऽस्येहाभवत् पुन ।
ततो विष्वङ् व्यक्रामत् साशनानशने अभि ॥" इति ॥

सहस्रबल्शोऽयमश्वत्थो विज्ञायते। तस्यैतदास्माकीनपृथिव्युपलक्षितेयमेका बल्शा पञ्चपुण्डीराऽन्यत्र भूयसा व्याख्याता सक्षेपादिहापि प्रदर्श्यते । अमृत-ब्रह्म शुक्रमयी हीयमेकैका बल्शा भवति ।

अधश्चोर्ध्व प्रसृतास्तस्य शाखा
गुणप्रवृद्धा विषयप्रवाला ।
अधश्च मूलान्यनुसन्ततानि
कर्म्मानुबन्धीनि मनुष्यलोके ॥१५।२॥

---

(१) तत्र तावत् स्वयभ् प्रजापति प्रथम पुण्डीर—
तस्य ब्रह्माऽक्षर पुरुष आत्मा। तस्य प्रत्यय प्रतिष्ठालक्षणा स्थिति । तस्य प्राणप्रकृतिको लोको वाक्। वाय्वाकाशौ यजुर्वाक्। ख ब्रह्म। तत्र लोके वाक्प्राणौ सोमाग्नी क ब्रह्म। यजुर्वाग् ब्रह्माऽऽवपनम्। वाक्प्राणयोर्वाक् सोमोऽन्न प्राणोऽन्नाद । ख शुद्ध ब्रह्मान्यत्। क देवौ ब्रह्मान्यत् ॥१॥

(२) अथ परमेष्ठी प्रजापतिर्द्वितीय पुण्डीर—
तस्य विष्णुरक्षर पुरुष आत्मा। तस्य प्रत्ययो यज्ञलक्षणा—अन्तर्गति । तस्य अप्प्रकृतिको लोको गौ । स वाग्लोकेन परिश्रित । भृग्वङ्गिरसौ आपो गौ ख ब्रह्म। तत्र भृगु सोम, अङ्गिरा अग्नि । तत्र लोके रयि-प्राणौ सोमाग्नी क ब्रह्म ॥२॥ आपो गौर्ब्रह्मावपनम्।
रयिप्राणयोर्मूर्त रयि सोमोऽन्नम्। प्राणोऽमूर्तोऽग्निरन्नाद । ख शुद्ध ब्रह्मान्यत् ॥२॥

(३) अथ हिरण्यगर्भ प्रजापतिस्तृतीय पुण्डीर—
तस्येन्द्रोऽक्षर पुरुष आत्मा। तस्य प्रत्ययोऽवयजनलक्षणा बहिर्गति । तस्य वाक्प्रकृतिको लोको द्यो । स वाग्लोकाभ्या परिश्रित । तत्र लोके बुद्धिप्राणौ क ब्रह्म। वाग्ज्योतिर्ब्रह्मावपनम्। तेज प्राणयोस्तेज सोमोऽन्नम्। प्राणोऽग्निरन्नाद । ख शुद्ध ब्रह्मान्यत्। क देवौ ब्रह्मान्यत् ॥३॥

(४) अथ चन्द्रमा प्रजापतिश्चतुर्थ पुण्डीर—
तस्य सोमोऽक्षर पुरुष आत्मा। तस्य प्रत्यय सकोचलक्षणा अन्तर्गति । तस्य अन्नप्रकृतिको लोकोऽन्तरिक्षम्। स चापिण्डत्वादसत्यत्वादपरिश्रित । अब्वाय्वन्नलक्षणै प्राणै पर्य्याप्त-मिदमन्तरिक्षम्। तत्र प्रज्ञाप्राणौ क ब्रह्म। अन्तरिक्ष विद्युद्ब्रह्मावपनम्। प्रज्ञाप्राणयो प्रज्ञा सोमोऽन्नम्। प्राणोऽग्निरन्नाद । ख शुद्ध ब्रह्मान्यत्। क देवौ ब्रह्मान्यत् ॥४॥

(५) अथाग्नि प्रजापति पञ्चम पुण्डीर—
तस्याग्निरक्षर पुरुष आत्मा। तस्य प्रत्ययो विकासलक्षणा बहिर्गति । तस्य अन्नादप्रकृतिको लोक पृथिवी। स चान्तरिक्ष-द्यु-गो-वाग्लोकै परिश्रित । तत्राक्षराग्निरमृतम्[१]। अन्ना-दाग्नि[२]र्ब्रह्म। य ऋतस्य प्रथमज स सत्याग्नि [३] शुक्रम्। अथ याजुषो ब्रह्माग्नि, आङ्गिरसो देवाग्नि । अथ द्विविधो वागग्नि—चित्यश्चितेनिधेयश्च। तत्राय चित्याग्नि पृथ्वीपिण्ड । तदेतावद् ब्रह्मसत्यम् ॥
चित्याग्निर्ब्रह्मावपनम्। भूतप्राणयोर्भूत सोमोऽन्नम्। प्राणोऽग्निरन्नाद । ख शुद्ध ब्रह्मान्यत्। क देवौ ब्रह्मान्यत् ॥

अथ चितेनिधेयाग्निप्रकृतिको देवप्राणाभ्या सोमाग्निरूपाभ्या कृतरूपो ब्रह्मलोक पुरुष । तत्र–अग्नि–वायु–इन्द्र–इति त्रयो देवा सन्निविशन्ते। ते चैतेऽधिदैवत सर्वभूतान्तरात्मनि—वैश्वानरो हिरण्यगर्भ सर्वज्ञ इति सज्ञायन्ते। अध्यात्म तु भूतात्मनि–वैश्वानर–तैजस–प्राज्ञ इत्युच्यन्ते। प्राणोदानौ व्यान-अपानसमानौ चेद्रि। तदेतावद्देवाग्निमय देवसत्यम् ॥

न रूपमस्येह तथोपलभ्यते
नान्तो न चादिर्न च सप्रतिष्ठा ।
अश्वत्थमेन सुविरूढमूल-
मसङ्गशस्त्रेण दृढेन छित्त्वा ॥१५।३॥
तत पद तत् परिमार्गितव्य
यस्मिन् गता न निवर्त्तन्ति भूय ।
तमेव चाद्य पुरुष प्रपद्ये
यत प्रवृत्ति प्रसृता पुराणी ॥१५।४॥

२—गुणकर्म्मप्रपञ्चोपाधिशून्यस्य ब्रह्माश्वत्थरूपाव्ययस्य साक्षात्कारोपाय ।

निर्म्मानमोहा जितसङ्गदोषा
अध्यात्मनित्या विनिवृत्तकामा ।
द्वन्द्वैर्विमुक्ता सुखदु खसञ्ज्ञै-
र्गच्छन्त्यमूढा पदमव्यय तत् ॥१५।५॥
न तद् भासयते सूर्य्यो न शशाङ्को न पावक ।
यद् गत्वा न निवर्त्तन्ते तद्धा[1]म परम मम ॥१५।६॥

३—ईश्वरात्मलक्षणपरमाव्ययस्यैव आध्यात्मिकत्वौपाधिकजीवाव्ययत्वोपपत्ति ।

ममैवाशो जीवलोके जीवभूत सनातन ।
मन षष्ठानीन्द्रियाणि प्रकृतिस्थानि कर्षति ॥१५।७॥
शरीर यदवाप्नोति यच्चाप्युत्क्रामतीश्वर ।
गृहीत्वैतानि सयाति वायुर्गन्धानिवाशयात् ॥१५।८॥

४—कर्म्माश्वत्थापृथग्भूतस्य ब्रह्माश्वत्थपरमाव्ययस्य जीवाव्ययत्वोपपत्तौ तदक्षरानुगतमहद्गुण-योगाद् भोक्तृत्वसिद्धिः ।

श्रोत्र चक्षु स्पर्शन च रसन घ्राणमेव च ।
अधिष्ठाय मनश्चाय विषयानुपसेवते ॥१५।९॥
उत्क्रामन्त स्थित वापि भुञ्जान वा गुणान्वितम् ।
विमूढा नानुपश्यन्ति पश्यन्ति ज्ञानचक्षुष ॥१५।१०॥
यतन्तो योगिनश्चैन पश्यन्त्यात्मन्यवस्थितम् ।
यतन्तोऽप्यकृतात्मानो नैन पश्यन्त्यचेतस ॥१५।११॥

---

[1] **तद्धाम परम ममेति—**
ता वा वास्तून्युश्मसि गमध्यै यत्र गावो भूरिशृङ्गा अयास· ।
अत्राह तदुरुगायस्य वृष्ण. परम पदमवभाति भूरि ॥ऋ०।
तद्विष्णो परम पदं सदा पश्यन्ति सूरय दिवीव चक्षुराततम् ॥ऋ०॥

५—गुणत्रयोपाधिभिन्नान् नानायोन्याकारान् महद्विशेषानधितिष्ठतस्तस्यैकस्यैवाश्वत्थाव्ययस्य विभिन्ननामरूपगुणकर्म्मग्राहित्वम् ।

यदादित्यगत तेजो जगद् भासयतेऽखिलम् ।
यच्चन्द्रमसि यच्चाग्नौ तत्तेजो विद्धि मामकम् ॥१५।१२॥
गामाविश्य च भूतानि धारयाम्यहमोजसा ।
पुष्णामि चौषधी सर्वा सोमो भूत्वा रसात्मक ॥१५।१३॥
अह वैश्वानरो भूत्वा प्राणिना देहमाश्रित ।
प्राणापानसमायुक्त पचाम्यन्न चतुर्विधम् ॥१५।१४॥

६—एकस्यैवाश्वत्थाव्ययस्य प्रतिजीवशरीर भेदेनोपलब्धावपि औपाधिकभेदस्य तुच्छतया सर्वेषां जीवाव्ययाना परमाव्ययानतिरेकादैकात्म्यम् ।

सर्वस्य चाह हृदि सन्निविष्टो
मत्त स्मृतिर्ज्ञानमपोहन च ।
वेदैश्च सर्वैरहमेव वेद्यो
वेदान्तकृद्वेदविदेव चाहम् ॥१५।१५॥

७—एकस्यैवाश्वत्थपरमाव्ययस्य प्रत्यर्थ कर्म्मभेदप्रयोजकगुणत्रयोपाधिभिन्नाभ्या क्षराक्षरसज्ञाभ्या महत्प्रकृतिरूपाभ्या भेदोपचारोपपत्ति ।

द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च ।
क्षर सर्वाणि भूतानि कूटस्थोऽक्षर उच्यते ॥१५।१६॥
उत्तम पुरुषस्त्वन्य परमात्मेत्युदाहृत ।
यो लोकत्रयमाविश्य विभर्त्यव्यय ईश्वर ॥१५।१७॥
यस्मात् क्षरमतीतोऽहमक्षरादपि चोत्तम ।
अतोऽस्मि लोके वेदे च प्रथित पुरुषोत्तम ॥१५।१८॥
यो मामेवमसमूढो जानाति पुरुषोत्तमम् ।
स सर्वविद् भजति मा सर्वभावेन भारत ! ॥१५।१९॥
इति गुह्यतम शास्त्रमिदमुक्त मयानघ ! ।
एतद् बुद्ध्वा बुद्धिमान् स्यात् कृतकृत्यश्च भारत ! ॥१५।२०॥

इति पञ्चदशोऽध्याय ॥१५॥

---

(४) दैवासुर-भूतसर्गोपनिषत् ।

१—जन्मसिद्धनैसर्गिकदैवासुरसंपत्तिनिबन्धना स्वभावसिद्धसहजगुणकर्म्मानुबन्धा. ।

श्रीभगवानुवाच

अभय[१] सत्त्वमशुद्धि[२]र्ज्ञानयोगव्यवस्थिति[३] ।
दान[४] दमश्च[५] यज्ञश्च[६] स्वाध्याय[७]स्तप[८] आर्जवम्[९] ॥१६।१॥
अहिंसा[१०] सत्यम[११]क्रोध[१२]स्त्याग[१३] शान्ति[१४]रपैशुनम्[१५] ।
दया[१६] भूतेष्वलोलुप्त्व[१७]मार्दव[१८] ह्री[१९]रचापलम्[२०] ॥१६।२॥
तेज[२१] क्षमा[२२] धृति[२३] शौच[२४]मद्रोहो[२५] नातिमानिता[२६] ।
भवन्ति सपद दैवी[(१)]मभिजातस्य भारत ! ॥१६।३॥
दम्भो[१] दर्प्पो[२]ऽभिमानश्च[३] क्रोध[४] पारुष्य[५]मेव च ।
अज्ञान[६] चाभिजातस्य पार्थ ! सपदमासुरीम् ॥१६।४॥
दैवी सपद्विमोक्षाय निबन्धायासुरी मता ।
मा शुच सपद दैवीमभिजातोऽसि पाण्डव ! ॥१६।५॥
'द्वौ भूतसर्गौ लोकेऽस्मिन् दैव आसुर एव च ।
दैवो विस्तरश प्रोक्त आसुर पार्थ ! मे शृणु ॥'१॥

---

(१)

दैवसंपत्तिलक्षणानि					आसुरसंपत्ति-लक्षणानि
अभयम्	यज्ञ.	सत्यम्	भूतेषु दया	तेज	दम्भः
सत्वसशुद्धि.	स्वाध्याय	अक्रोध	निर्लोभत्वम्	क्षमा	दर्प·
ज्ञानयोगनिष्ठा	तपः	त्याग·	मार्दवम्	धृति	अभिमान·
दानम्	आर्जवम्	शान्ति	लज्जा	शौचम्	क्रोधः
दमः	अहिंसा	अपैशुनम्	अचापलम्	अद्रोह·	पारुष्यम्
०	०	०	०	अनतिमान	अज्ञानम्

१ पद्यमिद बहुषु पुस्तकेषु दृश्यते । पर दैवासुरसपदो पूर्वमेव प्रक्रान्तत्त्वान्मध्ये प्रक्रमोचिता प्रतिज्ञा न योग्येति सप्तशताधिकसख्यापत्तिभिया नेदमत्र परिगणितम् । ये त्विद पठन्ति, तै त्रयोदशाध्यायारम्भे "प्रकृति पुरुष चैव" इत्याद्यर्जुनवाक्य न पाठ्यमिति न सख्यातिरेक ।

२—दैवासुरभेदाद् द्विविधे भूतसर्गे आसुरसर्गानुगतानि विद्यानिरपेक्षाणि गुणकर्म्माणि ।

प्रवृत्ति च निवृत्ति च जना न विदुरासुरा ।
न शौच नापि चाचारो न सत्य तेषु विद्यते ॥१६।६॥
असत्यमप्रतिष्ठ ते जगदाहुरनीश्वरम् ।
अपरस्परसभूत किमन्यत्कामहैतुकम् ॥१६।७॥
एता दृष्टिमवष्टभ्य नष्टात्मानोऽल्पबुद्धय ।
प्रभवन्त्युग्रकर्म्माण क्षयाय जगतोऽहिता ॥१६।८॥
काममाश्रित्य दुष्पूर दम्भमानमदान्विता ।
मोहाद् गृहीत्वाऽसद्ग्राहान् प्रवर्त्तन्ते ऽशुचिव्रता ॥१६।९॥
चिन्तामपरिमेया च प्रलयान्तामुपाश्रिता ।
कामोपभोगपरमा एतावदिति निश्चिता ॥१६।१०॥
आशापाशशतैर्बद्धा कामक्रोधपरायणा ।
ईहन्ते कामभोगार्थमन्यायेनार्थसचयान् ॥१६।११॥
इदमद्य मया लब्धमिम प्राप्स्ये मनोरथम् ।
इदमस्तीदमपि मे भविष्यति पुनर्धनम् ॥१६।१२॥
असौ मया हत शत्रुर्हनिष्ये चापरानपि ।
ईश्वरोऽहमह भोगी सिद्धोऽह बलवान् सुखी ॥१६।१३॥
आढ्योऽभिजनवानस्मि कोऽन्योस्ति सदृशो मया ।
यक्ष्ये दास्यामि मोदिष्य इत्यज्ञानविमोहिता ॥१६।१४॥
अनेकचित्तविभ्रान्ता मोहजालसमावृता ।
प्रसक्ता कामभोगेषु पतन्ति नरकेऽशुचौ ॥१६।१५॥
आत्मसभाविता स्तब्धा धनमानमदान्विता ।
यजन्ते नाम यज्ञैस्ते दम्भेनाविधिपूर्वकम् ॥१६।१६॥
अहकार बल दर्प काम क्रोध च सश्रिता ।
मामात्मपरदेहेषु प्रद्विषन्तोऽभ्यसूयका ॥१६।१७॥
तानह द्विषत क्रूरान् ससारेषु नराधमान् ।
क्षिपाम्यजस्रमशुभानासुरीष्वेव योनिषु ॥१६।१८॥
आसुरी योनिमापन्ना मूढा जन्मनि जन्मनि ।
मामप्राप्यैव कौन्तेय ! ततो यान्त्यधमा गतिम् ॥१६।१९॥

३—आसुरसपन्मूलकानां कामक्रोधलोभानां नरकद्वारत्वम् ।

त्रिविध नरकस्येद द्वार नाशनमात्मन ।
काम क्रोधस्तथा लोभस्तस्मादेतत्त्रय त्यजेत् ॥१६।२०॥
एतैर्विमुक्त कौन्तेय ! तमोद्वारैस्त्रिभिर्नर ।
आचरत्यात्मन श्रेयस्ततो याति परा गतिम् ॥१६।२१॥

४—दैवसपन्मूलकाना विद्यासमुच्चितगुणकर्मणा प्रचारोपपत्तये वेदादिशास्त्रपरिशीलनादेशः ।

य शास्त्रविधिमुत्सृज्य वर्त्तते कामकारत ।
न स सिद्धिमवाप्नोति न सुख न परा गतिम् ॥१६।२२॥
तस्माच्छास्त्र प्रमाण ते काय्यर्काय्यव्यवस्थितौ ।
ज्ञात्वा शास्त्रविधानोक्त कर्म्म कर्त्तुमिहार्हसि ॥१६।२३॥

इति षोडशोऽध्यायः ॥१६॥

(५) गुणकर्मप्रचयोपनिषत्

(गुणप्रचयोपनिषत्)

१—सर्वविधव्यवहारात्मकलोकयात्राया दैवसपत्त्या सत्त्वगुणस्य, आसुरसपत्त्या तमोगुणस्य, उभयसपत्तिसाम्याद्रजोगुणस्यानुषङ्गसभवाद् गुणत्रयभेदभिन्नदैवासुरयोगमायालक्षणप्रकृत्यभिधाभिन्नाना भूतसर्गाणा कानिचिदुदाहरणानि। तथा च तावद् गुणत्रयनिष्ठाभेदात् श्रद्धात्रैविध्यम्।

अर्जुन उवाच

ये शास्त्रविधिमुत्सृज्य यजन्ते श्रद्धयाऽन्विता ।
तेषा निष्ठा तु का कृष्ण सत्त्वमाहो रजस्तम ॥१७।१॥

श्रीभगवानुवाच

त्रिविधा भवति श्रद्धा देहिना सा स्वभावजा ।
सात्त्विकी राजसी चैव तामसी चेति ता शृणु ॥१७।२॥
सत्त्वानुरूपा सर्वस्य श्रद्धा भवति भारत ।
श्रद्धामयोऽय पुरुषो यो यच्छ्रद्ध स एव स ॥१७।३॥
यजन्ते सात्त्विका देवान् यक्षरक्षासि राजसा ।
प्रेतान् भूतगणाश्चान्ये यजन्ते तामसा जना ॥१७।४॥
अशास्त्रविहित घोर तप्यन्ते ये तपो जना ।
दम्भाहकारसयुक्ता कामरागबलान्विता ॥१७।५॥
कर्षयन्त शरीरस्थ भूतग्राममचेतस ।
मा चैवान्त शरीरस्थ तान् विद्ध्यासुरनिश्चयान् ॥१७।६॥

२—गुणत्रयवृत्तिभेदादाहारत्रैविध्यम्।

आहारस्त्वपि सर्वस्य त्रिविधो भवति प्रिय ।
यज्ञस्तपस्तथा दान तेषा भेदमिम शृणु ॥१७।७॥
आयु-सत्त्व-बलारोग्य-सुख-प्रीतिविवर्धना ।
रस्या स्निग्धा स्थिरा हृद्या आहारा सात्त्विकप्रिया ॥१७।८॥
कट्वम्ल-लवणात्युष्ण-तीक्ष्ण-रूक्षविदाहिन ।
आहारा राजसस्येष्टा दु खशोकामयप्रदा ॥१७।९॥
यातयाम गतरस पूति पर्य्युषित च यत् ।
उच्छिष्टमपि चामेध्य भोजन तामसप्रियम् ॥१७।१०॥

३—गुणत्रयवृत्तिभेदाद् यज्ञत्रैविध्यम्।

अफलाकाङ्क्षिभिर्यज्ञो विधिदृष्टो य इज्यते।
यष्टव्यमेवेति मन समाधाय स सात्त्विक ॥१७।११॥
अभिसन्धाय तु फल दम्भार्थमपि चैव यत्।
इज्यते भरतश्रेष्ठ ! त यज्ञ विद्धि राजसम् ॥१७।१२॥
विधिहीनमसृष्टान्न मन्त्रहीनमदक्षिणम्।
श्रद्धाविरहित यज्ञ तामस परिचक्षते ॥१७।१३॥

४—शरीर-वाङ्मनोरूपाधिष्ठानभेदात् तपस्त्रैविध्यम्।

देवद्विजगुरुप्राज्ञपूजन शौचमार्जवम्।
ब्रह्मचर्य्यमहिसा च शारीर तप उच्यते ॥१७।१४॥
अनुद्वेगकर वाक्य सत्य प्रियहित च यत्।
स्वाध्यायाभ्यसन चैव वाङ्मय तप उच्यते ॥१७।१५॥
मन प्रसाद सौम्यत्व मौनमात्मविनिग्रह।
भावसशुद्धिरित्येतत्तपो मानसमुच्यते ॥१७।१६॥

५—गुणत्रयवृत्तिभेदात् तपस्त्रैविध्यम्।

श्रद्धया परया तप्त तपस्तत्* त्रिविध नरै।
अफलाकाङ्क्षिभिर्युक्तै सात्त्विक परिचक्षते ॥१७।१७॥
सत्कारमानपूजार्थ तपो दम्भेन चैव यत्।
क्रियते तदिह प्रोक्त राजस चलमध्रुवम् ॥१७।१८॥
मूढग्राहेणात्मनो यत् पीडया क्रियते तप।
परस्योत्सादनार्थ वा तत्तामसमुदाहृतम् ॥१७।१९॥

६—गुणत्रयवृत्तिभेदाद् दानत्रैविध्यम्।

दातव्यमिति यद्दान दीयतेऽनुपकारिणे।
देशे काले च पात्रे च तद्दान सात्त्विक स्मृतम् ॥१७।२०॥
यत्तु प्रत्युपकारार्थ फलमुद्दिश्य वा पुन।
दीयते च परिक्लिष्ट तद्दान राजस स्मृतम् ॥१७।२१॥
अदेशकाले यद्दानमपात्रेभ्यश्च दीयते।
असत्कृतमवज्ञात तत्तामसमुदाहृतम् ॥१७।२२॥

---

*तप इति—"एतद्वै तप इत्याहुर्यत् स्व ददाति।" इति हि तपोलक्षण श्रुतौ श्रूयते॥ स्वमनोयोगदानद्वारा आत्मनोऽन्यत्र कस्मैचित्कालाय परिदान तपः। योगाभ्यासस्तपः॥

(५) (कर्म्मप्रचयोपनिषत्)

७—प्रवृत्तकर्मणा निवृत्तकर्म्मणा काम्यकर्म्मणा वा यज्ञतपोदानानामपूर्णत्वसभावनायां तत्पूर्तये प्रजापतिरूनातिरिक्तयो प्रतिष्ठेति वेदप्रामाण्यमातिष्ठमानस्येश्वराव्ययस्मरणरूपो ब्रह्मनिर्द्देश स्त्रिविध. कर्तव्यतयोपदिश्यते ।

ॐ तत्सदिति निर्द्देशो ब्रह्मणस्त्रिविध स्मृत ।
ब्राह्मणास्तेन वेदाश्च यज्ञाश्च विहिता पुरा ॥१७।२३॥
तस्मादोमित्युदाहृत्य यज्ञदानतप क्रिया ।
प्रवर्तन्ते विधानोक्ता सतत ब्रह्मवादिनाम् ॥१७।२४॥
तदित्यनभिसन्धाय फल यज्ञ-तप -क्रिया ।
दानक्रियाश्च विविधा क्रियन्ते मोक्षकाङ्क्षिभि ॥१७।२५॥
सद्भावे साधुभावे च सदित्येतत् प्रयुज्यते ।
प्रशस्ते कर्म्मणि तथा सच्छब्द पार्थ ! युज्यते ॥१७।२६॥
यज्ञे तपसि दाने च स्थिति सदिति चोच्यते ।
कर्म्म चैव तदर्थीय सदित्येवाभिधीयते ॥१७।२७॥
अश्रद्धया हुत दत्त तपस्तप्त कृत च यत् ।
असदित्युच्यते पार्थ ! न च तत्प्रेत्य नो इह ॥१७।२८॥

इति सप्तदशोऽध्याय· ॥

८—कर्म्मसन्यास-कर्म्मत्यागयोर्विवेकपरिज्ञानम् ।

अर्जुन उवाच

सन्यासस्य महाबाहो तत्त्वमिच्छामि वेदितुम् ।
त्यागस्य च हृषीकेश ! पृथक् केशिनिषूदन ! १८।१॥

श्रीभगवानुवाच

काम्याना कर्म्मणा न्यास सन्यास कवयो विदु ।
सर्वकर्म्मफलत्याग प्राहुस्त्याग विचक्षणा ॥१८।२॥
त्याज्य दोषवदित्येके कर्म्म प्राहुर्मनीषिण ।
यज्ञदानतप -कर्म्म न त्याज्यमिति चापरे ॥१८।३॥
निश्चय शृणु मे तत्र त्यागे भरतसत्तम ! ।
त्यागो हि पुरुषव्याघ्र ! त्रिविध सप्रकीर्तित ॥१८।४॥
यज्ञदानतप कर्म्म न त्याज्य कार्य्यमेव तत् ।
यज्ञो दान तपश्चैव पावनानि मनीषिणाम् ॥१८।५॥
एतान्यपि तु कर्म्माणि सङ्ग त्यक्त्वा फलानि च ।
कर्त्तव्यानीति मे पार्थ ! निश्चित मतमुत्तमम् ॥१८।६॥

९—गुणत्रयवृत्तिभेदात् त्यागत्रैविध्यम् ।

नियतस्य तु सन्यास कर्म्मणो नोपपद्यते ।
मोहात्तस्य परित्यागस्तामस परिकीर्त्तित ॥१८।७॥
दु खमित्येव यत् कर्म्म कायक्लेशभयात् त्यजेत् ।
स कृत्वा राजस त्याग नैव त्यागफल लभेत् ॥१८।८॥
कार्य्यमित्येव यत् कर्म्म नियत क्रियतेऽर्जुन ! ।
सङ्ग त्यक्त्वा फल चैव स त्याग सात्त्विको मत ॥१८।९॥
न द्वेष्टचकुशल कर्म्म कुशले नानुषज्जते ।
त्यागी सत्त्वसमाविष्टो मेधावी छिन्नसशय ॥१८।१०॥
न हि देहभृता शक्य त्यक्तु कर्म्माण्यशेषत ।
यस्तु कर्म्मफलत्यागी स त्यागीत्यभिधीयते ॥१८।११॥

१०—कर्म्मयोगिना कर्म्मत्यागदोषात् कर्म्मफलत्रैविध्यम् ।
कर्म्मसन्यासिना तु कर्म्मफलोदयाभाव. ।

अनिष्टमिष्ट मिश्र च त्रिविध कर्म्मण फलम् ।
भवत्यत्यागिना प्रेत्य न तु सन्यासिना क्वचित् ॥१८।१२॥

११—साख्यसिद्धान्ते कर्म्मसिद्धिहेतूना पाञ्चविध्यम् ।

पञ्चैतानि* महाबाहो कारणानि निबोध मे ।
साख्ये कृतान्ते प्रोक्तानि सिद्धये सर्वकर्म्मणाम् ॥१८।१३॥
[१]अधिष्ठान तथा कर्ता[२] करण[३] च पृथग्विधम् ।
विविधाश्च पृथक् चेष्टा[४] दैव[५] चैवात्र पञ्चमम् ॥१८।१४॥
शरीरवाङ्मनोभिर्यत् कर्म्म प्रारभते नर ।
न्याय्य वा विपरीत वा पञ्चैते तस्य हेतव ॥१८।१५॥
तत्रैव सति कर्त्तारमात्मान केवल तु य ।
पश्यत्यकृतबुद्धित्वान्न स पश्यति दुर्म्मति ॥१८।१६॥
यस्य नाहकृतो भावो बुद्धिर्यस्य न लिप्यते ।
हत्वापि स इमान् लोकान्न हन्ति न निबद्धचते ॥१८।१७॥

१२—ज्ञानत्रिपुटी-कर्म्मत्रिपुटीरूपाणा षण्णां भावाना कर्म्मस्वरूपनियामकत्वम् ।

ज्ञान ज्ञेय परिज्ञाता त्रिविधा कर्म्मचोदना ।
करण कर्म्म कर्त्तेति त्रिविध कर्मसग्रह ॥१८।१८॥

*** कर्म्मसिद्धिहेतव·—**
[१] दैवम्, [२] कर्ता, [३] करणम्, [४] अधिष्ठानम्, [५] क्रिया (पुरुषकार),
यथा ह्येकेन चक्रेण न रथस्य गतिर्भ्रवेत्। एवं पुरुषकारेण विना दैव न सिद्धचति ।

१३—कर्म्मस्वरूपनियामकेषु ज्ञान-कर्म्म-कर्तृणा प्रत्येकस्य गुणत्रयवृत्तिभेदात त्रैविध्यम् ।

ज्ञान कर्म्म च कर्त्ता च त्रिधैव गुणभेदत ।
प्रोच्यते गुणसख्याने यथावच्छृणु तान्यपि ॥१८।१९॥

१४—ज्ञानत्रैविध्यम् ।

सर्वभूतेषु येनैक भावमव्ययमीक्षते ।
अविभक्त विभक्तेषु तज्ज्ञान विद्धि सात्त्विकम् ॥१८।२०॥
पृथक्त्वेन तु यज्ज्ञान नानाभावान् पृथग्विधान् ।
वेत्ति सर्वेषु भूतेषु तज्ज्ञान विद्धि राजसम् ॥१८।२१॥
यत्तु कृत्स्नवदेकस्मिन् कार्ये सक्तमहैतुकम् ।
अतत्त्वार्थवदल्प च तत्तामसमुदाहृतम् ॥१८।२२॥

१५—कर्म्मत्रैविध्यम् ।

नियत सङ्गरहितमरागद्वेषत कृतम् ।
अफलप्रेप्सुना कर्म्म यत् तत् सात्त्विकमुच्यते ॥१८।२३॥
यत्तु कामेप्सुना कर्म्म साहकारेण वा पुन ।
क्रियते बहुलायास तद्राजस-मुदाहृतम् ॥१८॥२४॥
अनुबन्ध क्षय हिसामनपेक्ष्य च पौरुषम् ।
मोहादारभ्यते कर्म्म यत्तत्तामसमुच्यते ॥१८।२५॥

१६—कर्तृत्रैविध्यम् ।

मुक्तसङ्गोऽनहवादी धृत्युत्साहसमन्वित ।
सिद्धयसिद्धयोर्निर्विकार कर्त्ता सात्त्विक उच्यते ॥१८।२६॥
रागी कर्म्मफलप्रेप्सुर्लुब्धो हिसात्मकोऽशुचि ॥
हर्षशोकान्वित कर्त्ता राजस परिकीर्तित ॥१८।२७॥
अयुक्त प्राकृत स्तब्ध शठो नैष्कृतिकोऽलस ।
विषादी दीर्घसूत्री च कर्त्ता तामस उच्यते ॥१८।२८॥

१७—गुणत्रयवृत्तिभेदाद् बुद्धित्रैविध्यम् ।

बुद्धेर्भेद धृतेश्चैव गुणतस्त्रिविध शृणु ।
प्रोच्यमानमशेषेण पृथक्त्वेन धनजय ! ॥१८।२९॥
प्रवृत्ति च निवृत्ति च कार्य्याकार्य्ये भयाभये ।
बन्ध मोक्ष च या वेत्ति बुद्धि सा पार्थ ! सात्त्विकी ॥१८।३०॥
यया धर्म्ममधर्म्म च कार्य्य चाकार्य्यमेव च ।
अयथावत् प्रजानाति बुद्धि सा पार्थ ! राजसी ॥१८।३१॥

अधर्म्म धर्म्ममिति या मन्यते तमसावृता ।
सर्वार्थान् विपरीताश्च बुद्धि सा पार्थ ! तामसी ॥१८।३२॥

१८—गुणत्रयवृत्तिभेदाद् धृतित्रैविध्यम् ।

धृत्या यया धारयते मन प्राणेन्द्रियक्रिया ।
योगेनाव्यभिचारिण्या धृति सा पार्थ ! सात्त्विकी ॥१८।३३॥
यया तु धर्म्मकामार्थान् धृत्या धारयतेऽर्जुन ! ।
प्रसङ्गेन फलाकाङ्क्षी धृति सा पार्थ ! राजसी ॥१८।३४॥
यया स्वप्न भय शोक विषाद मदमेव च ।
न विमुञ्चति दुर्म्मेधा धृति सा पार्थ ! तामसी ॥१८।३५॥

१९—गुणत्रयवृत्तिभेदात् सुखत्रैविध्यम् ।

सुख त्विदानी त्रिविध शृणु मे भरतर्षभ ! ।
अभ्यासाद्रमते यत्र दु खान्त च निगच्छति ॥१८।३६॥
यत्तदग्रे विषमिव परिणामेऽमृतोपमम् ।
तत्सुख सात्त्विक प्रोक्तमात्मबुद्धिप्रसादजम् ॥१८।३७॥
विषयेन्द्रियसयोगाद्यत्तदग्रेऽमृतोपमम् ।
परिणामे विषमिव तत् सुख राजस स्मृतम् ॥१८।३८॥
यदग्रे चानुबन्धे च सुख मोहनमात्मन ।
निद्रालस्यप्रमादोत्थ तत्तामसमुदाहृतम् ॥१८।३९॥

२०—गुणत्रयवृत्तीना सर्वभावानुगतत्वेनोपसंहारः ।

न तदस्ति पृथिव्या वा दिवि देवेषु वा पुन ।
सत्त्व प्रकृतिजैर्मुक्त यदेभि स्यात्त्रिभिर्गुणै ॥१८।४०॥

---

(६) अत्याज्यकर्म्मोपनिषत्

१—अधिकारसिद्ध-सास्कारिक-दैवासुरसपत्तिनिबन्धनाः स्वभावसिद्धस्वीयगुणकर्म्मानुबन्धा. ।

ब्राह्मणक्षत्रियविशा शूद्राणा च परन्तप [1]।
कर्म्माणि प्रविभक्तानि स्वभावप्रभवैर्गुणै ॥१८।४१॥
शमो दमस्तप शौच क्षान्तिरार्जवमेव च ।
ज्ञान विज्ञानमास्तिक्य ब्रह्मकर्म्म स्वभावजम् ॥१८।४२॥
शौर्य तेजो धृतिर्दाक्ष्य युद्धे चाप्यपलायनम् ।
दानमीश्वरभावश्च क्षात्र कर्म्म स्वभावजम् ॥१८।४३॥
कृषिगोरक्ष्यवाणिज्य वैश्यकर्म्म स्वभावजम् ।
परिचर्य्यात्मक कर्म्म शूद्रस्यापि स्वभावजम् ॥१८।४४॥

२—दोषवतामपि स्वकर्म्मणा[१] सहजकर्म्मणा[२] च परित्यागानौचित्यम् ।

स्वे स्वे कर्म्मण्यभिरत ससिद्धि लभते नर ।
स्वकर्म्मनिरत सिद्धि यथा विन्दति तच्छृणु ॥१८।४५॥
यत प्रवृत्तिर्भूताना येन सर्वमिद ततम् ।
स्वकर्म्मणा तमभ्यर्च्य सिद्धि विन्दति मानव ॥१८।४६॥
श्रेयान् स्वधर्म्मो विगुण परधर्म्मात् स्वनुष्ठितात् ।
स्वभावनियत कर्म्म कुर्वन्नाप्नोति किल्विषम् ॥१८।४७॥
सहज कर्म्म कौन्तेय [1] सदोषमपि न त्यजेत् ।
सर्वारम्भा हि दोषेण धूमेनाग्निरिवावृता ॥१८।४८॥

१–* अधिकारसिद्धसास्कारिकसपत्तिनिबन्धनकर्म्माणि ।
२–जन्मसिद्ध-नैसर्गिकसंपत्तिनिबन्धनकर्म्माणि ।

(७) अनावरणकर्मोपनिषत्

१—अनासक्तस्य फलवासनाशून्यस्य काम्यकर्मसन्यासिन. कर्म्मानुष्ठानेऽपि नैष्कर्म्यसिद्धि ।

असक्तबुद्धि सर्वत्र जितात्मा विगतस्पृह ।
नैष्कर्म्यसिद्धि परमा सन्यासेनाधिगच्छति ॥१८।४९॥
सिद्धि प्राप्तो यथा ब्रह्म तथाप्नोति निबोध मे ।
समासेनैव कौन्तेय ! निष्ठा ज्ञानस्य या परा ॥१८।५०॥
बुद्धया विशुद्धया युक्तो धृत्यात्मान नियम्य च ।
शब्दादीन् विषयास्त्यक्त्वा रागद्वेषौ व्युदस्य च ॥१८।५१॥
विविक्तसेवी लघ्वाशी यतवाक्कायमानस ।
ध्यानयोगपरो नित्य वैराग्य समुपाश्रित ॥११।५२॥
अहकार बल दर्प काम क्रोध परिग्रहम् ।
विमुच्य निर्म्मम शान्तो ब्रह्मभूयाय कल्पते ॥१८।५३॥

२—नैष्कर्म्येण ब्रह्मभूतस्य विदेहावस्था गतस्य सर्वविधकर्म्माचरणेऽपि सद्योमुक्तिसिद्धया परमाव्यय-पदप्राप्त्यानन्द. ।

ब्रह्मभूत प्रसन्नात्मा न शोचति न काङ्क्षति ।
सम सर्वेषु भूतेषु मद्भक्ति लभते पराम् ॥१८।५४॥
भक्त्या मामभिजानाति यावान् यश्चास्मि तत्त्वत ।
ततो मा तत्त्वतो ज्ञात्वा विशते तदनन्तरम् ॥१८।५५॥
सर्वकर्म्माण्यपि सदा कुर्वाणो मद्व्यपाश्रय ।
मत्प्रसादादवाप्नोति शाश्वत पदमव्ययम् ॥१८।५६॥

इति भगवद्गीतोपनिषदि अभिनिवेशक्लेशनिवर्त्तिका धर्म्मबुद्धियोगपरिष्कृता आर्षविद्या समाप्ता

(४)

अत्र विद्याचतुष्टयी पूर्णा

अथ सर्वविधक्लेशनिवर्त्तिकानां चतुर्विधबुद्धियोग-विद्यानामुद्धार उपदिश्यते

प्रतिसत्त्व जीवेश्वरभेदात् सलग्नात्मद्वैविध्यसिद्धान्ते जन्मसिद्धाधिकारसिद्धदैवासुरसंपत्ति-परिष्कृतप्रकृतिवशीभूतेन जीवात्मना स्वसंलग्नेश्वरशरणागत्या तदेकीभावमागत्यैतन्नियोगवशी-भूतेन वर्तितव्यमिति परमादेश· ॥

तत्र चतसृणा विद्यानामेकैकस्या उद्धारा पृथक् प्रदर्श्यन्ते

(१) तत्र सारोद्धारोपनिषत्

१—पूर्वाचार्य्यपरम्परासिद्धकर्म्मविद्याचतुष्टयोपदेशानन्तरमन्ते विद्याचतुष्टयनिष्कर्षे विवक्षिते प्रथम-स्तावद् वैराग्यबुद्धियोगविद्यानिष्कर्षसिद्धाया जीवाव्ययलक्षणस्वात्मनिर्भरताया आदेश ।

चेतसा सर्वकर्म्माणि मयि संन्यस्य मत्पर· ।
बुद्धियोगमुपाश्रित्य मच्चित्तः सतत भव ॥ (१८।५७)
मच्चित्त· सर्वदुर्गाणि मत्प्रसादात्तरिष्यसि ।
अथ चेत् त्वमहंकारान्न श्रोष्यसि विनङ्क्ष्यसि ॥ (१८।५८)

२—अथ आर्षविद्यालक्षणचतुर्थविद्योद्धारस्वरूपे धर्म्मबुद्धियोगविद्यानिष्कर्षसिद्धाया प्रकृतिसिद्ध-कर्म्मकर्तव्यताया आदेश ।

यदहङ्कारमाश्रित्य न योत्स्य इति मन्यसे ।
मिथ्यैष व्यवसायस्ते प्रकृतिस्त्वां नियोक्ष्यति ॥ (१८।५९)

३—अथ सिद्धविद्यालक्षणद्वितीयविद्योद्धारस्वरूपे ज्ञानबुद्धियोगविद्यानिष्कर्षसिद्धाया स्वभावसिद्ध-स्वकर्म्मप्रवणताया आदेश ।

स्वभावजेन कौन्तेय ! निबद्धः स्वेन कर्म्मणा ।
कर्तुं नेच्छसि यन् मोहात् करिष्यस्यवशोऽपि तत् ॥ (१८।६०)

४—अथ राजविद्यालक्षणतृतीयविद्योद्धारस्वरूप पुनरैश्वर्य्यबुद्धियोगनिष्कर्षसिद्धाया जीवा-व्ययात्मसलग्नेश्वराव्ययलक्षणान्तरात्मप्रेरितकर्म्मकर्त्तव्यताया आदेश ।

ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन ! तिष्ठति ।
भ्रामयन् सर्वभूतानि यन्त्रारूढानि मायया ॥ (१८।६१)

तमेव शरणं गच्छ सर्वभावेन भारत ! ।
तत्प्रसादात् परा शान्ति स्थानं प्राप्स्यसि शाश्वतम् ॥ (१८।६२)
इति ते ज्ञानमाख्यातं गुह्याद् गुह्यतरं मया ।
विमृश्यैतदशेषेण यथेच्छसि तथा कुरु ॥ (१८।६३)

---

(२) अथ उद्धारोद्धारोपनिषत्

१—राजर्षिविद्योद्धारस्वरूपो गूढोत्माव्ययपुरुषैकनिष्ठतादेश ।
सर्वगुह्यतम भूय. शृणु मे परम वच ।
इष्टोऽसि मे दृढमिति ततो वक्ष्यामि ते हितम् ॥१८।६४॥
मन्मना भव मद्भक्तो मद्याजी मा नमस्कुरु ।
मामेवैष्यसि सत्य ते प्रतिजाने प्रियोऽसि मे ॥१८।६५॥
सर्वधर्म्मान् परित्यज्य मामेक शरणं व्रज ।
अह त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुच ।१८।६६॥

इति सर्वविधक्लेशनिवर्तिकाना चतुर्विधबुद्धियोगविद्यानामुद्धारलक्षणो विद्योपसहार समाप्त

---

(२) इदं गीताविज्ञानमयोग्येभ्यो ग्रहीतुमसमर्थेभ्योऽपात्रेभ्यश्च न वक्तव्यम् ।

इद ते नातपस्काय नाभक्ताय कदाचन ।
न चाशुश्रूषवे वाच्य न च मा योऽभ्यसूयति ॥१८।६७॥

फलश्रुतिः

(३) अथ गीताफलश्रुत्युपनिषत्

(१) **भगवद्गीतार्थभावनाप्रवणत्वप्रशसा ।**

य इद परम गुह्य मद्भक्तेष्वभिधास्यनि ।
भक्ति मयि परा कृत्वा मामेवैष्यत्यसशय ॥१८।६८॥
न च तस्मान् मनुष्येषु कश्चिन् मे प्रियकृत्तम ।
भविता न च मे तस्मादन्य प्रियतरो भुवि ॥१८।६९॥
अध्येष्यते च य इम धर्म्म्य सवादमावयो ।
ज्ञानयज्ञेन तेनाहमिष्ट स्यामिति मे मति ॥१८।७०॥
श्रद्धावाननसूयश्च शृणुयादपि यो नर ।
सोऽपि मुक्त शुभाँल्लोकान् प्राप्नुयात्पुण्यकर्म्मणाम् ॥१८।७१॥

---

(२) इतिहासप्रकरणे विज्ञानप्रकरणोपसंहारः ।

कच्चिदेतच्छ्रुत पार्थ ! त्वयैकाग्रेण चेतसा ।
कच्चिदज्ञानसमोह प्रनष्टस्ते धनञ्जय ! ॥१८।७२॥

अर्जुन उवाच

नष्टो मोह स्मृतिर्लब्धा त्वत्प्रसादान् मयाच्युत ! ।
स्थितोऽस्मि गतसदेह करिष्ये वचन तव ॥१८।७३॥

इति वैज्ञानिकगीता समाप्ता ।

अथ इतिहासोपसंहारः ।

सञ्जय उवाच

इत्यह वासुदेवस्य पार्थस्य च महात्मन ।
सवादमिममश्रौषमद्भुत रोमहर्षणम् ॥१८।७४॥
व्यासप्रसादाच्छ्रुतवानेतद् गुह्यमह परम् ।
योग योगेश्वरात् कृष्णात् साक्षात् कथयत स्वयम् ।१८।७५

राजन् सस्मृत्य सस्मृत्य सवादमिममद्भुतम् ।
केशवार्जुनयो पुण्य हृष्यामि च मुहुर्मुहु ।१८।७६
तच्च सस्मृत्य सस्मृत्य रूपमत्यद्भुत हरे ।
विस्मयो मे महान् राजन् हृष्यामि च पुन पुन ।१८।७७
यत्र योगेश्वर कृष्णो यत्र पार्थो धनुर्धर ।
तत्र श्रीर्विजयो भूतिर्ध्रुवा नीतिर्मतिर्मम ।१८।७८

इति गीता समाप्ति ।

इति वैराग्य-ज्ञानैश्वर्य-धर्मलक्षण बुद्धियोग-विद्याचतुष्टयी भगवद्गीतोपनिषत् सपूर्णा ।
समाप्त चेद विज्ञानभाष्ये शीर्षककाण्डापरपर्याय मूलकाण्ड द्वितीयम् ।

PRINTED BY M N PANDEY AT THE ALLAHABAD LAW JOURNAL
PRESS, ALLAHABAD AND PUBLISHED BY THE JAIPUR STATE

The University Library,

ALLAHABAD.

Accession No. 141801 Sans.lit.

Call No. 240-S
SD

(Form No 28 L 50,000—51)